वामे स्थितिशिवश्चैव कर्णिकायां शिवासने॥ ५ : ५॥

ईशाने तस्य दिग्भागे संहाराख्यः शिवः स्थितः।
अनुग्रहशिवः प्राच्यां सौम्यायां मुक्तिदः शिवः॥ ५ : ६॥

मुक्तिमूर्तिशिवाः स्थाप्या दिक्षु शेषास्त्वनुक्रमात्।
व्योमव्यापिपदावस्थो विज्ञेयस्तु महाशिवः॥ ५ : ७॥

भवयुग्मपदावस्थो ज्ञेयः सृष्टिशिवोऽत्र तु।
सदा स्थितिशिवश्चैव भवोद्भवपदे स्थितः॥ ५ : ८॥

ओं

मुञ्च मुञ्च पदावस्थः संहाराख्यः शिवः स्मृतः।
अनुग्रहशिवः प्रोक्तः सर्वभूतसुखप्रदः॥ ५ : ९॥

मुक्तिमूर्तित्रयावस्थो विज्ञेयो मुक्तिदः शिवः।
तिरोभावशिवः ख्यातः प्रथमद्वयसंस्थितः॥ ५ : १०॥

शिवादि सर्वदान्तश्च विज्ञेयो भूतिदः शिवः।
नत्यादि?शिवपर्यन्तः प्रथमो मुक्तिदः शिवः॥ ५ : ११॥

शिवान्तेन हि युग्मादि द्वितीयो मुक्तिदः शिवः।
नमस्कारयुगादिस्थं प्रणवान्तस्तृतीयकः॥ ५ : १२॥ (f. 9v)

मुक्तिमूर्तिशिवा ह्येते त्रयः सम्परिकीर्तिताः।
मण्डलं कल्पनीयं तु पूर्ववच्चतुरस्रकम्॥ ५ : १३॥

सूत्रमानविधानेन पूर्वं वापि मनोरमम्। ५ : १४

5:6 संहार] *conj.*; सहार C

॥ इति पुस्करपारमेश्वरे महातन्त्रे सामान्यप्रकरणे शिवालयमण्डलम्॥

ओं व्योमव्यापिने नमः। महाशिवः। ओं भव भव नमः। सृष्टिशिवः। ओं भवोद्भव नमः। स्थितिशिवः। ओं मुञ्च मुञ्च नमः। संहारशिवः। ओं सर्वभूतसुखप्रद नमः। अनुग्रहशिवः। ओं नमः शिवाय। ओं नमो नमः शिवाय नमो नमः। मुक्तिशिवः। ओं प्रथम नमः। तिरोभावशिवः। ओं सर्व्वसर्व्वद नमः। भूतिदशिवः। ओं नमः शिवाय नमः। प्रथमो मुक्तिमूर्तिशिवः। ओं नमो नमः शिवाय नमः। द्वितीयो मुक्तिमूर्तिशिवः। ओं नमो नमः। तृतीयो मुक्तिमूर्तिशिवः॥ (f. 10r)

॥ इति शिवालयमण्डलमन्त्रकोशः॥

परमेश्वर उवाच—

श्मशानं यत्र दह्यन्ते जन्तवो जीववर्जिताः।
नासहस्राादधस्तत्स्यात्करवीरादिकञ्च यत्॥ ६:१॥

सामान्यवाचकमिदम् विशेषो मण्डलन्तु तत्।
बहुरूपस्य तु पदैर्घोराज्यै रूपपञ्चिमैः॥ ६:२॥

अघोरः प्रथमस्तत्र द्वितीयो घोर उच्यते।
घोरघोरतरश्चैव शर्व्वो रुद्रस्तथैव च॥ ६:३॥

श्मशानमण्डलस्यैते चत्वारस्तु शिवाः स्मृताः।
अघोरः पद्ममध्यस्थः प्राच्यां घोरः प्रतिष्ठितः॥ ६:४॥

घोरघोरतरो याम्यां शर्वो वरुणदिक्स्थितः।
रुद्रस्तथोत्तराशास्थो मण्डले परिकल्पते॥ ६:५॥

चतुःप्रेतशिरोरूढाः सर्व्वे पूज्या यथोदिताः।
॥ इति श्मशानमण्डलम्॥

ओं अघोरेभ्यो (f. 10v) नमः। मण्डलमध्ये। ओं अघोरेभ्यो नमः। प्राच्यां। ओं घोरघोरतरेभ्यश्च नमः। याम्यां। ओं सर्वतः शर्व्वसर्व्वेभ्यो नमः।

5:15 शिवाय] *em.*; शिवायः C 5:15 भूतिदशिवः] *conj.*; भूतिदः शिवः C 6:2 विशेषो] *conj.*; विशेषे C 6:3 शर्व्वो] *em.*; सर्व्वो C 6:5 शर्वो] *em.*; सर्वो C

वारुण्यां। ओं नमस्ते रुद्ररूपेभ्यो नमः। उदीच्यां॥

॥ इति श्मशानमण्डलमन्त्रकोशः॥

अग्निहोत्रगृहम्ब्रह्मन्हूयन्ते यत्र वह्नयः॥ ६:६॥

न सहस्राादधश्चैव तत्स्यात्सामान्यवाचके।
अग्निहोत्रगृहे ब्रह्मन्विशेषे मण्डलं स्मृतम्॥ ६:७॥

त्रिभिः पदैस्तु देवस्य तद्धि तत्पुरुषस्य तु।
हरनेत्रत्रयाकार विशेषन्तु प्रकीर्तितम्॥ ६:८॥

यत्र वै गार्हपत्योग्नि देवस्तत्पुरुषस्थितः।
आहवाग्निर्महादेवो रुद्रस्याद्दक्षिणालयः॥ ६:९॥

पश्चिमे पुरुषो देवो महादेवपुरः स्थितः।
रुद्रस्तु दक्षिणे भागे मण्डले परिकीर्तितः॥ ६:१०॥

पूज्यते यत्र देवेशः पुरुषो भुक्तिमुक्तिदः।
॥ इत्यग्निहोत्रमण्डलम्॥ (f. 11r)

ओं तत्पुरुषाय विद्महे नमः। गार्हपत्यः। ओं महादेवाय धीमहे नमः। आहवनीयः। ओं तन्नोरुद्रः प्रचोदयान्नमः। दक्षिणाग्निः।

इत्यग्निहोत्रमण्डले मन्त्राः॥

परमेश्वर उवाच—

पर्वताग्रं तु शिखरं सामान्यं परिकीर्तितम्॥ ६:११॥

तद्वर्षपर्वतानां स्यात्कुलाद्रीणाञ्च कीर्तितम्।
विशेषमण्डलमिदं पर्व्वताग्रमिति स्थितम्॥ ६:१२॥

मेरुस्तु वर्षशैलानाम्प्रधानः परिकीर्तितः।
विन्ध्यश्चैव कुलाद्रीणामीशानस्तावुभावपि॥ ६:१३॥

पर्वेत्यर्थवशात्संज्ञा वाक्यवर्णपदात्मिका।
वाक्यान्यस्य तु पूर्वाणि चत्वार्युक्तानि शासने॥ ६:१४॥

सदाशिवाख्यं यद्वाक्यं तदग्रं परिकीर्तितम्।

6:9 वै] *em.*; — C

तन्मध्ये यजनीयन्तु चतुःपर्व्वाग्रसंस्थितम्॥ ६ :१५॥

ईशानम्पूजयेन्नित्यं पूर्व्वपर्व्वणि संस्थितम्। (f. 11v)
ईश्वरं दक्षिणे चैव पश्चिमे ब्रह्मणाधिपम्॥ ६ :१६॥

उत्तरे पर्व्वणि शिवं मण्डले परिकीर्तितम्॥ ६ :१७॥

॥ इति पुष्करपारमेश्वरे महातन्त्रे सामान्यप्रकरणे पर्वताग्रपटलः॥

ओं सदाशिव नमः। मण्डलमध्ये ओं ईशानः सर्व्वविद्याधिपानान्नमः। पूर्व्वभागे। ओं ईश्वरः सर्व्वभूतानान्नमः। दक्षिणभागे। ओं ब्रह्मणोधिपतिर्ब्रह्म नमः। पश्चिमभागे। ओं शिवो मेऽस्तु नमः। उत्तरभागे।

॥ पर्वताग्रमण्डलस्य मन्त्रकोशः॥

उत्क्लेदवत्समुत्पन्ने विधिवत्स्नानमाचरेत्।
घृतं चानामिकाङ्गुल्या प्राशयेद्गव्यमात्मवान्॥ ७ :१॥

वामदेवस्य सुजपं कुर्व्वीताष्टशतम्बुधः।
परस्योच्छिष्टसंस्पर्शात्तुल्यजातेः प्रमादतः॥ ७ :२॥

उपस्पृश्यैव शुद्धिः स्यात्स्वजातीशस्य कीर्तितः।
सद्योजातः शूद्रजातेर्म्महेशस्यादि सर्ग्गतः॥ ७ :३॥ (f. 12r)

ब्राह्मणस्तु मुखाद्भूतस्तच्चांगं पुरुषात्मकम्।
बाहुभ्यां क्षत्रियो जातो ह्यघोरांगञ्च तत्स्मृतम्॥ ७ :४॥

ऊरुभ्यां वैश्य उत्पन्नो वामस्यांगञ्च तद्विदुः।
पद्भ्यां शूद्रः समुत्पन्नः सद्यश्चांगञ्च तत्स्मृतम्॥ ७ :५॥

जातीनामीश्वरास्त्वेवं ब्रह्ममन्त्राः प्रतिष्ठिताः।
नानाजातेस्तु संस्पर्शादहोरात्रमुपोष्य तु॥ ७ :६॥

एकस्थो तत्र जप्तव्यो जातीशे तु विजानता।
एकाहं क्षत्रिसंस्पर्शाद्वैश्यस्पर्शाद्व्यहं जपेत्॥ ७ :७॥

7:1 उत्क्लेद°] *conj.*; उत्क्लेदे° C   7:1 प्राशयेत्] *conj.*; प्रासयेत् C   7:5 शूद्रः] *em.*; सूद्रः C

त्र्यहन्तु शूद्रसंस्पर्शाद्ब्राह्मणन्तु विशोधयेत्।
एकाहं वैश्य संस्पर्शाच्छूद्रस्पर्शाद्व्यहं जपेत्॥ ७ : ८॥

क्षत्रियो वैश्य एकाहं शूद्रस्पर्शाद्विशुद्ध्यति।
बाह्यवर्णस्य संस्पर्शात्सर्वेषामेव वर्णिनाम्॥ ७ : ९॥

मण्डलस्थं शिवं पूज्य जात्युद्धारस्य कर्मणा।
स्वजातीशेनचोद्धारः स्वजातीशः प्रकीर्तितः॥ ७ : १०॥ (f. 12v)

स्वाहान्ते स च निक्षेप उक्षेपः फट्कृतेन तु।
एवं जातिसमुद्धारं कृत्वा तान्दीक्षयेद्गुरुः॥ ७ : ११॥

बाह्यवर्णस्य संस्पर्शादेवं शुद्धिः प्रजायते।
दीक्षाकर्म्म गुरोश्चैव जात्युद्धरणपूर्व्वकम्॥ ७ : १२॥

परोक्षे तु गुरोः कार्यं स्वयमेव विजानता।
वर्णत्रयनिवृत्तोऽपि ब्राह्मणः शिवदीक्षितः॥ ७ : १३॥

दीक्षितानान्तु वर्णानामन्नमद्यादशंकितः।
सौचाचारेण सम्पन्ना ये वर्णाः क्षत्रियादयः॥ ७ : १४॥

तेषामन्नम्परिहरन्प्रायश्चित्ति भवेद्द्विजः।
आमन्त्रितो न भुङ्क्तेऽन्नं यस्य वर्णस्य वै द्विजः॥ ७ : १५॥

तज्जातीशस्वजातीशौ जस्वैकत्र विशुद्ध्यति।
एको द्वौ वा त्रयश्चैव दिवसास्तस्य शुद्धये॥ ७ : १६॥

क्षत्रविट्छूद्रजातीनां जपस्यानुक्रमः स्मृतः।
स्वजातीशस्य वा दृष्ट्वा मण्डलं तु विशुद्ध्यति॥ ७ : १७॥

अभिन्नं भेदतश्चैव गुरुतः स्वयमेव वा। (f. 13r)
चतुरश्रं चतुर्द्वारञ्चतुर्हस्तं चतूरजम्॥ ७ : १८॥

चतुःपत्रेण पद्मेन जातीशस्य तु मण्डलम्।
ईशानः कर्णिकामध्ये पूर्वे तत्पुरुषो दले॥ ७ : १९॥

दक्षिणे बहुरूपश्च वामदेवस्तथोत्तरे।

7:10 पूज्य] *conj.*; पूज्यं C **7:14** दीक्षितानान्तु] *conj.*; दीक्षायान्तु C

सद्योजातः पश्चिमे तु सर्व्वजातीश्वरः स्मृतः॥ ७:२०॥

पूजनीयमिदं सम्यगीशानस्य तु मण्डलम्।
पुरुषः कर्णिकामध्ये ईशानः प्राग्दले स्थितः॥ ७:२१॥

शेषा यथास्थिता एव विप्रजातीशमण्डले।
अघोरः कर्णिकामध्ये ईशानो दक्षिणे दले॥ ७:२२॥

शेषाश्चैव यथा संस्थाः क्षत्रजातीशमण्डले।
वामस्तु कर्णिकामध्ये ईशानश्चोत्तरे दले॥ ७:२३॥

शेषाश्चैव यथावस्था वैश्यजातीशमण्डले।
सद्योजातः कर्णिकायामीशानः पश्चिमे दले॥ ७:२४॥

शेषा यथास्थिताश्चान्ये शूद्रजातीशमण्डले। (f. 13v)
मन्त्रिणोऽन्नन्न भोक्तव्यमन्येषां लिङ्गिनामिह॥ ७:२५॥

भुक्त्वानुरोधाज्जप्तव्यं शतं लिङ्गेश्वरो मनुम्।
ईश्वरो बहुरूपश्च परिव्राजकलिङ्गिनाम्॥ ७:२६॥

तथा पाशुपतानाञ्च वक्त्रो वैमललिङ्गिनाम्।
प्रमाणलिङ्गिनां चैव सद्यस्तापसलिङ्गिनाम्॥ ७:२७॥

श्वेतरक्तपटानाञ्च वामदेवः प्रभुः स्मृतः।
अन्येषां लिङ्गिनाञ्चैव तथा च गृहलिङ्गिनाम्॥ ७:२८॥

कपाललिङ्गिनो ये तु अभोज्यास्ते प्रकीर्तिताः।
तेषां प्रमादतो भुक्त्वा पुनर्दीक्षान्तु कारयेत्॥ ७:२९॥

लिङ्गोद्धारं ततः कृत्वा कुर्याद्दीक्षां स्वयं बुधः।
यो यस्यैव तु लिङ्गस्य ईश्वरः परिकीर्तितः॥ ७:३०॥

तेन लिङ्गसमुद्धारो निक्षेपोत्क्षेपकर्मणा।
जातीश्वरस्य यद्यस्य मण्डलं परिकीर्तितम्॥ ७:३१॥

तदेव मण्डलं कुर्यान्मन्त्री लिङ्गेश्वरस्य तु। (f. 14r)
आसनं न्यासमात्रन्तु ख्यातं जातीशमण्डले॥ ७:३२॥

आसनस्य बहिर्न्यासः प्रोच्यते तस्य चाधुना।

अन्तर्न्यासोऽप्यभेदेन प्रोक्तो भेदात्तु कथ्यते॥ ७ : ३३॥

ब्रह्मभिश्च तथाङ्गैश्च अन्तर्न्यासो व्यवस्थितः।
बहिर्मूर्तिधरैर्न्यासः सर्वेषान्तु यथोदितैः॥ ७ : ३४॥

स्वैः स्वैर्मूर्तिधरैः कार्यो मध्येऽङ्गैर्ब्रह्मभिस्तथा।
ईशानशिरसः सर्वे सर्व्वे तत्पुरुषाननाः॥ ७ : ३५॥

अघोरहृदयास्सर्व्वे वामगुह्याः प्रकीर्तिताः।
अजातमूर्तयस्सर्वे ब्रह्ममन्त्राः प्रकीर्तिताः॥ ७ : ३६॥

उपब्रह्माणि सर्वेषां ब्रह्माणि परिकल्पयेत्।
शिववच्चोपचारस्तु कार्यस्त्वावाहनादिकः॥ ७ : ३७॥

पूजावसायां सर्वेषां सद्योजातादिभिः क्रमात्।
शैवस्यान्नन्न भोक्तव्यमविज्ञाय तु गोचरम्॥ ७ : ३८॥

शिवाङ्कं नाम येषान्तु शुद्धशैवास्तु ते स्मृताः। (f. 14v)
कौमाराः शुद्धशैवास्तु शुद्धाधिकरणोद्भवाः॥ ७ : ३९॥

न तेषान्नाममात्रेण शुद्धशैवन्तदुच्यते।
धर्मसंवदनार्थाय स्थितिराचारसंस्थिताः॥ ७ : ४०॥

पुनर्भवास्ते कथिताः शैवास्तु शिवशासने।
स्वयंगृहीतलिङ्गा ये तेऽपि स्वायंभुवाः स्मृताः॥ ७ : ४१॥

न गुरुर्न्नागमस्तेषां न संस्काराः शिवात्मकाः।
कलेर्युगस्य शेषान्ते भविष्यन्ति नराधमाः॥ ७ : ४२॥

स्वयमूह्यागमं शैवं पुस्तकं दस्युभिर्हृतम्।
स्वतन्त्रस्थितिसंखिन्ना ये कलौ अन्यलिङ्गिनः॥ ७ : ४३॥

आश्रयन्ति शिवं ज्ञानं स्वोद्भवास्ते स्वयंभुवाः।
कृत्वोपसदनं ये तु शैवाचार्यस्य कस्यचित्॥ ७ : ४४॥

भवन्ति स्वागमाभिज्ञा विज्ञेयास्ते पुनर्भवाः।
स्वायंभुवो ये कथिता द्विधा तु समवस्थिताः॥ ७ : ४५॥

न तेषां भोज्यमन्नन्तु भुक्त्वा शुद्धिस्तु पूर्व्ववत्। (f. 15r)
द्वावेवाश्रमिणौ शैवौ ब्रह्मचारी गृही तथा॥ ७:४६॥

परानुग्रहकर्तारौ परिव्राट्तापसौ न हि।
द्विविधो ब्रह्मचारी तु भौतिको नैष्ठिकस्तथा॥ ७:४७॥

नैष्ठिकोऽपि न भोज्यस्तु यस्यस्यात्स्त्रीपरिग्रहः।
परिव्राट्तापसौ यौ तु परानुग्रहकारकौ॥ ७:४८॥

शैवस्य तावभोज्यान्नौ भुक्त्वा शुद्धिस्तु पूर्ववत्।
ब्रह्मचारी गृहस्थस्तु द्वावेवाश्रमिणौ गुरुः॥ ७:४९॥

कौमारौ शुद्धशैवौ तौ शुद्धस्तद्गोचरः स्मृतः।
एवं विदित्वा मतिमान्भोज्याभोज्यपरिग्रहम्॥ ७:५०॥

द्वाभ्यामन्नं च भुञ्जीत न द्वयोस्तु कथञ्चन।
निःस्नेहगन्धलेपार्थं सोपस्नानेन वारिणा॥ ७:५१॥

हेमरौप्यमयानान्तु लोहानाञ्च विशोधनम्।
शुद्ध्यत्यम्लेन ताम्रन्तु भस्मना कांस्यमेव च॥ ७:५२॥

वेणुतुम्ब्वादिपात्रन्तु गोवालैर्वारिघर्षणात्। (f. 15v)
वारिणाशुद्धिमायाति भिक्षापात्रन्तु पार्थिवम्॥ ७:५३॥

विशुद्ध्यत्ययसाघृष्टं दारवं वारिशोधनात्।
शंखस्य शुक्तेर्भाण्डस्य क्षालनं मथितेन तु॥ ७:५४॥

गोधूमस्य तुषैश्चैव कार्यमुद्घर्षणन्ततः।
शुद्धिः क्षारेण वस्त्राणां वारिणा परिकीर्तिता॥ ७:५५॥

चैलानां चर्मणां शुद्धिर्वैदलानां तथैव च।
भुक्तव्यञ्जनभाण्डानां शुद्धिः सलिलशोधनात्॥ ७:५६॥

नित्यं चोदकभाण्डानाम्पर्यग्निकरणात्तथा।
पात्रं कीटाखुमार्जारैरालीढन्तु विशुद्ध्यति॥ ७:५७॥

7:47 भौतिको] *em.*; भौक्तिको C **7:52** कांस्य॰] *em.*; कांश्य॰ C **7:55** वस्त्राणां] *conj.*; वस्त्राणा C **7:56** चैलानां चर्मणां] *conj.*; चैवच्चर्मणां C **7:56** सलिलशोधनात्] *conj.*; शलिलशौचनात् C

सप्तशस्ता परिशुद्ध्या पर्यग्निकरणादपि।
श्वखरोष्ट्रादिभिर्घ्रातमवलीढञ्च सन्त्यजेत्॥ ७ : ५८॥

गोरूपाघ्रातकं पात्रं संपरित्याज्यमेव हि।
नकुलैरवलीढन्तु यत्पात्रं घ्रातमेव वा॥ ७ : ५९॥

सप्तशश्चाद्भिर्निर्णिक्तमग्निना शुद्धिमेव हि। (f. 16r)
प्रणीतादर्विपूर्वाणि शुद्धिर्नायान्ति भाण्डवत्॥ ७ : ६०॥

प्रभूतमन्नं काकाद्यैर्जुष्टन्तन्मात्रवर्जनात्।
उच्छिष्टस्य तु संस्पर्शादन्नदोषं विधाय तु॥ ७ : ६१॥

आचम्यान्नादिकम्प्रोक्ष्य शुद्धं परिविशेत्पुनः।
स्निग्धानां रूक्षणाच्छुद्धिः सलेपानामलेपतः॥ ७ : ६२॥

गन्धापनयनाच्छुद्धिर्दुर्गन्धीनाम्प्रकीर्तिता।
आसनं शयनं यानं शुद्धिमेतिमृदम्भसा॥ ७ : ६३॥

स्त्रियश्च सर्वतः शुद्धाः शकुनिः फलपातनात्।
वाणी शुद्ध्यति सत्येन नदी वेगेन शुद्ध्यति॥ ७ : ६४॥

रजसा स्त्री मनोदुष्टा मनोदौष्ट्यान्निवर्तनात्।
यथोदितेन शौचेन सर्व्वमेतद्विशुध्यति॥ ७ : ६५॥

॥ इति पुष्करपारमेश्वरेमहातन्त्रे सामान्यप्रकरणे भोजनोत्तरफलम्॥

परमेश्वर उवाच—

ब्रह्मन्भोजनपात्राणां शुद्धिं श्रुणु समासतः। (f. 16v)
द्रव्याणाञ्च तथान्येषाम्विधिस्थानां तु मन्त्रिणां॥ ८ : १॥

सर्वेषामपिपात्राणामौपलानाञ्च शौचनम्।
अविरुद्धञ्च यत्किञ्चिद्विरुद्धमविरोधतः॥ ८ : २॥

निर्माल्यं सद्यः संस्पृष्टं त्यागात्संशुद्धिमेति हि।

7:60 °निर्णिक्त°] *conj.*; °निर्न्निक्त° C **7:60** प्रणीतादर्विपूर्वाणि] *conj.*; प्रणीतादार्व्वीपूर्वाणि C **8:2** °मौपलानाञ्च] *em.*; °मौपलाञ्च C

अमेध्योपहतानान्तु शुद्धिन्त्यागादुदाहृता॥ ८:३॥

रेतोमूत्रपुरीषाणामुपघ्रातान्परित्यजेत्।
श्लेष्मणोपहतं यच्च सिक्तं निःस्नेहनेन तु॥ ८:४॥

रक्तपूयवसाद्यैश्च स्नानतः शुद्धिरिष्यते।
अग्नेः संस्कारतः शुद्धिर्मन्त्रा ह्याहुतियोगतः॥ ८:५॥

त्रिःपरिष्कृतवस्त्रेण शुद्धिर्भवतिचाम्भसाम्।
चेलवद्रज्जुजातीनां शुद्धिः शास्त्रे प्रभाषिता॥ ८:६॥

तक्षणाद्दहनात्सेकान्मार्ज्जनाल्लेपदाङ्गुवः।
आगराः शुचयः सर्वे सर्वं भृत्यगतं शुचिः॥ ८:७॥

अदुष्टमद्भिर्न्निर्णिक्तं यच्चवाचा प्रशस्यते। (f. 17r)
विशुद्धमपि शोध्यन्तु प्रोक्तानुक्रमशेषतः॥ ८:८॥

निवेदनात्तु देवाय गुरवे च प्रयत्नतः॥ ८:९॥

॥ इति पुष्करपारमेश्वरे महातन्त्रे सामान्यप्रकरणे पात्रशुद्धिपटलम्॥

ज्ञेयमानोऽप्यघोरेण सविकार्ये च पावकः।
तदा पापात्मको दोषो यजमानसमुद्भवः॥ ९:१॥

ब्रह्महत्यादिकं पापं सद्योजातेन नाशयेत्।
सुरापानकृतं वामः प्रणाशयति पातकम्॥ ९:२॥

सुवर्णस्तेयजं पापं बहुरूपः प्रमार्जयेत्।
गुर्व्वङ्गनागमम्पापं पुरुषो निर्द्दहेत् क्षणात्॥ ९:३॥

समस्तव्यस्तसम्पर्कात्संभवं पातकम्महत्।
सदा आज्यस्य होमेन तदीशेन प्रमार्जयेत्॥ ९:४॥

जृम्भाक्षुत्ष्ठीवकासादीन्दूरे कुर्याद्गुरोः सदा।

8:4 सिक्तं निःस्नेहनेन] *conj.*; सिक्तन्निःसिंहनेन C 8:8 °र्न्निर्णिक्तं] *em.*; °र्न्निर्निक्तं C 9:1 ज्ञेय°] *conj.*; ज्ञय° C 9:5 जृम्भाक्षुत्] *conj.*; जृम्भाक्षु˙ C 9:5 दूरे] *conj.*; हरेत् C

प्रमादादन्यथा कृत्वा वामदेवशतं जपेत्॥ ९ :५॥ (f. 17v)

निःसिंहनेन तु करो लिप्तमङ्गन्तु वारिणा।
शोधयेच्च मृदा चैव सकृत्त्रिश्चाधरोत्तरं॥ ९ :६॥

अमेध्योपहतं देहं मृद्भिः शुध्यति सप्तभिः।
उत्तमाङ्गोपघाते च वारिणा स्नानमाचरेत्॥ ९ :७॥

श्वप्रभृतीनाम्विट्लेपात्काकादीनाञ्च पक्षिणां।
मृदा कृत्वा तु तच्छौचमधमाङ्गे विशुद्ध्यति॥ ९ :८॥

उत्तमाङ्गे तु सर्वत्र स्नानमेव हि वारिणा।
प्रायश्चित्तजपं कुर्याद्गायत्र्यष्टशतं बुधः॥ ९ :९॥

उच्छिष्टस्य तु विट्लेपात्कृतशौचो यथाविधि।
स्नात्वा «तु» शुद्धिमायाति श्रिया दशगुणाच्छतात्॥ ९ :१०॥

सूत्रोचारे कृते मन्त्री वारुणं स्नानमाचरेत्।
भस्मस्नानं यतिः कुर्यान्मन्त्रस्नानं गृही सदा॥ ९ :११॥

दिवाकरकरैर्युक्तं दिवास्नानं प्रशस्यते।
अप्रशस्तञ्च तद्रात्रौ राहोरन्यत्र वर्ज्जनात्॥ ९ :१२॥ (f. 18r)

अक्षमालां कराङ्गृष्टां क्षालयेद्गन्धवारिणा।
गायत्र्या तु शतं जाप्यं विधिस्थः कारयेत्सदा॥ ९ :१३॥

सहस्रमन्त्यजस्पर्शात् सूत्रच्छेदे भवेत्तथा।
जीर्णसूत्रस्य संच्छेदे गायत्र्याष्टशतञ्जपेत्॥ ९ :१४॥

प्रमादात् श्लेष्मणा सिक्तां मन्त्री निःसिंहनेन वा।
अमेध्यभूगतां वापि अक्षमालां परित्यजेत्॥ ९ :१५॥

अदीक्षितेनाक्षमाला न स्प्रष्टव्या कदाचन।
तथान्यमन्त्रिणाच्चैव प्रायश्चित्तं शतं श्रियः॥ ९ :१६॥

अन्यमन्त्रजपाच्छुद्धिः पुनःसंस्कारकर्मणा।

9:13 अक्षमालां कराङ्गृष्टां] *em.*; अक्षमाला कराङ्गृष्टा C **9:15** प्रमादात्] *conj.*; प्रमादा° C **9:15** °गतां] *conj.*; °गता C **9:17** संस्कार°] *em.*; सस्कार° C

अत्यन्तोपहता यास्तु शुद्धिस्त्यागात्प्रकीर्तिता॥ ९:१७॥

॥ इति पुष्करपारमेश्वरे महातन्त्रे सामान्यप्रकरणे प्रायश्चित्तपटलं समाप्तमिति॥

॥ अथ स्वायम्भुवे सूत्रसङ्ग्रहे प्रायश्चित्तं लिख्यते॥

अथाचार्यव्रतं श्रेष्ठं चरेदाचार्य एव हि। (f. 18v)
सद्यादिशक्तिपर्यन्तामभ्यसेन्मन्त्रसंहिताम्॥ १०:१॥

पक्षत्रयमधःशायी नक्ताशी चरुभुक्सदा।
मौनी त्रिषवणस्नायी द्वन्द्वादुद्विग्नसंयमी॥ १०:२॥

शुक्लाम्बरधरो नित्यं शुक्लमाल्यानुलेपनः।
योगपट्टाक्षसूत्री च मुञ्जाजिनपवित्रधृक्॥ १०:३॥

होमं प्रतिदिनं कुर्यात्जपान्ते शक्तितः क्रमात्।
घृतेन वा घृताक्तैर्वा तिलैः क्षीरेण तण्डुलैः॥ १०:४॥

व्रीहिभिर्वा समिद्भिर्वा दध्ना वापि यवैस्तथा।
श्रीफलैर्बिल्वपत्रैर्वा पुष्पैर्वा याज्ञिकैः शुभैः॥ १०:५॥

ततो व्रतसमाप्तौ तु पूर्वोक्तं मण्डलं यजेत्।
व्रतग्रहणकाले च देशिकः साधकस्तथा॥ १०:६॥

अभिषिच्यात्मनात्मानमनन्तविजये ततः।
चरेत् मन्त्रव्रतं मन्त्री साध्यमन्त्रोक्तवर्त्मना॥ १०:७॥

पारियात्रे महेन्द्रे वा सह्ये वा मलये तथा। (f. 19r)
मन्त्री देवगिरौ वापि विन्ध्ये वा शुक्तिमत्यपि॥ १०:८॥

गङ्गातटे समुद्रे वा श्रीशैले ऋष्यपर्वते।
अर्बुदे निम्नगायाम्वा योदधौ संगतः स्वयम्॥ १०:९॥

---

[1] This corresponds to chapter 21 of the *Svāyambhuvasūtrasaṅgraha-Prāyaścitta-paṭala.*

10:1 ॰संहिताम्] *conj.*; ॰सहितां C 10:2 चरुभुक्] *em.*; चरुभुत् C 10:3 मुञ्जाजिन॰] *em.*; मुञ्जोजिन॰ C 10:9 ऋष्यपर्वते] *em.*; ऋक्ष्यपर्वते C 10:9 संगतः स्वयम्] *conj.*; संगतास्वयम् C

पुष्पपत्रफलोपेतम्मृत्कुशोपचितं शुभं।
प्राच्योदकसमित्स्फीतन्निःशब्दं स्थानमाश्रयेत्॥ १०:१०॥

तस्मिन्स्थितः प्रसन्नात्मा कायशुद्धिं समाचरेत्।
कृच्छ्रचान्द्रायणाद्यैर्वा शाकाद्यैर्वा प्रचोदितैः॥ १०:११॥

प्राणवृत्तिनिरोधेन प्रणवन्तु समभ्यसेत्।
सहस्राणां शतं पूर्णं षण्मासात्कृतनिश्चयः॥ १०:१२॥

शुद्धकायः सुनक्षत्रे निमित्तोपचिते दिने।
संपूज्य देवदेवेशं कुर्याल्लिङ्गपरिग्रहम्॥ १०:१३॥

स्थापितं ऋषिभिः पूर्वं सर्वलक्षणलक्षितम्।
आश्रयेत्सिद्धिदं लिङ्गं स्वयं वा परिकल्पितम्॥ १०:१४॥

कीलितं वर्जयेद्विद्वान्स्कन्दविष्णिवन्द्रमातृभिः। (f. 19v)
उपर्युपरि लिङ्गञ्च मुखलिङ्गन्तथैव च॥ १०:१५॥

अथवा लक्षणैर्युक्तं स्थण्डिलं परिकल्पयेत्।
स्थण्डिलेऽपि हि मन्त्राणां सिद्धिराशु प्रवर्त्त[ते]। १०:१६॥

श्रेष्ठम्पञ्चमुखं लिङ्गमभावात्प्राङ्मुखं स्मृतम्।
याम्यकौबेरवक्त्रन्तु न सिद्धाविष्यते बुधैः॥ १०:१७॥

परिगृह्येप्सितं लिङ्गं लिङ्गकल्पोदितं शुभम्।
पूजयेत्सततं मन्त्री मत्वा देहमशाश्वतम्॥ १०:१८॥

तोयबुद्बुदसाधर्म्यं दिव्यैश्वर्यविवर्जितम्।
सर्वदुःखाश्रयं पुंसामिति बुद्ध्वा समं व्रजेत्॥ १०:१९॥

गजवाजिरथस्त्रीणान्न स्पृहेत कदाचन।
छायाक्रीडनसारूप्याः क्षणिका बन्धहेतवः॥ १०:२०॥

एतद्रूपमधर्मस्य यः स्पृशेत्साधकः स्त्रियं।
तस्माद्धि तं मनौ स्थाप्य चरेद्यत्तद्धि चोदितम्॥ १०:२१॥

यद्याकृष्येत विषयैर्नागगन्धर्वयक्षिणी। (f. 20r)

10:19 °दुःखा°] *em.*; °दुखा° C **10:22** °यक्षिणी] *conj.*; °यक्षिनी C

मन्त्रैराकृष्य भुञ्जीत न तु स्त्रीमबलां स्पृशेत्॥ १०:२२॥

ताभिः सह रमेत्तावद्विषयैर्यदि पीडितः।
देहपातो भवेद्यावत्ततो निर्वाणमृच्छति॥ १०:२३॥

वेदादिषु प्रसङ्गेषु नृत्याद्येष्वपरेष्वपि।
स्वल्पामपि मतिम्मन्त्री न कुर्यादौपसर्गिकीम्॥ १०:२४॥

प्रादुर्भवन्ति सिद्धस्य सर्वेऽर्थाः विमलाः स्वयम्।
तस्मात्सर्वं परित्यज्य मन्त्रसिद्धिपरो भवेत्॥ १०:२५॥

सर्वासां मन्त्रसिद्धीनां मूलं विद्यांगपञ्चकम्।
अतस्तमभ्यसेदादौ कल्पोक्तेन क्रमेण तु॥ १०:२६॥

अयुतानि दशैकैकं विधिशास्त्रोक्तवर्त्मना।
जप्त्वा व्रतैश्च विधिवत्स्नातः सिद्धौ जपेत् मनुम्॥ १०:२७॥

न विलम्बितमस्पष्टन्न चास्वीकृतमद्रुतम्।
नासंख्यं न मनोभ्रान्तं जपं कुर्याद्विचक्षणः॥ १०:२८॥

सितवासा सितोष्णीषी सितयज्ञोपवीत्यपि। (f. 20v)
सितानुलेपनः स्रग्मी चरेद्विद्याधिपं व्रतम्॥ १०:२९॥

रक्ताम्बरधरो मन्त्री रक्तमाल्यानुलेपनः।
मासमेकम्पुरोक्तञ्च चरेद्ब्रह्मशिरोव्रतम्॥ १०:३०॥

पीतवासाश्चरेन्मासं पीतमाल्यानुलेपनः।
पीतयज्ञोपवीती च रुद्राण्या व्रतमुत्तमम्॥ १०:३१॥

व्रतं पुरुहूतस्यापि मासमेकं चरेद्बुधः।
सर्वकृष्णोपचारेण शिवार्चनरतः सदा॥ १०:३२॥

चित्राम्बरधरो धीरश्चित्रमाल्यानुलेपनः।
सर्वसिद्धिपरो मन्त्री चरेत्पाशुपतं व्रतम्॥ १०:३३॥

10:22 स्त्रीमबलां] *conj.*; स्त्रीसवलां C **10:23** °णमृच्छति] *conj.*; °णमर्च्छति C **10:29** सितवासा सितोष्णीषी सित°] *em.*; शितवासा शितोष्णीषी शित° C **10:29** सिता°] *em.*; शिता° C **10:31** पीतवासाश्चरेन्मासं] *em.*; पीतवासा चरेत्मासं C **10:31** रुद्राण्या] C^{ac}; रुद्राणी° C^{pc}

व्रतव्रतं समाप्तौ तु कलशेन शिवाम्भसा।
स्वमन्त्रपरिजप्तेन स्वात्मानमभिषेचयेत्॥ १०:३४॥

एवं विद्याव्रतस्नातः सर्वत्राविकृतोऽनघः।
जपेन्मन्त्रमनुद्विग्नः स्वकल्पविधिना ततः॥ १०:३५॥

संयम्य चेन्द्रियग्राममलुप्तनियमः सदा। (f. 21r)
लोपे वा संयमे कार्यम्व्युत्क्रमः श्रुतिचोदितः॥ १०:३६॥

न निन्द्याद्ब्राह्मणं गावो न निन्द्याच्छिवमूर्तयः।
न देवान्न ऋषींश्चैव न गणान्न च मातरः॥ १०:३७॥

एषामेकतमस्यापि यदि निन्दां समाचरेत्।
स्नात्वा सर्वात्मना कुर्यात्प्राणायामद्विरष्टकं॥ १०:३८॥

रेतोत्सर्ग्गे निशायान्तु षडूनमिदमेव हि।
दिवाप्यर्द्धे तु पूर्व्वोक्तमघोरेण चरेद्व्रतम्॥ १०:३९॥

सङ्गम्य योषितं मन्त्री प्रणवस्य महात्मनः।
प्राणवृत्तिनिरोधेन लक्षमावृत्त्य शुध्यति॥ १०:४०॥

विद्याव्रतमतिक्रान्तो निरारब्धव्रतस्तथा।
सहस्रं पूर्ववत्सम्यगाचार्यस्त्रिगुणं हि तम्॥ १०:४१॥

अननुज्ञातमन्त्रस्तु न कुर्यान्मातृकं विधिम्।
कृत्वा मोहाज्जपेत्सद्यमेकाहं षड्गुरन्यथा॥ १०:४२॥

कुशशय्यासनो मौनी कुशस्नायी कुशाम्बुपः। (f. 21v)
कुशभृन्मेध्यभुग्मन्त्री चरेद्विध्युदितम्व्रतम्॥ १०:४३॥

निर्माल्यसङ्करं मोहात् कुर्याद्ब्रह्मजपं क्रमात्।
शतिकन्त्रिगुणं कामात्पञ्चगव्यमुपोषितः॥ १०:४४॥

एतदेव व्रतङ्कुर्याद्द्विगुणं केवलं सुधीः।
ज्ञानिनोऽनन्तयागेन पदशुद्ध्या च शुद्ध्यति॥ १०:४५॥

इतरेषां तु सर्वेषां समयानाम्व्यतिक्रमे।

10:44 °सङ्करं] *conj.*; °शङ्करो C

जपेदेकादशात्मानममन्योपोषितस्त्र्यहम्॥ १०:४६॥

कृत्वा कृच्छ्रमतीन्दोर्व्वा गतिपिण्डव्रतञ्चरेत्।
महापातकिनाञ्चैव बुद्धातिक्रममादिशेत्॥ १०:४७॥

सर्वेषामेव पापानां परा निष्कृतिरुच्यते।
एकादशात्मनो व्यस्तः समस्तो वा विधौ जपः॥ १०:४८॥

आचार्योक्तं वचस्तथ्यं कुर्यात्तदविचारितम्।
तस्मात्सर्वमवाप्नोति परे लोकैहिकं फलम्॥ १०:४९॥

सकृज्जपात्समारभ्यः शिवस्यैकादशात्मनः। (f. 22r)
लक्षं यावत्परा निष्ठा प्रोक्ता पापकृतामिह॥ १०:५०॥

तस्माद्व्यतिक्रमं ज्ञात्वा प्रायश्चित्तं चरेद्बुधः।
मन्त्रसिद्ध्युपभोगार्थं लोकसम्वृतिमात्रतः॥ १०:५१॥

नित्यं सन्ध्यामुपासीत लोपे चोपवसेद्दिनम्।
निरुजः सरुजश्चान्ते सद्योजातशतं जपेत्॥ १०:५२॥

देशिकश्चाह्निकच्छेदे त्रिगुणं तु तदेव हि।
कृत्वा स्वात्मवशो वान्यः प्रागुक्तं च शिवं जपेत्॥ १०:५३॥

बहुदैवसिके भ्रंशे षड्गुणं यदुदीरितम्।
होमः साहस्रिको वास्याद्बहुभिः शतिकोऽपि वा॥ १०:५४॥

उपवासस्तथा स्नानं पञ्चगव्याशनं जपः।
होमञ्चैव मलं हन्ति सर्व्वसङ्करजं नृणाम्॥ १०:५५॥

॥ इति स्वायम्भुवे सूत्रसंग्रहे प्रायश्चित्तपटलं समाप्तम्॥

॥ शिवधर्मोत्तरे प्रायश्चित्तं लिख्यते॥ (f. 22v)

अथ पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत्।

---

1. This corresponds to chapter 11 of the *Śivadharmottara*, which appears on pp. 277–82 of Naraharināth's edition.

10:52 °पासीत] *em.*; °पाशीत C   10:55 °शनं] *em.*; °सनं C   10:55 °सङ्करजं] *em.*; °शङ्करजं C

कृत्वा शौचं तथा स्नानं शिवाग्निगुरुपूजनम्॥ ११ : १॥

उत्थाय पश्चिमे यामे प्रगृहीतकमण्डलुः।
धौतपादुकमाक्रम्य मूत्रं कुर्याद्यथागमम्॥ ११ : २॥

दक्षो विनीतस्तत्त्वज्ञो जलदानविधानवित्।
सहायः शौचकार्येषु तदभावे कमण्डलुः॥ ११ : ३॥

वाचं नियम्य यत्नेन छीवनोत्काशवर्ज्जितः।
शिरःप्रावृत्य कुर्वीत अन्तर्धाय तृणैर्महीम्॥ ११ : ४॥

दिवा सन्ध्या सुकर्णस्थो ब्रह्मसूत्री ह्युदङ्मुखः।
कुर्यात्मूत्रपुरीषञ्च रात्रौ चेद्दक्षिणामुखः॥ ११ : ५॥

मार्जनं वामहस्तेन वीरणाद्यैरयाज्ञिकैः।
न विण्मूत्रं निरीक्ष्येत छायामात्मन एव वा॥ ११ : ६॥

नानिलानलदेवानां गोब्राह्मणजलम्प्रति।
जन्तुशाड्वलभस्मास्थि वृक्षच्छायां विवर्ज्जयेत्॥ ११ : ७॥ (f. 23r)

पादावसेचनं मूत्रं पुरीषं छीवनञ्च यत्।
दूरादायतनात्सर्व्वं यच्चान्यद्विकृतं भवेत्॥ ११ : ८॥

गृहीतशिश्नश्चोत्थाय समायुक्तकमण्डलुः।
शौचं कुर्यात्मृदम्भोभिर्गन्धलेपापनुत्तये॥ ११ : ९॥

तिस्रो लिङ्गे मृदा योज्यास्त्वेकैकान्तरमृत्तिकाः।
आमलीफलमात्राश्च पञ्च वामकरे तथा॥ ११ : १०॥

मृदस्तिस्रः समाख्याता मूत्रोत्सर्गे भवेच्छुचिः।
पञ्चापाने मृदा योज्याः सतिस्रोऽन्तरमृत्तिकाः॥ ११ : ११॥

दश वामकरे चैव सप्त पाण्योस्तथा द्वयोः।
उपस्पर्शनकाले तु तिस्रो दद्यात्तु हस्तयोः॥ ११ : १२॥

तिस्र एव तथा योज्या जंघाशौचे तु मृत्तिकाः।

11:9 °म्भोभिर्ग°] *em.*; °म्भोभिग° C 11:11 पञ्चापाने] *conj.*; पञ्चोपाने C

अक्षिणी नाशिका कर्णौ त्रिभिः संशोध्य हस्तयोः॥ ११ :१३ ॥ (f. 23v)

कर्दमामेध्यमूत्रैस्तु दिग्धाङ्गे पञ्च सप्तधा।
क्षालिते वारिणा पूर्वं सतिस्रोऽन्तरमृत्तिकाः॥ ११ :१४ ॥

आमणिबन्धाच्च करौ मृत्तोयैस्तु विशोधयेत्।
अन्तःकृत्वा भुजौ सम्यग्बहिर्जानू निधाय च॥ ११ :१५ ॥

उद्धृताभिरनुष्णाभिः पूताभिर्वस्त्रचक्षुषा।
हृद्गमाभिरयोनाभिस्त्रिचतुर्वा समाचरेत्॥ ११ :१६ ॥

परिमृज्य द्विरास्यञ्च द्वादशाङ्गानि चालभेत्।
तूष्णीमेव ततो भूयः शिवमन्त्रेण पूर्ववत्॥ ११ :१७ ॥

आचमेद्ब्रह्मतीर्थेन ब्रह्मचारी ह्युदङ्मुखः।
तदन्तरान्तरैः पाणिमालोड्याप्लाव्य चाम्भसा॥ ११ :१८ ॥

वस्त्रशौचम्प्रवक्ष्यामि तच्छुद्धौ शुध्यते यतः।
वस्त्रशौचविहीनोऽसौ शुचिरप्यशुचिर्भवेत्॥ ११ :१९ ॥

देवकार्याय योग्यानां प्रत्यहं शौचमिष्यते। (f. 24r)
वाससामितरेषान्तु कार्यशौचं मलागमे॥ ११ :२० ॥

शुचिना तोरणं कृत्वा वंशदण्डत्रयेण तु।
तत्र वासांसि निर्णिज्य सम्यग्बध्वा विशोषयेत्॥ ११ :२१ ॥

खगैर्वा दूषिते वृक्षे निर्मले वा शिलातले।
दूर्व्वाजाले शुचौ वापि क्षालितेषु तृणेषु वा॥ ११ :२२ ॥

विण्मूत्ररेतोदिग्धानां मृत्तोयेन विशोधनम्।
कार्यमादौ ततः क्षारैर्गोमूत्राद्यैश्च शोधनम्॥ ११ :२३ ॥

मृद्वारि तावदादेयं गन्धलेपादुभावपि।
न स्यातान्तत्कृतौ यावत्सर्व्वासु द्रव्यशुद्धिषु॥ ११ :२४ ॥

कौशेयाविकयो रूक्षैः क्षौमाणां गौरसर्षपैः।

11:15 अन्तः॰] *conj.*; ---न्तः॰ C **11:21** निर्णिज्य] *em.*; निर्न्निज्य C **11:21** विशोषयेत्] *conj.*; विशोधयेत् C

श्रीफलैरंशुपट्टानां कु«तपा»नामरिष्टकैः॥ ११ : २५ ॥

चैलवद्रज्जुनेत्राणां पक्षचामरचर्मणाम्।
वल्कलानां च सर्वेषां शुद्धिः कार्या विजानता॥ ११ : २६ ॥

वैदलालावु«दारू»णां वस्त्रवच्छुद्धिरिष्यते। (f. 24v)
गोवालैर्घर्षणञ्चैषाम्विशेषः परिकीर्तितः॥ ११ : २७ ॥

कांस्यायस्ताम्रपात्राणां त्रपुःसीसकयोरपि।
शुद्धिः शौचार्थिना कार्या भस्मक्षाराम्लवारिभिः॥ ११ : २८ ॥

निर्लेपं काञ्चनं रौप्यमद्भिः पात्रं विशुद्ध्यति।
मण्यश्मशङ्खशुक्तीनां शौचं तैजसवत्स्मृतम्॥ ११ : २९ ॥

रजस्वलासूतिकाद्यैर्मूत्राद्यैश्चातिदूषितम्।
अग्नेरपाञ्च संयोगात्तैजसं शुद्धिमाप्नुयात्॥ ११ : ३० ॥

शूद्रोच्छिष्टस्य पात्रस्य त्रिष्कृत्वा परिमार्जनम्।
शौचन्तु पूतकामेन कर्तव्यन्तैजसस्य तु॥ ११ : ३१ ॥

द्रव्याणामिह सर्वेषां शुद्धिरुत्प्लवनं स्मृतम्।
पलालतृणकाष्ठानां प्रोक्षणाच्छुद्धिरिष्यते॥ ११ : ३२ ॥

स्रुवादिचरुपात्राणां मुशलोलूखलस्य च।
शूर्पगोरसभाण्डानां शुद्धिरुष्णेन वारिणा॥ ११ : ३३ ॥(f. 25r)

श्रुङ्गास्थिदारुदन्तानान्तत्क्षणैः परिशोधयेत्।
अत्यन्तोपहतानान्तु गोमूत्रेणोदकेन तु॥ ११ : ३४ ॥

संहतानाञ्च द्रव्याणां प्रोक्षणात् शुद्धिरिष्यते।
असंहतद्रव्यशौचं कार्यं प्रत्यात्मिकं सदा॥ ११ : ३५ ॥

भक्तिधान्यादिराशीनामेकदेशस्य दूषणे।

11:27 °र्घर्षणञ्चैषाम्] *conj.* (cf. *Yājñavalkyasmṛti* 3:60); °र्घणञ्चैषाम् C (unmetrical) 11:28 कांस्या°] *em.*; कांश्या° C 11:28 °सीसक°] *em.*; °षीसक° C 11:28 शौचार्थिना] *conj.*; —चार्थिना 11:29 मण्यश्म°] *em.*; मण्यस्म° C 11:30 संयोगात्] *em.*; संयोगोत् C 11:32 पलाल°] *em.*; पालाल° C 11:33 स्रुवा°] *em.*; श्रुवा° C 11:33 शूर्प°] *em.*; सूर्प° C 11:35 प्रोक्षणात्] *em.*; प्रोक्षणा° C

तावन्मात्रं समुद्धृत्य शेषः प्रोक्षणमर्हति॥ ११ : ३६ ॥

अम्भसाल्पीयसा कार्यं मृदाचैव विशोधनम्।
शाकमूलफलाद्यानां धान्यवच्छुद्धिरिष्यते॥ ११ : ३७ ॥

गोलीढमक्षिकालीढकृमिसंस्पर्शनेषु च।
छागावलेहनाच्छुद्धिरन्नस्याद्भिश्च प्रोक्षणात्॥ ११ : ३८ ॥

खरोष्ट्राश्वसृगालाद्यैर्विड्वराहावलेहनैः।
तन्मात्रमन्नमुद्धृत्य शेषं संस्कारयेद्बुधः॥ ११ : ३९ ॥

दीप्तोल्मुकेन संस्पृश्य त्रिश्छागाघ्रातमेव च। (f. 25v)
सुवर्णतोयसंस्पृष्टाः शुद्ध्यत्येवं न संशयः॥ ११ : ४० ॥

मक्षिकाकेशतन्मिश्रं पटान्तोपहतञ्च यत्।
रजःपिपीलिकायुक्तं भुञ्जानोऽन्नमवेक्षितम्॥ ११ : ४१ ॥

तावन्मात्रं समुद्धृत्य प्रोक्षयेदम्भसा ततः।
आज्याभिघारणाच्छुद्धिः भस्मक्षेपेण वा भवेत्॥ ११ : ४२ ॥

भूमिस्थमुदकं पूतं वितृष्णा यत्र गौर्भवेत्।
न प्राप्तं यद्यमेध्येन वर्णगन्धरसान्वितम्॥ ११ : ४३ ॥

न मुखाद्विप्रुषोच्छिष्टाः कूर्पराङ्गन्तु ये गताः।
न श्मश्रुगता नास्यञ्च न दन्तान्तरसंस्थिताः॥ ११ : ४४ ॥

पादौ स्पृशंति ये चान्ये पराचमनविन्दवः।
ते पार्थिवैः समाज्ञेया न तैरप्रयतो भवेत्॥ ११ : ४५ ॥

कृत्वा भुक्त्वा च सुस्वा च पीत्वाभ्यस्याधमैः सह।
ष्ठीवित्वाप्ययनादौ च प्रयतोप्याचमेत्पुनः॥ ११ : ४६ ॥ (f. 26r)

द्रव्यहस्तः समुच्छिष्टः सन्निधायाद्भिराचमेत्।
द्रव्यशुद्धिश्च पूर्वोक्ता कार्या द्रव्यानुरूपतः॥ ११ : ४७ ॥

गोसकृत्मूत्रवल्मीकमृत्तिकाभस्मवारिभिः।

11:39 तन्मात्र°] *em.*; तत्मात्र° C 11:42 °भिघारणा°] *em.*; °भिघारना° C 11:43 °मेध्येन] *conj.*; °मेधो C 11:46 ष्ठीवित्वाप्ययनादौ] *em.*; ष्ठीवित्वाप्यनादौ C (unmetrical)

वेश्मायतनलिङ्गानां कार्यमेभिर्विशोधनम् ॥ ११ : ४८ ॥

मार्ज्जनोल्लेखनैः सेकैर्गोनिवासाञ्जनेन च ।
इति पञ्चविधा शुद्धिः भूमेः कार्या च सूरिभिः ॥ ११ : ४९ ॥

ग्रामाद्धस्तशतं गत्वा नगरान्तञ्चतुर्गुणं ।
मही सर्वत्र मेध्या स्यान्निर्ल्लेपा यत्र दृश्यते ॥ ११ : ५० ॥

शुचिराकरजं द्रव्यं कारुहस्तः शुचिस्तदा ।
प्रस्नवे च शुचिर्वत्सः शकुनिः फलपातने ॥ ११ : ५१ ॥

विप्रुषो मक्षिका चैव छायाग्निसूर्यरश्मयः ।
रजो भूर्वायुरापश्च मेध्यो निस्पर्शने सदा ॥ ११ : ५२ ॥

नगरग्रामरथ्यां वा परिभ्रम्य गृहाद्बहिः ।
पादौ प्रक्षाल्य मृत्तोयैर्गृहान्तः प्रविशेत्ततः ॥ ११ : ५३ ॥ (f. 26v)

शिरःस्नानं प्रकुर्वीत स्रवन्तीषु विशेषतः ।
मृद्गोमयैः समुद्घृष्य त्रिश्शरीरं समन्ततः ॥ ११ : ५४ ॥

स्नानवस्त्रं परित्यज्य द्वितीयं परिधाय च ।
तेन स्नानकषायाद्यैर्वस्त्रमन्यं समाददेत् ॥ ११ : ५५ ॥

सोपवीतः समाचम्य पानीयमभिमन्त्रयेत् ।
एकविंशतिवारांस्तु शिवमन्त्रेण भक्तितः ॥ ११ : ५६ ॥

ध्यायमानः शिवं शान्तं शनैः स्नानं समाचरेत् ।
आचम्यात्मनः कुर्यादभिषेकन्ततः पुनः ॥ ११ : ५७ ॥

कुम्भेन पर्णपुटकैः करद्वयपुटेन वा ।
शिवेनैकादशात्मानं स्वयमन्येन वा पुनः ॥ ११ : ५८ ॥

विघ्नालक्ष्मीविशुद्ध्यर्थमभिषिञ्चेत्समन्ततः ।
आचम्य प्रोक्षयेद्भूयस्तावदेवात्मनः शिरः ॥ ११ : ५९ ॥

गृहे च परिजप्तेन स्नानं कुम्भेन कारयेत् ।

11:54 स्रवन्ती°] *em.*; श्रवन्ती° C **11:54** त्रिश्शरीरं] *em.*; त्रिशरीरं C **11:57** स्नानं] *em.*; श्नानं C

एवं भवति सुस्नातः सर्वपापविवर्ज्जितः॥ ११ : ६०॥ (f. 27r)

सर्वतीर्थाभिषिक्तस्य श्रद्धधानः फलं लभेत्।
सन्ध्यात्रयपरिभ्रष्टः शिवैकादशिकात्रयम्॥ ११ : ६१॥

जप्त्वा विशुद्धिमाप्नोति स्नानहीनः शतं जपेत्।
पर्वण्यपूज्य देवेशं गुरुमग्निञ्च भक्तितः॥ ११ : ६२॥

अदत्वा च बलिं तत्र शिवस्याष्टशतं जपेत्।
पुष्पम्पत्रम्फलं मूलमन्नपानाद्यमौषधम्॥ ११ : ६३॥

अनिवेद्य तु भुञ्जानः प्रायश्चित्ती भवेन्नरः।
शिवेन शतजप्तेन पूजया च विशुद्ध्यति॥ ११ : ६४॥

अनस्थिप्राणिसंघातं हत्वैकादशिकं जपेत्।
हत्वा च पक्षिणः सर्वांस्त्रिरेकादशिकां जपेत्॥ ११ : ६५॥

सर्पमार्ज्जारनकुलं श्वानमुष्ट्रं खरं हयम्।
गजाद्यांश्च शृगालांश्च हत्वा चाष्टशतं जपेत्॥ ११ : ६६॥ (f. 27v)

जपेदष्टसहस्रन्तु क्षत्रविड्गोवधेषु च।
शिवाग्निगुरुपूजा च योगीन्द्रद्विजभोजनम्॥ ११ : ६७॥

हत्वा वृद्धं स्त्रियं बालं शिवपञ्चशतं जपेत्।
जपेदष्टसहस्रन्तु सच्छूद्रविनिपातने॥ ११ : ६८॥

सद्वृत्तः शिवभक्तश्च नाद्यान्मृतकसूतके।
संस्कारेषु च सर्वेषु गृहेषु किमुतान्यतः॥ ११ : ६९॥

सूतकेऽन्यत्र भोक्तव्यं मृतकञ्च विवर्जयेत्।
भुक्त्वा प्रमादतः स्नेहाच्छिवस्याष्टशतं जपेत्॥ ११ : ७०॥

श्वविड्वराहचाण्डालैर्म्मार्ज्जारकपिकुक्कुटैः।
उलूकगृध्रकाकाद्यैः स्पृष्टमन्नं न भक्षयेत्॥ ११ : ७१॥

शिवैकादशजप्तेन गव्येन हविषा बुधः।

11:65 °दशिकां] *em.*; °दशिका C 11:66 सर्प°] *em.*; शर्प° C 11:66 गजाद्यांश्च] *em.*; गजाद्याश्च C 11:71 स्पृष्टमन्नं न] *em.*; स्पृष्टमं न न्न C

पीतेन शुध्यते क्षिप्रमभोज्याहारदूषितः॥ ११ : ७२॥

तीर्थयात्राविशुद्धात्मा सद्वृत्तः शिवभावितः।
पुत्रैरपि न भुञ्जीत सार्द्धङ्क्रूरैरधार्मिकैः॥ ११ : ७३॥ (f. 28r)

महापातकशुद्ध्यर्थं सहस्राणि जपेद्दश।
प्राणायामैस्त्रिसंध्यञ्च शिवमग्निञ्च पूजयेत्॥ ११ : ७४॥

रेतोमूत्रपुरीषाणि प्राशयित्वा च वारुणीम्।
भुक्त्वा चान्नमभोज्यन्तु गत्वा चाप्यन्त्यजां स्त्रियम्॥ ११ : ७५॥

जप्त्वा शिवायुतं सम्यक्पूर्वोक्तविधिना बुधः।
पञ्चगव्यं सकृत्पीत्वा सर्वपापैः प्रमुच्यते॥ ११ : ७६॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिरनुक्रमात्।
जपेत्त्रिपञ्चभिर्ब्रह्मैः ओंकारेण कुशोदकम्॥ ११ : ७७॥

पलाशपद्मपत्रे वा ताम्रपात्रेऽथवा स्थितम्।
कृत्वैकस्थं शिवेनैव जपेदष्टशतं पुनः॥ ११ : ७८॥

अहोरात्रोषितः स्नातः शिवस्य पुरतः स्थितः।
ओंकारेणैव मन्त्रेण प्राङ्मुखः स्वकरैः पिबेत्॥ ११ : ७९॥

पीतमात्रो भवेत्पूतः सम्पूर्णशशिनिर्मलः।
ब्रह्महत्यादिभिः पापैः सर्वैरेवाशु मुच्यते॥ ११ : ८०॥ (f. 28v)

मातृपितृसमुद्भूतं सहजागन्तुकञ्च यत्।
अस्थिमज्जागतं पापं ब्रह्मकूर्चः क्षणाद्दहेत्॥ ११ : ८१॥

अष्टम्यां ब्रह्मकूर्चेन स्नापयित्वा सकृच्छिवम्।
पीत्वा च पातकैर्मुक्तः शिवलोके महीयते॥ ११ : ८२॥

तस्मात्प्रतिचतुर्मासम्ब्रह्मकूर्च्चम्पिबेन्नरः।
सर्वपापविशुद्ध्यर्थम्महापातकशुद्धये॥ ११ : ८३॥

तस्मादेतत्परङ्गुह्यं महापातकनाशनम्।

11:74 जपेद्दश] *em.*; जपेद्दशः C **11:84** महापातक°] *em.*; महापाक° C (unmetrical)

प्रायश्चित्तं शिवेनोक्तं न देयं यस्य कस्यचित्॥ ११:८४॥

एतद्रहस्यं परमं प्रायश्चित्तं शिवं बुधः।
चरेत्प्रच्छन्नपापेषु प्रकाशे प्रार्थयेद्गुरुम्॥ ११:८५॥

शिवज्ञानमिदं शान्तं महापातकनाशनम्।
प्रणिपत्य गुरुं पश्चात्प्रार्थयेच्छुद्धिमात्मनः॥ ११:८६॥

॥ इति शिवधर्मोत्तरे प्रायश्चित्तपटलं समाप्तमिति॥ (f. 29r)

अथ किरणे प्रायश्चित्तं लिख्यते—

गरुड उवाच—

नित्यहानिर्यदा देव प्रायश्चित्तन्तु तत्र किम्।

भगवानुवाच—

शतजापादजाच्छुद्धिः सन्ध्यालोपे कृते सति॥ १२:१॥

नित्यहानौ जपेदीशं शतमेकन्तु देशिकः।
बहुदैवसिके भ्रंशे उपवासो भवेत्खग॥ १२:२॥

सहस्रं पञ्चमस्यैकं वक्तव्यं सरुजो ध्रुवम्।
निरुजो देशिकस्यापि बहुदैवसिका क्रिया॥ १२:३॥

नष्टा यदायुते द्वे तु जप्त्वा शुद्धिस्त्र्यहात्मिका।
दूरायातस्य दातव्यं केवलस्यायुतद्वयम्॥ १२:४॥

ससंख्या यस्य वा पञ्चसहस्राणि दिनक्षयम्।
कर्तव्योऽघोरसंज्ञस्य जपः कार्यो यथार्थतः॥ १२:५॥

आचार्यस्य वचो ग्राह्यन्तदवश्यम्भवेत्खग।

---

1. This corresponds to chapter 47 of the *Kiraṇa* (Caryāpāda 17) nityahāniprāyaścittavidhi.

11:86 °द्धिमात्मनः] *conj.*; °द्धिरात्मनः C 12:0 किरणे] *em.*; किरिणे C 12:1 प्रायश्चित्त] *em.*; प्राश्चित्त C 12:1 °जाच्छुद्धिः] *em.*; °जात्सुद्धिः C 12:2 बहुदैवसिके] *em.*; बहुदैवशिके C 12:3 °दैवसिका] *em.*; °दैवशिका C 12:6 °वश्यम्] *em.*; °वस्यम् C

गरुड उवाच—
अन्नं काकादिभिर्जुष्टं यदा तत्रापि किं वद॥ १२ : ६॥

भगवानुवाच—

श्वकाकालीढमन्नञ्च स्वल्पं त्याज्यं तु देशिकैः। (f. 29v)
द्रोणाढकप्रमाणन्तु यदालीढन्न सन्त्यजेत्॥ १२ : ७॥

ग्रासमात्रन्तदुद्धृत्य प्रोक्ष्य वामेन शुद्ध्यति।
शुद्धिरजशतात्स्नात्वा श्वकाकालीढभक्षणे॥ १२ : ८॥

कृकलासाहिमाण्डूकैः स्पृष्टं हृद्रोगकारकम्।
श्वासकाशकरञ्जुष्टं विडालनकुलादिभिः॥ १२ : ९॥

दुर्भुक्तेऽजशताच्छुद्धिः स्नात्वा गव्याज्यभक्षणात्॥ १२ : १०॥

॥ इति किरणाख्ये महातन्त्रे द्विचत्वारिंशतिमः पटलः॥

गरुड उवाच—

गृहस्थो गृहिणीयोगात्तच्छिष्टं सूतकं यदा।
द्विजादीनां यथा यच्च तादृशञ्च वद प्रभो॥ १३ : १॥
भगवानुवाच—

विप्रशुद्धिर्दशाहात्स्यात् क्षत्रियो द्वादशाहिका।
दशपञ्चाहिका शुद्धिर्वैश्ये शूद्रस्य मासिका॥ १३ : २॥

स्वधर्मस्थः क्रियानिष्ठो ज्ञानी वृत्तसमायुतः। (f. 30r)
शुध्यते तत्क्षणात्स्नानान्नित्यहानिरतोऽन्यथा॥ १३ : ३॥

पृथक्पाकः प्रकर्तव्यस्तद्योगं वर्ज्जयेत्सदा।
तद्योगाद्दोषसंबन्धो द्वैते प्रोक्तोऽन्यथा न हि॥ १३ : ४॥

---

[1] This corresponds to chapter 42 of the *Kiraṇa*, caryāpāda, āśaucavidhirdvādaśaḥ paṭalaḥ

12:11 किरणाख्ये] *em.*; किरिणाख्ये C 13:2 °शुद्धिर्दशा°] *em.*; °शुद्धिदशा° C

अद्वैतेऽपि यथालोके चित्तस्था वासना भवेत्।
नित्यहानिश्चकृत्वा यः तद्युक्तस्तत्समो भवेत्॥ १३ : ५॥

तस्य तावन्तिका शुद्धिर्यावकान्नक्तभोजनात्।
त्रिःस्नानं नक्तभोजित्वाद्घोरजापाच्छतत्रयात्॥ १३ : ६॥

न हानिर्न पृथक्पाकस्तदा शुद्धिस्त्र्यहात्मिका।
सर्व्वाभावाद्यदा योगस्तदा त्र्यहात्मिका मता॥ १३ : ७॥

उद्वाहिताश्चतस्रस्तु ब्राह्मणेन स्त्रियो यदा।
क्रमात्तत्सूतकङ्कुर्याद्दशषट्त्र्येकवासरम्॥ १३ : ८॥

सूतकन्तु सुतादीनां मातृपक्षेण सूतकम्।
सम्पूर्ण्णगर्भपतनाच्छुद्धिः स्नानात्क्षणात्मिका॥ १३ : ९॥

अर्व्वाक् स्याच्चूडसंज्ञस्य मृताद्बालान्न सूतकं। (f. 30v)
येषां न सूतकं तेषां स्पर्शः सञ्चयनोर्द्धतः॥ १३ : १०॥

पण्यस्त्रीकारुकादीनां कार्यञ्च श्रुतिचोदितम्।
उल्लङ्घ्य भोजनाचारं भक्ष्याभक्ष्यविधावपि॥ १३ : ११॥

गरुड उवाच—

भक्ष्याभक्ष्यविधौ देव प्रायश्चित्तन्तु तत्र किम्।
उच्छिष्टः सूतके प्राप्ते बलादर्थादिहागते॥ १३ : १२॥

भगवानुवाच—

अष्टमंगलके पुंस्त्वे भुक्त्वा वामशतं जपेत्।
नामप्राशननिष्क्रामे भुक्त्वा वक्त्रशतं जपेत्॥ १३ : १३॥

चूडाव्रते सगोदाने विवाहेषु न दोषभाक्।
चतुर्थिकान्नं भुक्त्वा तु जपेद्गुह्यञ्च पूर्ववत्॥ १३ : १४॥

पाकादिषु क्रतुष्वन्नं भोक्तव्यं पावनं यतः।
द्वादशैकादशाहे तु भुक्त्वा घोरञ्जपेत् त्र्यहं॥ १३ : १५॥

13:11 °कारुका°] *conj.*; °कोरुका° C **13:13** नामप्राशन°] *conj.*; नामप्रासन° C
13:14 चूडा°] *conj.*; चूड° C

भोज्यमन्नं त्रयाणान्तु शूद्राणां न कदाचन।
शौचाचारसमायुक्ताः शूद्रा येऽमद्यपाः शुभाः॥ १३ :१६ ॥ (f. 31r)

रुद्रार्च्चनपरा भक्ता भोज्यास्ते अन्त्यजा न हि।
तेषां मध्ये च कुम्भस्य कर्ता यः स शुभो मतः॥ १३ :१७ ॥

हिंसामद्यविनिर्मुक्तो भक्ष्याचारान्वितो यदा।
भोज्यो वान्योऽन्त्यजः कामात्कष्टमार्ग्गे तथापदि॥ १३ :१८ ॥

भुक्त्वा घोरसहस्रन्तु जपेदर्धमकामतः।
तडागारामसंक्षिप्तो देवतास्थापनेषु च॥ १३ :१९ ॥

भुक्त्वा पञ्चशतान्येव ईशानस्य तथा जपेत्।
द्वावेवाश्रमिणौ भोज्यौ द्वावभोज्यौ स्मृताविह॥ १३ :२० ॥

अत्रापि त्रिशतं जप्त्वा पञ्चमस्य विशुध्यति।
भुक्त्वान्यलिङ्गिनां स्थाने सहस्रन्तत्पतेर्ज्जपेत्॥ १३ :२१ ॥

कामतस्तु जपेदर्द्धन्तदेवाऽकामतो जपेत्।
अकामात्कामतो बुद्ध्वा तज्ज्ञैः सह विचार्य च॥ १३ :२२ ॥

कर्तव्यं शास्त्रसंसिद्धमथवा गुरुभाषितम्।
महापातकयुक्तानां प्रायश्चित्तं भवेद्गुरुः॥ १३ :२३ ॥
सामान्यपातकानान्तु बुद्ध्वातिक्रममादिशेत्॥ १३ :२४ ॥ (f. 31v)

॥ इति किरणाख्ये महातन्त्रे त्रिचत्वारिंशतिमः पटलः॥

गरुड उवाच—

विशेषपातकान्यत्र सामान्यानि स्थितानि च।
प्रायश्चित्तञ्च यत्तेषां कस्य वा कीदृशं वद॥ १४ :१ ॥

भगवानुवाच—

---

1. This corresponds to chapter 43 of the *Kiraṇa* (Caryāpāda 13) mahāpātaka-prāyaścittavidhistrayodaśaḥ paṭalaḥ

13:16 शूद्रा] *em.*; सूद्रा C 13:23 किरणाख्ये] *em.*; किरिणाख्ये C

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
विशेषपातकान्यत्र तद्योगात्पञ्चमं भवेत्॥ १४ : २॥

हत्वा कामाद्द्विजं सद्यं गवां गोष्ठे जपेत्तदा।
पीत्वाकामात्सुरां वामं शिवहर्म्ये जपेत्सदा॥ १४ : ३॥

कृत्वा स्तेयमकामाच्च घोरं पितृवने जपेत्।
गुरुस्त्रीगमने वक्त्रमकामात्तु जपेद्वने॥ १४ : ४॥

योगङ्कृत्वा समस्तैस्तु नगाग्रे पञ्चमं जपेत्।
प्रकाशे कामतस्तस्मिन् लक्षमावर्त्य शुध्यति॥ १४ : ५॥

अकामाद्वा रहस्ये च सहस्राच्छुद्धिरिष्यते। (f. 32r)
कामतः सरहस्ये च भवेत्तत्रायुतद्वयं॥ १४ : ६॥

अकामतः प्रकाशे च तत्रापि वायुतद्वयं।
गुरुद्रोहे कृते शुद्धिः कामतस्तु तदा न हि॥ १४ : ७॥

दयावान्देशिकस्तस्य तदा कृच्छ्रपुरःसरः।
पुनर्यागः प्रकर्तव्यः शुद्धिस्तस्यान्यथा न हि॥ १४ : ८॥

पातकत्रयसंयोगः सामान्यो ब्राह्मणादितः।
मद्यपानं यदा शूद्रे दीक्षिते स्वल्पकं भवेत्॥ १४ : ९॥

प्रवृत्तित्वाद्यतस्तस्य दोषस्तत्र न जायते।
नियमोऽघोरजापः स्यात्कर्तव्यश्च शतत्रिकः॥ १४ : १०॥

गुरुस्त्रीगमनं यच्च चतुर्णामपि तत्समं।
गुरुद्रोहे शिवद्रोहे तस्मात्तत्पतनम्भवेत्॥ १४ : ११॥

काष्ठादिपार्थिवं गृह्य तेजोद्रव्यं विना खग।
सद्योजाताच्छताच्छुद्धिरकामात्कीर्तिता तव॥ १४ : १२॥

पञ्चविंशतिका जापः कर्तव्यः कामतः शतं।
घृताद्याज्यं गृहीत्वा तु लवणं शर्करादिकं॥ १४ : १३॥ (f. 32v)

14:2 सुरापानं] *em.*; शुरापानं C   14:9 शूद्रे] *em.*; सूद्रे C   14:13 पञ्चविंशति°] *conj.*; पञ्चविशति° C

अकामात्कामतो वापि जपेद्वामन्तु पूर्ववत्।
रीतिकातारकांस्यादि गृहीत्वा तैजसञ् च यत्॥ १४ :१४ ॥

धेनुं वाघोरतः शुद्धिः कामाकामन्तु पूर्ववत्।
पुष्पगन्धादिकं यच्च वायव्यं स्त्रियमेव वा॥ १४ :१५ ॥

अनड्वाहं गजाश्वादि गृह्य वक्त्रन्तु पूर्ववत्।
क्षितिञ्च लिङ्गं शास्त्रम्वा गृह्येशं पूर्ववज्जपेत्॥ १४ :१६ ॥

अभक्ष्यभक्षणे जाते गुह्यकस्य शतं जपेत्।
अकामात्त्रिशतङ्कामाज्जपेत् मद्यादि वर्ज्जनात्॥ १४ :१७ ॥

शङ्करे सर्व्वपापानाङ्क्रमाद्ब्रह्माणि वा जपेत्।
ज्ञात्वा काममकामित्वमेकम्वा वर्त्तयेद्वरं॥ १४ :१८ ॥

निर्माल्यभक्षणे जाते प्रमादादयुतं जपेत्।
अघोरस्य न चान्यस्य कामाद्यागाद्विशुध्यति॥ १४ :१९ ॥

निर्माल्यलंघने कामात्तद्वत्पञ्चशतं जपेत्।
अजश्च त्रिशतं मोहाज्जपेद्गुह्यशतं पुनः॥ १४ :२०॥ (f. 33r)

निन्दाम्प्रमादतः कृत्वा शिवस्याणोश्च वा पुनः।
जपेदीशं तदा शुद्धिः शतमेकं सुयन्त्रितः॥ १४ :२१॥

दशोर्ध्वं त्रिशतादर्वाग्भवेत्स्नानजपाच्छुचिः।
तदूर्ध्वं पञ्चमं यावच्छतानक्तं विधीयते॥ १४ :२२॥

तदूर्ध्वमुपवासः स्यात्त्रिरात्रमयुताद्भवेत्।
ज्ञात्वा च तद्बलं ज्ञानञ्ज्ञातिम्भक्तिं सहिष्णुतां॥ १४ :२३॥

यत्नाद्विचार्य तद्दद्याद्गुरु वा लघु वा समं।
तदवश्यं प्रकर्तव्यमथवा गुरुभाषितं॥
निकृष्टजातिसंयोगे कल्पनीयं यथोदितम्॥ १४ :२४॥

॥ इति किरणाख्यमहातन्त्रे चतुश्चत्वारिंशतिमः पटलः॥

14:21 शुद्धिः] *em.*; शुद्धि C

गरुड उवाच—

निकृष्टजातिसंयोगेऽकामात्कामे कृते सति।
प्रायश्चित्तं भवेत्किन्तु वद लोकाखिलाश्रय॥ १५ :१॥

भगवानुवाच—

अकामाद्गोघ्नजा यस्मिन्मन्दिरे संस्थिता यदा। (f. 33v)
सर्वभाण्डपरित्यागात्कृच्छ्राच्छुद्धिर्नराच्छुचिः॥ १५ :२॥

कामतो यदि वा भुक्त्वा सकृत्कृच्छ्रातिकृच्छ्रतः।
वामदेवजपाच्छुद्धिः पराकोऽन्तेऽथवा सकृत्॥ १५ :३॥

ज्ञात्वा तु भुक्त्वाथवा तेन तदासौ तन्मयो भवेत्।
रजकी चर्मजा स्पृष्टा यदि वा मन्दिरे स्थिता॥ १५ :४॥

भाण्डत्यागादजाच्छुद्धिस्त्र्यहात्पञ्चसहस्रिका।
ताभ्याम्भुक्त्वा त्वकामाद्वा कृच्छ्रं घोरं जपेत्र्यहं॥ १५ :५॥

कामाद्वा द्विगुणं कर्म सकृद्योगाद्भवेदिह।
अकामाद्बहुसंयोगः सञ्जातस्तद्द्वयोरपि॥ १५ :६॥

तदा चान्द्रायणं कार्यमन्यथा नैव शुद्ध्यति।
बहुदैवसिको योगः संजातः कामतोऽथवा॥ १५ :७॥

तदा चान्द्रायणं कार्यं वारिणा केवलेन तु।
प्राणिहिंसात्मके पापे शतघोरजपाच्छुचिः॥ १५ :८॥ (f. 34r)

कामादकामतो वापि घोरस्य दशरूपकं।
सम्यग्विचार्य तं ज्ञात्वा दद्याच्छुद्धिम्पुनर्गुरुः॥ १५ :९॥

गरुड उवाच—

भगवन्कीदृशः प्रोक्तः कृच्छ्रोऽन्यस्तप्तसंज्ञकः।
अतिकृच्छ्रं पराकञ्च चान्द्रायणविधिश्च यः॥ १५ :१०॥

---

1. This corresponds to chapter 44 of the *Kiraṇa* (Caryāpāda 14), kṛcchrācaraṇavidhiś-caturdaśaḥ paṭalaḥ

15:1 सति] *em.*; शति C **15:7** दैवसिको॰] *em.*; दैवशिको॰ C

भगवानुवाच—

एकभुक्तन्त्र्यहङ्कुर्यात् त्र्यहञ्च यदयाचितम्।
त्र्यहञ्च नक्तभोजित्वं त्र्यहं स्यात्मारुताशनः॥ १५ :११॥

एवं कृच्छ्रस्समाख्यातः प्राजापत्य इति स्मृतः।
त्र्यहमुष्णम्पिबेद्वारि त्र्यहं स्यात्क्षीरभोजनम्॥ १५ :१२॥

त्र्यहमुष्णं घृतं पीत्वा त्र्यहं वै केवलो यदा।
तप्तकृच्छ्रं समाख्यातं ह्यतिकृच्छ्रं श्रुणुष्वथ॥ १५ :१३॥

क्षीरस्य त्रिपलं पानं दिवसानेकविंशति।
अतिकृच्छ्रः समाख्यातः पराकञ्च निबोध मे॥ १५ :१४॥

द्वादशाहं निराहारः पराक इति स स्मृतः। (f. 34v)
मासार्धं ग्रासवृद्धिः स्याच्छुक्ले कृष्णे च ह्रासयेत्॥ १५ :१५॥

चान्द्रायणविधिः प्रोक्तो जलादेव जलात्मकः।
स्नात्वा स्नात्वा जपः कार्यो मन्दिरे वाथवा बहिः॥ १५ :१६॥
समाप्ते तु विधौ कार्यं भोजनं शास्त्रचोदितम्। १५ :१७

॥ इति किरणाख्यमहातन्त्रे पञ्च(च)त्वारिंशतिमः पटलः॥

गरुड उवाच—

परस्योच्छिष्टसंस्पर्शो यदि स्याद्देव तत्र किं।
पात्रशुद्धिरपि प्रोक्ता नोक्ता सापि वद प्रभो॥ १६ :१॥
भगवानुवाच—

स्वजातिदीक्षितस्पृष्टस्तदाचम्य विशुद्ध्यति।
आचम्य दीक्षितस्यापि स्वजातीशशतं जपेत्॥ १६ :२॥

समीपदीक्षिते स्पृष्टे भवेच्छुद्धिस्तु पूर्ववत्।
तस्मिन्नदीक्षितस्पृष्टे जपेत्स्नात्वा शतद्वयं॥ १६ :३॥ (f. 35r)

---

1. This corresponds to chapter 46 of the *Kiraṇa*.

इदमेवान्तरस्पर्शाद्दीक्षितस्येतरस्य तु।
शतन्त्रिकं भवेत्स्पर्शात्सोपवासो जपो भवेत्॥ १६ :४ ॥

तदेवशूद्रसंज्ञस्य स्पर्शनाद्दीक्षितस्य तु।
स्पर्शाददीक्षितस्यापि शतात्पञ्च ह्युपोषितः॥ १६ :५ ॥

इतरेषां पादहीनं प्रायश्चित्तं भवेत्खग।
पुरुषाघोरवामाजा जातीशा ब्राह्मणादितः॥ १६ :६ ॥

त्रिरात्रमन्त्यजस्पर्शात्सहस्राणि दशैव तु।
पञ्चमस्य तु मन्त्रस्य जपेत्तदविचारतः॥ १६ :७ ॥

कृच्छ्राघोरजपः कार्यः पुनश्चाण्डालसङ्गमात्।
अयुतैकं जपेद्धीमान् प्रायश्चित्तविशुद्धये॥ १६ :८ ॥

ज्ञात्वाज्ञात्वा यथास्पर्शम्प्रायश्चित्तन्तु तस्य तत्।
पात्रशुद्धिं श्रुणुष्वेतां स्वशास्त्रविहितां खग॥ १६ :९ ॥

हेमरौप्यादिपात्राणां वारिणा शुद्धिरिष्यते।
शङ्खादीनां भवेच्छुद्धिस्तुषैर्वा मथितेन तु॥ १६ :१० ॥ (f. 35v)

भस्मना कांस्यशुद्धिः स्यात्ताम्रमम्लेन शुद्ध्यति।
उच्छिष्टलिप्तपात्रस्य शुद्धिरेषा मयोदिता॥ १६ :११ ॥

प्रोक्ष्य शुद्ध्यत्यसन्देहादुच्छिष्टस्पृष्टभाजनं।
तुम्ब्वादिवेणुपात्राणां शुद्धिः स्यात्क्षारवारिणा॥ १६ :१२ ॥

शुद्धिश्चोदकभाण्डानाम्पर्यग्निकरणात्मिका।
तृणादिकञ्च यत्किञ्चित्काष्टं वा प्रोक्षितं शुचिः॥ १६ :१३ ॥

उल्लेखाद्भूर्विशुद्ध्येत तथा गोमयमार्जनात्।
विष्ठाद्युपहतम्भाण्डन्त्याज्यं स्याद्वेणुमृण्मयं॥ १६ :१४ ॥

शेषस्य पूर्ववत् शुद्धिः रजसा स्त्रीः विशुद्ध्यति।
त्यजेन्निर्माल्यसंस्पर्शाद्भाण्डं मृद्वेणुसम्भवम्॥ १६ :१५ ॥

16:9 खग] *em.*; खगः C **16:13** यत्किञ्चित्] *em.*; यत्किचित् C **16:14** °मृण्मयम्] *conj.*; °मृत्मयम् C **16:15** शुद्धिः] *em.*; सुद्धि C

शेषस्य पूर्ववच्छुद्धिः वस्त्र शुद्धिर्जलाद्भवेत्।
आचारमाचरेच्छैवं शास्त्रोक्तं गुरुभाषितं॥ १६ : १६ ॥

तदेतस्य प्रकर्तव्यमन्यथा पतनं भवेत्।
गुर्वर्थन्नित्यहानिर्या न दोषाय यतस्ततः॥ १६ : १७ ॥ (f. 36r)

॥ इति किरणाख्ये महातन्त्रे षट्चत्वारिंशतिमः प्रायश्चित्तपटलः समाप्त इति॥

॥ प्रतिष्ठापारमेश्वरे महातन्त्रे प्रायश्चित्तपटलं लिख्यते॥

अकामाद्ब्राह्मणं हत्वा कामतो वा महामुने।
सद्योजातं जपेत्तत्र ततः पापाद्विमुच्यते॥ १७ : १ ॥

सङ्गमे वा गवाङ्गोष्ठे एकाहन्तु व्रतं चरेत्।
सद्योजातं चरेद्ब्रह्मन्ब्रह्महत्यां व्यपोहति॥ १७ : २ ॥

हत्वापि सुबहून्मन्त्री चरेच्छतात्त्रिकं व्रतं।
निरपेक्षो जपाभिज्ञो दहेत्पापमशेषतः॥ १७ : ३ ॥

दिवसान्तज्ञपङ्क्त्याद्भृतशेषम्विशुध्यति।
गुरुपत्नीं स्नुषाम्वापि दुहित्रीम्भगिनीन्तथा॥ १७ : ४ ॥

अगम्यागमनं कृत्वा वामदेवं जपेद्बुधः।
अंगमात्रोदके विश्य आदित्याभिमुखः स्थितः॥ १७ : ५ ॥

ऊर्द्धबाहूर्दिनङ्कृत्स्नं जप्त्वा पापाद्विशुध्यति। (f. 36v)
चाण्डालिनीम्विवर्णाम्वा संमोहात्कामचारिणीं॥ १७ : ६ ॥

भुक्त्वा विष्ठाममेध्यन्तु वामदेवञ्जपेत्ततः।
दिनानि त्रीण्यनुद्विग्नो नाभिमात्रोदके स्थितः॥ १७ : ७ ॥

प्राणायामेन जप्तव्यः कृतात्पापाद्विमुच्यते।
सुवर्णस्तेयगोधान्यं हृत्वा च प्रवरां स्त्रियं॥ १७ : ८ ॥

बलादकारणात्मन्त्री मित्रद्रोहे कृतेऽथवा।

17:3 चरेच्छतात्त्रिकं] *conj.*; चरेच्छत्रात्रिकं C 17:4 दिवसान्तज्ञ°] *em.*; दिवशान्तज्ञ° C

मन्त्रशिवीकृतात्मा तु समृत्काष्ठव्रतं चरेत्॥ १७ : ९ ॥

जानुमात्रोदके विश्य त्रिरात्रोपविशेन्नरः।
वामदेवं जपेत्मन्त्री तस्मात्पापाद्विमुच्यते॥ १७ : १० ॥

गोघ्नो वा स्त्रीघ्नो वापि मातृहा पितृहा तथा।
प्रायश्चित्ती जपेद्घोरं विधिनानेन शुध्यति॥ १७ : ११ ॥

हत्वा च स्वस्त्रियं रागाद्दोषाद्यां पापमाचरेत्।
अघोराष्टसहस्रन्तु जप्त्वा पापाद्विमुच्यते॥ १७ : १२ ॥

अभक्ष्यभक्षणं कृत्वा सुरां पीत्वा द्विजाधमः। (f. 37r)
दिनशेषञ्जपेद्वक्त्रं पातकैर्मुच्यते भृशं॥ १७ : १३ ॥

भिक्षान्त्यक्त्वा यदैकान्नं प्रमादादश्नुयाद्यदि।
सकृदुच्चारणाद्वक्त्रान्तद्दोषात्मुच्यते भृशं॥ १७ : १४ ॥

एकान्नन्नित्यमश्नीयाद्व्यक्ताचारोथ गूढवान्।
अहोरात्रञ्जपेद्वक्त्रमन्नदोषाद्विमुच्यते॥ १७ : १५ ॥

क्षत्रियम्वाथ वैश्यञ्च अकामाद्विनिहत्य च।
ईशानाष्टसहस्रेण शतं हुत्वा विशुध्यति॥ १७ : १६ ॥

शूद्रं हत्वा प्रमादात्तु महिषोष्ट्रखरादि च।
ईशानशतजप्तेन तत्पापं नयते भृशं॥ १७ : १७ ॥

स्वस्रुकञ्च समुत्सृष्टद्विजो मोहात्प्रमादतः।
गायत्र्याष्टशतं जप्त्वा क्षिप्रं पापात्प्रमुच्यते॥ १७ : १८ ॥

व्रतलोपो व्रतभ्रंशः क्रियालोपो भवेद्यदि।
गायत्र्यष्टशतेनैव अच्छिद्रं तादृशं पुनः॥ १७ : १९ ॥

इष्टमन्त्रव्रते युक्तो यदि तद्विषयी भवेत्। (f. 37v)
सद्यस्याष्टसहस्रेण गायत्र्या वा विशुध्यति॥ १७ : २० ॥

तृणगुल्मलतावृक्षं वनं च्छित्वा विशेषतः।

17:17 शूद्रं] *em.*; सूद्रं C 17:18 स्वस्रुकञ्च] *conj.*; श्वम्भूकञ्च C

गायत्र्याष्टशतेनैव क्षणान्निर्मलतां व्रजेत्॥ १७ : २१॥

व्याघ्रं सिंहम्मृगं श्वानं वाजिनं हस्तिनन्तथा।
सूकरादींश्च हत्वा तु जपेदष्टशतं क्रमात्॥ १७ : २२॥

कृमिकीटपतङ्गादियूकामत्कुणदंशकान्।
मक्षिकादींश्च हत्वा तु सकृदेव विशुध्यति॥ १७ : २३॥

शुना दष्टो विशुध्येत गायत्र्यष्टशतेन तु।
मार्जारमूषिकैर्दष्टः सप्तजप्तेन शुध्यति॥ १७ : २४॥

शृगालवृकदष्टो वा शुद्ध्यत्यष्टशतेन तु।
कुम्भीरमकरैर्दष्टः सकृदेव विशुध्यति॥ १७ : २५॥

अन्नादिपुष्पजां हत्वा अनस्थीनि बहून्यपि।
दृष्टादृष्टानि सूक्ष्माणि स्मरणादेव शुध्यति॥ १७ : २६॥

शिवनिन्दापवादञ्च शिवमन्त्रस्य चैव हि।
गायत्र्यष्टसहस्रेण प्रमादाच्छुध्यते भृशं॥ १७ : २७॥ (f. 38r)

राजानं राजपात्रम्वा कुलमुच्छाद्याशेषतः।
प्राणायामशतेनैव सद्येनैकेन शुध्यति॥ १७ : २८॥

शिवस्य शिवमन्त्रस्य शैवाचार्यस्य चैव हि।
निन्दकान्विनिहत्यापि समयान्न विलुप्यते॥ १७ : २९॥

अस्त्रसंरोषणात्सिद्धं लक्षमेकं कदाचन।
शिवन्नमस्य घाते तु यदि ब्रह्मसमो भवेत्॥ १७ : ३०॥

शिवविद्याङ्गसम्पूर्ण आचार्यः परमेश्वरः।
शिववत्पूजनीयोऽसौ कृत्वा निन्दां शतञ्जपेत्॥ १७ : ३१॥

समयी आत्मवानन्यः पुत्रकश्च विशेषतः।
कृत्वा निन्दान्ततस्तेषान्तदर्धेन विशुध्यति॥ १७ : ३२॥

प्रायश्चित्तं गृहस्थानां ये च मन्त्रव्रते स्थिताः।
कुटुंबासक्तचित्तानां यतीनां नास्ति पातकं॥ १७ : ३३॥

17:27 °सहस्रेण] *em.*; °शहस्रेण C

हत्वा तु देशिकं मोहाद्भैक्षभुक् सुसमाहितः। (f. 38v)
एकाशीतिपदं मंत्रं लक्षमावर्त्य शुध्यति॥ १७:३४॥

संहितापारगो मन्त्री यः करोतीह पातकं।
सर्वन्तद्भस्मशात्क्षिप्रं मन्त्रशक्त्या करोति सः॥ १७:३५॥

अप्रबुद्धस्य दातव्यम्प्रायश्चित्तं यथोदितं।
व्रतादेशञ्च पूर्वोक्तं शिवतन्त्रस्य पारगैः॥ १७:३६॥

तुलापुरुषसहस्रस्य चान्द्रायणशतस्य च।
तप्तकृच्छ्रातिकृच्छ्रस्य ब्रह्मकूर्चशतस्य च॥ १७:३७॥

सर्वतीर्थाभिषेकस्य बहुक्रतुफलस्य च।
भस्मगायत्रिजप्तस्य कलानार्घन्तिषोडशीं॥ १७:३८॥

रुद्रकोटिसहस्रस्य भवेज्जप्तस्य यत्फलं।
तस्माद्गायत्रिमन्त्रेण शतजप्तेन तत्समं॥ १७:३९॥

ओं सद्योजाताय विद्महे वामदेवाय धीमहे तन्नोऽघोरः प्रचोदयात्॥
इति भस्मगायत्री॥
ओं तन्महेशाय विद्महे वाग्विशुद्धाय धीमहे तन्नः शिवः प्रचोदयात्॥
शिवगायत्री॥ (f. 39r)

मण्यस्मतेजसञ्चाद्भिस्ताम्रमम्लेन भस्मना।
कांस्यं क्षारेण वस्त्रञ्च चर्म काषायवारिणा॥ १७:४०॥

आलावुकं वैदलं च वारिणा वल्कलं तथा।
मृण्मयस्य पुनःपाकादुत्क्षणाद्दारवस्य तु॥ १७:४१॥

तैजसं च दहेत्पात्रं प्रोक्ष्य शुध्यति पूर्ववत्।
प्रोक्षिते तृणकाष्ठे च क्षितिर्गोमयवारिणा॥ १७:४२॥

अविशस्तादिभिः स्पृष्टः स्नात्वा विप्रो विशुध्यति।
पादौ प्रक्षाल्य चाचम्य शुद्धिर्भवति नान्यथा॥ १७:४३॥

17:40 काषायवारिणा] *conj.*; काषायवायवारिणा C (unmetrical) **17:41** पुनःपाकादुत्क्षणा°] *conj.*; पुनपाकाद्दूत्क्षणा° C

उच्छिष्टलेपसंपर्कात्पूर्वोक्तविधिमाचरेत्।
विण्मूत्रलेपदुष्टञ्च त्यजेत्मृण्मयभाजनम्॥ १७ : ४४ ॥

सत्यपूता स्मृता वाचा सद्भिराचरिता क्रिया।
मनः पूतञ्च सर्वत्र पूतमित्यभिधीयते॥ १७ : ४५ ॥

इति द्रव्यशुद्धिः॥

प्रायश्चित्तं प्रवक्ष्यामि पञ्चब्रह्म क्रमेण तु। (f. 39v)
सर्वपापविशुद्ध्यर्थं स्मरणादेव मोचनं॥ १७ : ४६ ॥

सद्योजातं जपेद्गोष्ठे अरण्ये पर्वतेऽपि वा।
सरितां सङ्गमे चैव श्मशानायतनेऽपि वा॥ १७ : ४७ ॥

पुण्यतीर्थे पयोभक्षः सद्योजातं सुयन्त्रितः।
शतानि दश जप्त्वा तु ब्रह्मघाती शिवाग्रतः॥ १७ : ४८ ॥

निरशनः सप्ताहञ्च स्थित्वा तु जपसंयुतः।
त्रिस्नायी पञ्चगव्याशी चीरवल्कलधारकः॥ १७ : ४९ ॥

अनेन विधिना ब्रह्मन् ब्रह्महत्यां विशोधयेत्।
गोघ्नश्च त्र्युषितो भूत्वा सद्यं पञ्चशतं जपेत्॥ १७ : ५० ॥

उपपातकिनः सर्वे एष एव जपः स्मृतः।
कार्यम्त्रिरुषितं स्नानं पुण्यस्थानसमाश्रितः॥ १७ : ५१ ॥

गोवधात् मुच्यते क्षिप्रमत्र नास्ति विचारणा।
सर्पदष्टोपवासेन सकृदेकेन शुध्यति॥ १७ : ५२ ॥ (f. 40r)

सुरां पीत्वा अकामेन भस्मस्नायी त्र्यहोषितः।
सद्योजातसहस्रन्तु जप्त्वा शुध्यति किल्बिषात्॥ १७ : ५३ ॥

अभक्ष्यभक्षणेप्येवङ्कृत्वा शुध्यति किल्बिषात्।
असत्प्रतिग्रहं गृह्य सद्योद्वादशभिः पुनः॥ १७ : ५४ ॥

मुच्यते किल्बिषात्क्षिप्रं स्तेयी यश्चान्यकुत्सितः।

17:44 मृण्मय°] *em.*; मृत्मय° C 17:48 जप्त्वा] *conj.*; जत्का C 17:49 °वल्कल°] *em.*; °वल्क° C (unmetrical)

चाण्डालस्पर्शसंभाष्ये प्राणायामशतं जपेत्॥ १७:५५॥

सद्योजातेन मन्त्रेण नात्र कार्या विचारणा।
गुरोर्वाक्यं लंघयित्वा पुत्रकाचार्य एव वा॥ १७:५६॥

सद्यः पञ्चशतं जप्त्वा मुच्यते गुरुलंघनात्।
दिवा च यदि वा रात्रौ दुःस्वप्नं यदि पश्यति॥ १७:५७॥

स्नात्वा जपेत्ततः सद्यन्तस्मान्मुच्येत किल्बिषात्।
त्रिसन्ध्यान्तु जपेद्यस्तु सद्योजातं शिवाग्रतः॥ १७:५८॥

सर्वभूतवधं कृत्वा न स पापैस्तु लिप्यते। (f. 40v)
पूर्वापरान्तयोः सन्ध्यां सद्योजातशतञ्जपेत्॥ १७:५९॥

अहोरात्रकृतं पापं तत्क्षणादेव नश्यति।
प्रायश्चित्तविधानन्तु सद्योजातेन कीर्तितः॥ १७:६०॥

वामदेवस्य वक्ष्यामि क्षत्रहत्याविशुद्धये।
ब्रह्मक्षत्रवधे जप्त्वा शतान्यष्टौ शिवाग्रतः॥ १७:६१॥

पञ्चगव्याशनं कृत्वा तस्मात्पापात्प्रमुच्यते।
क्षुधार्त्तो वाप्यशक्तो वा अभक्ष्यं यदि भक्षयेत्॥ १७:६२॥

जपेद्वामशतान्पञ्च तस्मात्मुच्यति किल्बिषात्।
अगम्यागमनङ्कृत्वा वामदेवशतञ्जपेत्॥ १७:६३॥

ब्राह्मणीमितरां वापि योभिगच्छेत दीक्षितः।
ब्रह्मणोष्टशतञ्जप्त्वा तस्मात्पापात्प्रमुच्यते॥ १७:६४॥

क्षत्रियो द्विशतेनैव वैश्यस्तु त्रिशतेन वै।
शूद्रो जप्त्वा तु चत्वारि वामदेवं शिवाग्रतः॥ १७:६५॥

एकरात्रोषितो भूत्वा तस्मात्पापात्प्रमुच्यते।
कर्मणा मनसा वाचा अनृतं योऽनुवर्तते॥ १७:६६॥

वामदेवशतं जप्त्वा तस्मात्मुच्यति किल्बिषात्।
कामतो रेतसोत्सर्गे जपेद्वामशतद्वयं॥ १७:६७॥

17:62 °शक्तो] *em.*; °सक्तो C

रेतो मूत्रपुरीषं वा प्रमादाद्यदि भक्षयेत्। (f. 41r)
वामदेवशतञ्जप्त्वा तस्मात्पापात्प्रमुच्यते॥ १७ : ६८॥

चातुवर्णात्तु या भिक्षा आदृता शुध्यते यथा।
सप्ताभिमन्त्रिताङ्कृत्वा प्रोक्षयित्वा निवेदयेत्॥ १७ : ६९॥

शिवाय गुरवे चैव हविष्यन्तद्विनिर्दिशेत्।
चतुष्पथे श्मशाने वा स्वप्तुकामोऽन्यतोऽपि वा॥ १७ : ७०॥

दिशासु प्रकिरेद्भस्म न केनाप्याभिभूयते।
गुह्यादिपापसंयुक्तो वामदेवेन शुध्यति॥ १७ : ७१॥

अघोरेण प्रवक्ष्यामि प्रायश्चित्तमतः परम्।
निर्माल्यं भक्षयेद्यस्तु दीक्षितः शिवशासने॥ १७ : ७२॥

अघोराष्टशतं जप्त्वा हुत्वाग्निन्तु विशुध्यति।
कर्मणा मनसा वाचा कृत्वा चैव तु पातकं॥ १७ : ७३॥

सप्तवारं जपेद्घोरं तस्मात्पापात्प्रमुच्यते।
अनस्थिप्राणिसंघातं हत्वा घोरायुतञ्जपेत्॥ १७ : ७४॥

पक्षिणस्तु बहून्हत्वा तमेव त्रिगुणञ्जपेत्। (f. 41v)
स्थावराणां लतानाञ्च च्छित्वा कृत्वा प्रयोजनं॥ १७ : ७५॥

शतमेकं जपेद्घोरन्तस्मात्मुच्येत किल्बिषात्।
स्ववृत्तिं यः परित्यज्य अन्यथा योऽनुवर्तते॥ १७ : ७६॥

दीक्षितः कुरुते पापन्तस्य शुद्धिन्निबोध मे।
कादाचित्स्यात्स्वकर्मेण पतितः पुनरागतः॥ १७ : ७७॥

अघोरं सततञ्जप्त्वा मासमेकं शिवाग्रतः।
हुत्वायुतं शिवाग्नौ तु तस्मात्पापात्प्रमुच्यते॥ १७ : ७८॥

शिवशास्त्राणि यो निन्देद्दीक्षितः शिवशासने।
प्राणायामैर्ज्जपेद्घोरं सकृज्जप्त्वा विशुध्यति॥ १७ : ७९॥

उच्छिष्टम्भक्षयेद्यस्तु स्पृशेद्वा यस्य कस्यचित्।

17:78 सतत°] *em.*; शतत° C

अघोराष्टशतं जप्त्वा तस्मात्मुच्येत किल्बिषात्॥ १७ : ८०॥

अघोरं जपते यस्तु कृष्णाष्टम्यां सकृन्निशि।
मुच्यते सर्वपापेभ्यो निर्मलो निरुजो भवेत्॥ १७ : ८१॥

यस्तु चतुष्पथे लङ्घ्ये त्रिपथं वापि दीक्षितः। (f. 42r)
दशधा वर्त्तयेद्घोरं तस्मात्पापात्प्रमुच्यते॥ १७ : ८२॥

एकतश्च त्रयो वेदा गायत्री वापि चैकतः।
गायत्र्या लभते स्वर्गमघोरेण शिवालयं॥ १७ : ८३॥

प्रायश्चित्तमघोरेण मया ब्रह्म प्रचोदितम्।
अधुना सम्प्रवक्ष्यामि प्रायश्चित्तन्नरेण तु॥ १७ : ८४॥

आचार्यो द्रव्यलोभेन दीक्षयेद्ब्राह्मणम्भुवि।
शुचिः स्नात्वा जपेद्वक्त्रं शतमष्टोत्तरम्बुधः॥ १७ : ८५॥

अग्निकार्यन्ततः कृत्वा तस्मात्पापात्प्रमुच्यते।
क्षत्रियस्य शतेनैव वैश्यस्यार्द्धशतेन च॥ १७ : ८६॥

शूद्रे विंशति जप्त्वा तु स्त्रियश्चापि तथैव च।
सप्तवारान्जपेद्वक्त्रन्दीक्षितो मांसभक्षणे॥ १७ : ८७॥

अभक्ष्यभक्षणे त्रिंशदवाच्यवचने तथा।
गुरुनिन्दापवादे तु जपेद्वक्त्रञ्जले शतं॥ १७ : ८८॥

ग्रन्थापहरणे वक्त्रञ्जपेदज्ञानतः शतं। (f. 42v)
अन्नं रजस्वलास्पृष्टं यदि भक्ष्येत्प्रमादतः॥ १७ : ८९॥

सप्तवाराञ्जपेद्वक्त्रन्तस्मान्मुच्येत किल्बिषात्।
एकान्नं यस्तु वै भुङ्क्ते भैक्ष्यन्त्यक्त्वा प्रमादतः॥ १७ : ९०॥

सप्तवाराञ्जपेद्वक्त्रन्तस्मान्मुच्येत किल्बिषात्।
रुद्रकोटिन्तु यो विप्रो जपेद्रुद्रस्य सन्निधौ॥ १७ : ९१॥

सकृत्तत्पुरुषञ्जप्त्वा कलान्नार्घन्ति षोडशीम्।

17:82 त्रिपथं] *conj.*; त्रिः पथं C **17:87** दीक्षितो] *em.*; दीक्षितोदीक्षितो C (unmetrical) **17:89** रजस्वला°] *em.*; रस्वला° C (unmetrical)

कृत्स्नन्दिनञ्जपेत्मन्त्री पापन्तस्य न विद्यते॥ १७ : ९२॥

ईशानेनाथ वक्ष्यामि प्रायश्चित्तविधिक्रमम्।
अथ कश्चिद्विषेद्विप्रङ्क्तोपाविष्टः प्रमादतः॥ १७ : ९३॥

सकृज्जप्त्वा स ईशानं ब्रह्मद्वेषी शुचिर्भवेत्।
यो निन्देत शिवम्मोहात्तच्छास्त्रं योगिनन्तथा॥ १७ : ९४॥

ईशानाष्टशतञ्जप्त्वा तस्मात्पापात्प्रमुच्यते।
देवयोन्यष्टके द्वेष्टा अनृतं यस्तु भाषते॥ १७ : ९५॥

ईशानं पञ्चविंशत्या जपमानो विशुध्यति। (f. 43r)
यस्तु प्रव्रजिताङ्गच्छेद्ब्राह्मणीम्वा कुलस्त्रियं॥ १७ : ९६॥

ईशानाष्टशतञ्जप्त्वा तस्मात्मुच्येत किल्बिषात्।
अकामात् मृतकान्नं वा अभोज्यम्भक्षयेद्यदि॥ १७ : ९७॥

ईशानजपविंशत्या पूतो भवति तत्क्षणात्।
केशकीटोपविद्धान्नन्दूषितं वापि केनचित्॥ १७ : ९८॥

सकृज्जप्त्वा तु ईशानन्तस्मात्पापात्प्रमुच्यते।
अन्यैर्वा पातकैर्युक्तो महापातकिनापि वा॥ १७ : ९९॥

ईशानं जपमानस्तु शुचिः स्नात्वा शिवाग्रतः।
मुच्यते सर्वपापेभ्यो राहुना चन्द्रमा यथा॥ १७ : १००॥

एकान्नमथ भैक्षम्वा यस्तु भुङ्क्ते द्विजोत्तमः।
यावन्त्यश्नाति पिण्डानि तावद्दोषैर्न लिप्यते॥ १७ : १०१॥

अहोरात्रोषितो भूत्वा मुच्यते त्वन्नपातकैः।
उपपातकयुक्तोऽपि यदि शुद्ध्यर्थमाचरेत्॥ १७ : १०२॥

पीत्वा वै पञ्चगव्यञ्च तस्मात्पापात्प्रमुच्यते। (f. 43v)
ग्रहणे चन्द्रसूर्याभ्यां विषुवे चैव नित्यशः॥ १७ : १०३॥

ईशानञ्जपते यस्तु तस्मान्मुच्येत किल्बिषात्।

17:99 महापातकिनापि] *conj.*; महापाकिनापि C (unmetrical) 17:101 भुङ्क्ते] *em.*; भुक्ते C

गोघ्नश्च ब्रह्मघाती च सुरापो गुरुतल्पगः॥ १७ :१०४॥

एकैकस्य समाख्यातं मन्त्राणामनुपूर्वशः।
रौप्यन्ताम्रञ्च कांस्यञ्च क्षीरञ्च लवणादयः॥ १७ :१०५॥

ईशानं पञ्चविंशत्या जप्त्वा मुच्येत किल्बिषात्।
कर्मणा मनसा वाचा पापङ्कृत्वा तु दीक्षितः॥ १७ :१०६॥

सकृज्जप्त्वा तु ईशानं मुच्यते पापसङ्ग्रहात्।
लसुनं यस्तु भक्ष्येत पलाण्डुं वापि दीक्षितः॥ १७ :१०७॥

गृञ्जनादीनि भक्ष्याणि भौमानि कवकानि च।
सकृज्जप्त्वा तु ईशानं तस्मात्मुच्येत पातकात्॥ १७ :१०८॥

पापं संशोध्य तत्सर्वमीप्सितं फलमाप्नुयात्।
देवैस्तु यानि गुह्यानि यान्युक्तानि मनीषिभिः॥ १७ :१०९॥

वेदेषु यानि चोक्तानि धर्मशास्त्रेष्वनेकशः। (f. 44r)
ब्रह्मभिस्तानि सर्वाणि ह्रियन्ते किल्बिषाणि तु॥ १७ :११०॥

एतानि योऽनुवर्तेत समर्थः सर्वकर्मसु।
पञ्चब्रह्म जपेद्यस्तु दीक्षितः शिवशासने॥ १७ :१११॥

न तस्य तिष्ठते पापन्तमः सूर्योदये यथा।
हिंसामद्यविनिर्मुक्तो भक्ष्याचारान्वितो यथा॥ १७ :११२॥

कुलालस्तु तदा भोज्यो नैवान्यो अन्त्यजा इह।
भुक्तान्नमन्त्यजातेस्तु कष्टमार्गे तथापदि॥ १७ :११३॥

भुक्त्वा घोरसहस्रन्तु जपेदर्धमकामतः।
रजकी चर्मजाकृष्टा यदि वा मन्दिरे स्थिता॥ १७ :११४॥

भाण्डत्यागादजाच्छुद्धिस्त्र्यहाच्चैव सहस्रिका।
ताभ्यां भुक्त्वा त्वकामाद्वा कृच्छ्राद्घोरजपात् त्र्यहं॥ १७ :११५॥

कामात्तद्द्विगुणं कार्यं सकृद्योगाद्विधर्मतः।
ओं नमो निर्माल्यमथनाय नमः।
पूर्वं दत्वाष्टपुष्पन्तु निर्माल्यपरिशोधनं॥ १७ :११६॥ (f. 44v)

चण्डेश्वरेण कर्तव्यञ्चण्डब्रह्मभिरेव तु।
चण्डब्रह्मभिरापूर्य वर्धनीं पात्रमेव च॥ १७:११७॥

मुद्राभिः पूर्वमुक्ताभिः रुद्राभिश्च यथाक्रमम्।
सद्योजातात्समारभ्य चण्डब्रह्माणि विन्यसेत्॥ १७:११८॥

सद्योजातं पश्चिमायाम्वामदेवमुदग्दिशि।
दक्षिणायामघोरन्तु प्राच्याम्वक्त्रन्निवेशयेत्॥ १७:११९॥

लिङ्गं मूर्धनि वेशानङ्गन्धपुष्पाद्यनुक्रमात्।
ततश्चण्डेश्वरन्न्यस्य पूजयित्वार्घयेत्क्रमात्॥ १७:१२०॥

निर्माल्यापनयनङ्कार्यन्तच्च चण्डेश्वरेण तु।
ओं हुं शुद्धेन्दुधौताय नमः॥
शुद्धेन्दोश्च शरीरे स्वे न्यासं कुर्वीत देशिकः॥ १७:१२१॥

निर्माल्यविप्रुषानङ्गं पतन्तः शुद्धिकारणात्।
ओं हुं नेत्रचण्डाय हुं फट्॥
नेत्रचण्डश्च विन्यस्य चक्षुषी स्वे विचक्षणः॥ १७:१२२॥ (f. 45r)

अष्टपुष्पप्रदानेन न निर्माल्यस्य च गाहने।
अकामतोऽथवा कामात् दोषस्तत्र न विद्यते॥ १७:१२३॥

चण्डेशब्रह्मभिस्तोयम्वर्धन्या यत्प्रकल्पितं।
वर्द्धनी चार्घपात्रन्तु लिङ्ग एव समाचरेत्॥ १७:१२४॥

विसर्जितस्य देवस्य गन्धपुष्पनिवेदनम्।
निर्माल्यं तु विजानीयात्त्यक्तवस्त्रविभूषणं॥ १७:१२५॥

आवाहनविसर्गान्तम्प्रत्यहङ्कर्मकर्म्मिणां।
निर्माल्यन्तद्विजानीयाद्यदा देवो विसर्ज्जितः॥ १७:१२६॥

निर्माल्यं सततन्नेष्टं लिङ्गं मूर्धनि संस्थितं।
स्थापितस्य स्वयम्भोर्वा नैव तात्कालिकस्य तु॥ १७:१२७॥

देवं विसर्ज्जयेन्नैव पूजितं लिङ्गमूर्द्धनि।

17:118 °मुक्ताभिः] *conj.*; °मुखाभि C

तावद्यावन्न पूजायाः कालोऽन्यः समुपस्थितः॥ १७ :१२८॥

लिङ्गे वा पिण्डिकायाम्वा यावत्तिष्ठेच्छिवार्चनम्। (f. 45v)
निर्माल्यन्नैव जानीयान्निर्माल्यं पिण्डिकाच्युतं॥ १७ :१२९॥

न लङ्घयेच्च निर्माल्यं स्पृष्ट्वा प्रक्षालयेत्करौ।
यत्र यच्च समुद्दिष्टन्तच्छौचन्तत्र सिद्धिदं॥ १७ :१३०॥

प्रत्यहं विहितं कर्म कुण्डस्योल्लेखनादिकम्।
कुण्डे तु जनयेदग्निन्नित्यनैमित्तकर्मणि॥ १७ :१३१॥

चण्डभस्म भवेत्पश्चाद्यदा देवो विसर्ज्जितः।
कुर्याज्जागरणञ्चास्य यावद्वै गुरुमण्डलं॥ १७ :१३२॥

जनितः संस्कृतो वह्निरतोर्द्ध्वञ्च विसर्ज्जनं।
अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिक्रमं॥ १७ :१३३॥

यं कृत्वाथ चरित्वा तु महापापक्षयो भवेत्।
देवचण्डगुरोर्द्रव्यं कामतो भक्षितं यदा॥ १७ :१३४॥

त्रिलक्षन्तु जपेद्घोरं लक्षमङ्गो जपेत्तथा।
सप्तपञ्चशतान्वह्नौ हुत्वा चैव विशुध्यति॥ १७ :१३५॥

तदर्धेन तु संयोगी अर्धार्धेन तु सङ्करी।
अयुतं प्रतिसङ्करे जप्त्वोपोष्य निशाद्वयं॥ १७ :१३६॥ (f. 46r)

तेषामपि हि येप्यन्ये कलुषिताश्च चेतसि।
शुद्धिस्तेषामघोरेण भवेज्जपसहस्रिका॥ १७ :१३७॥

व्यापादितो यदा लिङ्गी शैवो वान्याश्रमी तथा।
प्रायश्चित्तञ्चरेन्मंत्री गुरूक्तं शिवभाषितं॥ १७ :१३८॥

समस्तं बहुभिर्दत्तमाचार्यैर्गुरुणा विना।
कर्तव्यं शास्त्रसंसिद्धं महापातकशुद्धये॥ १७ :१३९॥

उपपातकसामान्यम्बुध्वातिक्रममादिशेत्।

17:136 °सङ्करे] *em.*; °शङ्करे C

कर्तव्यमात्मनान्यैर्व्वा देशिकैर्न्नेतरैर्ज्जनैः॥ १७ :१४०॥

दशलक्षं जपेत्पूर्व्वं द्विलक्षङ्गड्डुकान्ददेत्।
प्रातःस्नानं शिवे पूजा यावज्जाप्यं समाप्यते॥ १७ :१४१॥

समाप्ते त्रिदिनं नक्तन्निराहारस्तथा त्रयं।
अयाचितत्रयं कृत्वा शुद्धिस्तस्य प्रकीर्तिता॥ १७ :१४२॥

अकामात्पादहीनन्तु विहीनं गड्डुकैश्चरेत्। (f. 46v)
चरेत्पादं सकामोऽपि तत्संयोगी विशुद्ध्यति॥ १७ :१४३॥

पादार्धेन त्वकामस्य पादात्पादं हि सङ्करे।
तृतीये वा चतुर्थे वा पादहीनञ्चरेत्क्रमात्॥ १७ :१४४॥

पादोनम्भगवन्तस्य ततः पादं द्विजे हते।
तत्तुल्यन्तु हते बौद्धे पादोनं क्षपणे हते॥ १७ :१४५॥

वर्ण्णशुद्धिः सकामानामकामेऽर्द्धं विधीयते।
एवं जपः प्रकर्त्तव्यो गड्डुकानां क्रमस्तथा॥ १७ :१४६॥

व्रतागमेषु सर्व्वेषु महापातकशुद्धये।
समयिनञ्च गाङ्कन्यां हत्वा लक्षं जपेन्नरः॥ १७ :१४७॥

उपोष्य रजनीः पञ्च गड्डुकानां शतत्रयम्।
दत्वा शुद्धिमवाप्नोति पादोनं वाप्यकामतः॥ १७ :१४८॥

यो निन्देत गुरुं शास्त्रमयुतस्य जपाच्छुचिः।
सहस्रं यतिकन्यानाङ्गवाञ्च गुरुमातरं॥ १७ :१४९॥

निन्दाशुद्धिरघोरेण जपेन तु भवेन्मुने।
उपेक्षितं गुरोर्द्रव्यन्देवचण्डगणस्य च॥ १७ :१५०॥ (f. 47r)

न्यासं कृत्वा तु वा तस्य कामतस्तस्करादिभिः।
पञ्चविंशसहस्राणि अघोरेण जपेच्छुचिः॥ १७ :१५१॥

व्रतिने च हते क्रोधाद्यदि मृत्युर्न्न जायते।

17:140 °त्मना°] *em.*; °न्मना° C   17:144 सङ्करे] *em.*; शङ्करे C

रक्तस्य दर्शनं दृष्ट्वा लक्षत्रयञ्जपेद्बुधः॥ १७:१५२॥

रक्तं न दृश्यते वाथ तदा लक्षेण शुद्ध्यति।
किन्तु दद्यात्सहस्रैकङ्गड्डुकानां शिवस्य तु॥ १७:१५३॥

अकामात्कामतो प्येवं शुद्धिर्वै नान्यथा भवेत्।
गुरुं लिङ्गन्तथा शास्त्रं प्रतिमाम्वाप्यकामतः॥ १७:१५४॥

पादेन यदि संस्पृष्टा अयुतं च जपेद्द्वयम्।
कामतः षड्गुणङ्कार्यङ्गड्डुकानां शतत्रयं॥ १७:१५५॥

तदा निर्दोषताम्मन्त्री नान्यथा शुद्धिमर्हति।
गुरुशय्यासने याने पादुकोपानहौ तथा॥ १७:१५६॥

अकामाद्रोहणङ्कृत्वा सहस्रावर्त्तने शुचिः।
ज्ञात्वा यदारुहेत्प्राज्ञस्तदा वै षड्गुणं चरेत्॥ १७:१५७॥ (f. 47v)

अघोरेण चरेत् मन्त्री पापशुद्धिस्तदा भवेत्।
आज्ञालोपं गुरोः कृत्वा शिवे चण्डश्वरेपि वा॥ १७:१५८॥

लक्षम्वै जपतः शुद्धिर्गड्डुकानां शताष्टभिः।
अकामादयुतं जाप्यं गड्डुकानां शतं भवेत्॥ १७:१५९॥

आदेशं गुरु विलोप्य शतसाहस्रिकं जपेत्।
प्रायश्चित्ते कृते शुद्धिरकामात्सहस्रञ्जपेत्॥ १७:१६०॥

नित्यक्रियाविलोपे तु जपहोमार्च्चनादिके।
जपेत्पञ्चशतं घोरं कामतः शुद्धिरिष्यते॥ १७:१६१॥

भूपिण्डमेकसन्तानं धारा धूपश्च मक्षिका।
लिङ्गार्च्चने न दुष्यन्ति विप्रुषश्चाप्यकामतः॥ १७:१६२॥

गुरुपुस्तकवह्नीनां यक्षनागेन्द्रयोगिनां।
गणमात्र्यम्बिकादीनां न निर्माल्यं शिवे यथा॥ १७:१६३॥

गुरोर्व्याख्ये शिवाख्ये च प्रदक्षिणविसर्ज्जिते।
चललिङ्गे चत्वरे च चित्रे रत्ने च हेमजे॥ १७:१६४॥ (f. 48r)

न निर्माल्यन्दशस्थानेष्वन्यथा तु निरोधकृत्।
देवस्वं देवद्रव्यञ्च नैवेद्यञ्च निवेदनं॥ १७ : १६५ ॥

चण्डद्रव्यञ्च निर्माल्यं षड्विधं परिकीर्तितं।
देशविषयग्रामादि दासीधान्यचतुष्पदं॥ १७ : १६६ ॥

देवस्वन्तद्विजानीयाद्देवद्रव्यमतः शृणु।
वस्त्रालङ्कारधातूनि मणिरत्नादि यानि च॥ १७ : १६७ ॥

देवद्रव्यं समुद्दिष्टं नैवेद्यं साम्प्रतं शृणु।
भक्ष्यभोज्यान्नपानादि देवार्थे यत्प्रकल्पितं॥ १७ : १६८ ॥

नैवेद्यं तद्विजानीयान्निवेदम्पिण्डिकोपरि।
अपरेऽहनि संहृत्य पिण्डिकाकोणसङ्गतं॥ १७ : १६९ ॥

भक्ष्यादिभक्ष्यपानादि देवाय यत्प्रकल्पितं।
चण्डद्रव्यन्तु तं ज्ञेयन्निर्माल्यं यत्करोज्झितं॥ १७ : १७० ॥

न तज्जिघ्रेन्नलङ्घेत न दद्यान्न च विक्रयेत्।
दत्वा क्रव्यादतां याति भुक्त्वा मातङ्गताम्व्रजेत्॥ १७ : १७१ ॥

लंघनात्पतते सिद्धिं जिघ्रते च वृको भवेत्। (f. 48v)
स्पर्शनात्तु नरः स्त्रीत्वञ्जायते नात्र संशयः॥ १७ : १७२ ॥

अन्यथादहने चैव चाण्डालो जायते नरः।
विक्रीणाति यदा पापी लुब्धकः शबरो भवेत्॥ १७ : १७३ ॥

अष्टधा यो न जानाति निर्माल्यस्य विधिक्रमं।
देशिकः साधकः पुत्रः समयी तु विरुध्यते॥ १७ : १७४ ॥

॥ इति प्रतिष्ठापारमेश्वरे महातन्त्रे प्रायश्चित्तपटलं समाप्तं॥

॥ देवीमते प्रायश्चित्तं लिख्यते॥

विशेषं सम्प्रवक्ष्यामि शृणुष्वेकाग्रमानसा।

17:166 दासी°] *em.*; दाशी° C   17:168 भक्ष्य°] *em.*; भक्ष° C   17:170 °दिभक्ष्य°] *em.*; °दिभक्ष° C   17:173 शबरो] *em.*; सबरो C   18:1 °वक्ष्यामि] *em.*; °वक्षामि C

अष्टम्याञ्च चतुर्दश्याम्पक्षयोरुभयोरपि॥ १८ : १॥

पूजाध्यानं जपो होमो द्विगुणं समुपाचरेत्।
पूर्ण्णमास्यां तु संक्रान्तौ ग्रहणे चन्द्रसूर्य्ययोः॥ १८ : २॥

पर्व्वोत्सवेषु सर्व्वेषु पूजाद्यञ्चाधिकं भवेत्।
निर्घातसन्निपाते च पूर्व्वोक्तं विधिमाचरेत्॥ १८ : ३॥ (f. 49r)

प्रदद्याद्गड्डुकाद्यञ्च जपाद्यञ्च विशेषतः।
स्वप्ने शुभाशुभे दृष्टे पूजाहोमजपादिकं॥ १८ : ४॥

प्रत्यक्षावेशने देव्याः क्षेत्रपालप्रदर्शने।
उल्कापाते मृते वीरे जपपूजाधिकं भवेत्॥ १८ : ५॥

यागश्चैव प्रकर्त्तव्यो लिङ्गस्यैव च पूरणं।
पुष्पैर्व्वा सुमनोज्ञैश्च पद्मैर्न्नीलोत्पलादिकैः॥ १८ : ६॥

फलैर्व्वा विविधैर्दिव्यैर्देवि भक्तैः समुज्ज्वलैः।
लिङ्गपूरणकं कृत्वा पश्चाद्वीरैश्च भोजनं॥ १८ : ७॥

अन्यथा न भवेत् मोक्षः सिद्धिश्चैव सुदूरतः।
अभावे वा कृते वाथ आपदाद्यैः क्रियार्थिभिः॥ १८ : ८॥

द्विगुणस्तु जपः कार्यः संध्यालोपे तु देशिकः।
प्रमादात्कथितं रुद्रे कामतस्तु चतुर्गुणः॥ १८ : ९॥

प्रमादाह्निकविच्छेदे कर्त्तव्यञ्च चतुर्गुणं।
प्रमादाद्धोमविच्छेदे हुत्वा तु द्विशतं जपेत्॥ १८ : १०॥ (f. 49v)

कामाच्चतुर्गुणं हुत्वा जपञ्चैव चतुर्गुणं।
प्रमादाज्जपभङ्गे तु तत्पूर्व्वन्तत्समञ्जपेत्॥ १८ : ११॥

प्रमादाद्ध्यानविच्छेदे द्विगुणं ध्यानमाश्रयेत्।
प्रमादाच्चलिते लिङ्गे स्थिरे वा चलसञ्ज्ञके॥ १८ : १२॥

पीठे वा पिण्डिकायाम्वा विद्यालक्षं जपेद्बुधः।
चललिङ्गेऽग्निदग्धे च तस्करेण हृतेऽथवा॥ १८ : १३॥

प्रायश्चित्तं स्मृतं लक्षं तत्र विद्याजपः प्रिये।
हस्तात्तु पतिते लिङ्गे जले वहति वा स्थिरे॥ १८:१४॥

तत्रापि लक्षमावर्त्य पुनःसंस्कारमर्हति।
जपतस्त्वक्षसूत्रस्य पतनादयुतं जपेत्॥ १८:१५॥

निद्राभिभूतस्तु यदा निपतेत्साधको भुवि।
तदार्द्धलक्षं जप्तव्यन्न पतेदयुतं जपेत्॥ १८:१६॥

देवं गुरुं तथा शास्त्रं प्रतिमाम्वाप्यकामतः।
पादेन यदि संपृष्टा अयुतञ्च जपेद्द्वयं॥ १८:१७॥ (f.50r)

कामतः षड्गुणं कार्यं गड्डुकानां शतत्रयं।
विसर्ज्जितस्य देवस्य गन्धपुष्पनिवेदनं॥ १८:१८॥

निर्म्माल्यन्तु विजानीयाद् वर्ज्ज्यं वस्त्रविभूषणं।
आवाहनविसर्ग्गान्तं प्रत्यहं कर्मकर्म्मिणां॥ १८:१९॥

निर्म्माल्यन्तद्विजानीयाद्यदा देवो विसर्ज्जितः।
निर्म्माल्यं सततं नेष्टं लिङ्गमूर्द्धनि संस्थितं॥ १८:२०॥

स्थापितस्य स्वयम्भोर्वा नैव तत्कालिकस्य तु।
देवं विसर्ज्जयेन्नैव पूजितं लिङ्गमूर्द्धनि॥ १८:२१॥

तावद्यावन्न पूजायाः कालोऽन्यः समुपस्थितः।
लिङ्गे वा पिण्डिकायां वा यावत्तिष्ठति चार्च्चनं॥ १८:२२॥

निर्म्माल्यन्नैव जानीयान्निर्म्माल्यं पिण्डिकाच्युतं।
गुरु वा लघु वा कर्म ज्ञात्वा चैव विभागतः॥ १८:२३॥

प्रायश्चित्तन्तु दातव्यं शास्त्रोक्तं गुरुभाषितं। (f.50v)
गुरुवाक्यं प्रमाणम्वै किन्तु तद्भाषितम्मया॥ १८:२४॥

यद्ददाति गुरुः शिष्ये तेन शुद्धिर्यथा शिवे।
लक्षाध्यायी गुरुः प्रोक्तः सर्वत्र च्छिन्नसंशयः॥ १८:२५॥

18:15 °मर्हति] *em.*; °महति C (unmetrical) 18:19 विजानीयाद्] *em.*; विजानीया C

रागद्वेषविनिर्मुक्तो मात्सर्येर्ष्यानृतादिभिः।
सोऽपि दद्याद्बलं ज्ञात्वा कालपात्रवयोवसु॥ १८:२६॥

प्रायश्चित्तं विशुद्ध्यर्थं परेषां गुरुकर्मणि।
प्राणपीडा महायासो यथा वै न भवेन्नृणां॥ १८:२७॥

दातव्यङ्कर्मसारेण संक्षिप्तं सुविभाजितं।
अन्यैरपि हि कर्त्तव्यम्भगिनीभ्रातृशिशुप्रियैः॥ १८:२८॥

उत्पन्ने प्राणसन्देहे सम्पाद्यञ्च ततो परैः।
अथ वृद्धातुराबालाव्याध्याधिपरिपीडिताः॥ १८:२९॥

तेषां संक्षिप्तमेवोक्तं स्त्रीणाञ्चैव तथा भवेत्।
महापातकशुद्ध्यर्थङ्गुरुर्दद्यात्समं यथा॥ १८:३०॥ (f.51r)

उपपातकसामान्यं बुद्ध्वातिक्रममाचरेत्।
एवमन्यानि पापानि उक्तानुक्तानि यानि तु॥ १८:३१॥

जपोपवासभोगेनाशुद्धान्ये शुद्धिभाग्भवेत्।
दीक्षितस्याभिषिक्तस्य शिवयुक्तस्य निश्चितं॥ १८:३२॥

यदा वै चलते भक्तिरन्यद्गुर्वन्तरं व्रजेत्।
नैताभिषिक्तमात्रस्य नश्यते पूर्वसञ्चितं॥ १८:३३॥

आक्रोषितस्ताडितो वा यदा वान्यत्र गच्छति।
तदा तु निष्फला दीक्षा इत्येव चेश्वरोऽब्रवीत्॥ १८:३४॥

गुरुणा तु यथा प्रोक्तं प्रायश्चित्तं विपश्चिते।
तत्तथैव तु कर्त्तव्यम्विशुद्धेनान्तरात्मना॥ १८:३५॥

आचार्येण यदादिष्टं प्रायश्चित्तं भवेत्तदा।
अन्यथा नरकं याति नान्यद्दत्तम्भवेत्क्वचित्॥ १८:३६॥

शिष्यान्परीक्ष्य यत्नेन दीक्षयेत्प्रतिबोधयेत्। (f. 51v)

18:30 संक्षिप्तम्] C^{pc}; क्षिप्तं C^{ac} (unmetrical) **18:30** °शुद्ध्यर्थ°] C^{pc}; °शुद्ध्य° C^{ac} (unmetrical) **18:31** °क्रममा°] C^{pc}; °क्रमा° C^{ac} (unmetrical) **18:34** आक्रोषितस्ताडितो वा] C^{pc}; अक्रोषितथस्तादितो C^{ac} **18:35** °त्मना] *em.*; °त्मणा C **18:37** °बोधयेत्] *em.*; °बोधयत् C

शिष्यदोषैः स्वदोषैश्च बाध्यते दीक्षितो गुरुः॥ १८ : ३७॥

प्रेषणाद्वाथ संसर्गाद्यदि स्याद्दुर्नयः पशुः।
दुष्टभावम्परित्यज्य तदा तं प्रतिबोधयेत्॥ १८ : ३८॥

बोधितोऽपि प्रयत्नेन यदासौ नावरुध्यते।
निर्व्विवेकन्तु तं दृष्ट्वा यत्नात्तु परिवर्ज्जयेत्॥ १८ : ३८॥

यो व्यभिचारेण शिष्यं दीक्षयेत्स्वेच्छया गुरुः।
आचार्यः सह शिष्यैस्तु पतते नरके ध्रुवं॥ १८ : ३९॥

शिष्याः शिष्यगुणोपेता आचार्यस्तु गुणोज्झितः।
दीक्षितास्तु न मुच्यन्ते दीक्षको नरकं व्रजेत्॥ १८ : ४०॥

आचार्यः स्वगुणोपेतो दीक्षिता व्यभिचारिणः।
दीक्षिता नरकं यान्ति आचार्यः शिवतां व्रजेत्॥ १८ : ४१॥

सुपरीक्ष्य गुणोपेतांच्छिष्यान्यो दीक्षयेद्गुरुः।
स गुरुः स शिष्यैस्तु प्रयाति परमम्पदं॥ १८ : ४२॥ (f. 52r)

परीक्षा त्रिविधा प्रोक्ता शिष्याणां शिवशासने।
कालेन सन्नियोगेन स्वभावेनागमेन च॥ १८ : ४३॥

गुरुशय्यासनं यानं पादुकोपानहौ तथा।
अकामाद्रोहणं कृत्वा सहस्रावर्तने शुचिः॥ १८ : ४४॥

ज्ञात्वा यदारुहेत्प्राज्ञस्तदा वै षड्गुणं जपेत्।
अघोरेण चरेन्मन्त्री पापशुद्धिस्तदा भवेत्॥ १८ : ४५॥

कुमारीङ्गान्तथा वह्निं यतिनञ्चापि सुन्दरि।
पादेन संस्पृशेत्मोहात् सोऽपि पञ्चशतैः शुचिः॥ १८ : ४६॥

दीक्षितानान्तिरस्कारन्दत्वा क्रोधवशं गतः।
जपेत्पञ्चशतान्मन्त्री अघोरेण विशुध्यति॥ १८ : ४७॥

आसनं शयनं यानम्प्रमादाद्गुरुसन्निधौ।
शतेनारुह्य जप्तेन भवेच्छुद्धिरकामतः॥ १८ : ४८॥

18:40 यो व्यभिचारेण] *conj.*; येऽव्यभिचारिणः C

कामतः षड्गुणं जप्त्वा अघोरेण विशुध्यति।
पैशुन्ये द्वेषवादे वा विरुद्धञ्जल्पितं यदि॥ १८:४९ ॥ (f. 52v)

ज्येष्ठादिभिः सहान्यैर्वा प्रायश्चित्तं शतं जपेत्।
त्रिगुणञ्जप्त्वा तु वर्गाणामेवं शुद्धिरुदाहृता॥ १८:५० ॥

गुरुणापि समं जल्पं कृत्वा रोषपदे स्थितः।
जप्त्वा वाऽष्टसहस्रन्तु अघोरस्य भवेच्छुचिः॥ १८:५१ ॥

तम्पुनस्तु विशेषेण वन्दयित्वा क्षमापयेत्।
न नमन्ति च ये मोहात्क्रमायातान्महत्तरान्॥ १८:५२ ॥

तेषामप्ययुताच्छुद्धिरनुतापाद्भवेत् प्रिये।
गड्डुकानाम्प्रदाने तु ह्रासयेच्छतगुणञ्जपं॥ १८:५३ ॥

होमे दशगुणाहानिर्ज्ञात्वैवं संप्रयोजयेत्।
देवस्य गड्डुकाद्यास्तु पादेन स्पृशते यदि॥ १८:५४ ॥

अकामात्तु शतं जाप्यं कामतश्चायुतं जपेत्।
पुस्तके पतिते हस्तादघोरस्यायुतं जपेत्॥ १८:५५ ॥

तत्सूत्रम्भूगतं ग्राह्यं भूमौ पुस्तकवाचने। (f. 53r)
आसने शयने स्थाप्य पटले वा गृहस्य च॥ १८:५६ ॥

विद्यापञ्चशतं जाप्यङ्कामतस्तुद्विधा भवेत्।
शीर्णागमं स्वसिद्धान्तम्भग्नं शीर्णं घृतप्लुतं॥ १८:५७ ॥

अग्निकुण्डे तु होतव्यं हुत्वा विद्याशतं जपेत्।
निर्विनोदं द्विजं हत्वा कामचारेण मन्त्रिणा॥ १८:५८ ॥

विद्यायाः पारणी भद्रे जाप्या शतसहस्रिका।
ओं नमो भगवते रुद्राय शूलपाणये हन २ दह २ पच २ नाशय २ सर्वपापं भक्ष २ ह्रीं हूं फट् स्वाहा॥
समयलोपने ख्याता विद्या पापप्रनाशनी॥ १८:५९ ॥

18:54 °रनुतापाद्] *conj.*; °रापाताद् C (unmetrical) 18:55 °हानिर्] *conj.*; °हानि° C 18:57 आसने] *em.*; आशने C 18:57 पटले] *conj.*; पडले C 18:60 विद्यायाः] *em.*; विद्याय C 18:60 शूलपाणये] *em.*; शूलपानये C

अन्यांश्च मानुषान्हत्वा तदर्द्धमविनोदिनः।
क्षपणं बौद्धलिङ्गम्वा तथा वैष्णवलिङ्गिनं॥ १८ : ६०॥

न हन्यान्निर्न्निमित्तञ्च हत्वा चैवायुतं जपेत्।
हत्वा तांस्तु न दोषोऽस्ति देवाग्निगुरुनिन्दकान्॥ १८ : ६१॥ (f. 53v)

शिवव्रतधरच्छायालङ्घनाच्छतधा जपेत्।
हत्वा च तान्नकामेन पञ्चधा चायुतं जपेत्॥ १८ : ६२॥

कामतो द्विगुणं जाप्यं कलहेनायुतं जपेत्।
अकामाल्लिङ्गभेदेन लक्षपञ्चाशतं जपेत्॥ १८ : ६३॥

कामतो द्विगुणं जाप्यं गुरुभ्यः सम्मतेन तु।
गुरुद्रोहे कृते चैव अज्ञानान्मोहवासनात्॥ १८ : ६४॥

पुनः सन्तापनं कृत्वा तद्गुरोर्यदि सम्मतं।
तदा लक्षञ्जपन्तस्य दातव्यं गुरुणा प्रिये॥ १८ : ६५॥

आत्मघाती गुरोर्घाती घाती चैव परस्परं।
प्रमादात्तापनङ्कृत्वा प्रायश्चित्तं विमार्गति॥ १८ : ६६॥

विद्यालक्षं जपन्तस्य दातव्यं गुरुणा प्रिये।
गुरुं सन्तोष्य यत्नेन पुनःसंस्कारमर्हति॥ १८ : ६७॥

विजने च शुचिस्थाने जप्तव्यं यावत्पूर्यते।
प्रायश्चित्ते सुचीर्ण्णेतु वर्त्तयेच्चाविरोधतः॥ १८ : ६८॥ (f. 54r)

चीर्ण्णेऽपि च पुनर्दोषैः संपर्क्को यदि जायते।
अनुच्चार्यन्तदा तस्य प्रायश्चित्तं न विद्यते॥ १८ : ६९॥

॥ इति देवीमते प्रायश्चित्तपटलं समाप्तमिति॥

॥ हंसपारमेश्वरे महातन्त्रे प्रायश्चित्तं लिख्यते॥

प्रायश्चित्तञ्च नैवेद्यं निर्माल्यं नावगाहयेत्।

18:64 अकामाल्लिङ्ग°] *em.*; अकाल्लिङ्ग° C (unmetrical) **18:65** द्विगुणं] *em.*; द्विगुण C **19:0** महातन्त्रे] *em.*; महान्त्रे C

न च तत्कस्यचिद्दद्यान्मुक्त्वा चाद्वैतकल्पना॥ १९ :१॥

समानोच्छिष्टसंस्पर्शादाचम्येशशतञ्जपेत्।
†वक्त्रादयो द्विजेंद्रादि ईशाः शङ्करनायकाः॥ १९ :२॥ †

क्षत्रविट्शूद्रसंस्पर्शादेकद्वित्रिगुणं द्विजः।
तत्र जपेत्स्वजातीशं सिद्ध्यै निरशनः शुचिः॥ १९ :३॥

जातिलिङ्गाङ्गतत्त्वेषु यत्कार्यमुपजायते।
शोध्यं तत्तदीशैस्तु ब्रह्मभिर्ब्रह्मवेदिना॥ १९ :४॥

यमुद्दिश्य विवेकः स्यात्संस्पृष्टो न्यूनजातिना। (f. 54v)
सर्वेषाम्बाह्यसंस्पर्शे स्वजातीशपुरःसरं॥ १९ :५॥

अङ्गस्यासंयमनाद्वापि येन तत्कर्म कारितं।
महापातकसम्भूतौ जपाद्ध्यानाच्च शुध्यति॥ १९ :६॥

अनुरोधात्तथा भुक्त्वा जपेल्लिङ्गेश्वरं शतं।
सद्यसोद्धृतलिङ्गानां शैवाचार्यानुवर्तिनां॥ १९ :७॥

पादार्थिकपरिव्राजे रूपो वक्त्रः कपालिनां।
बौद्धादिशैवलिङ्गानां गृहस्थानामयं मतः॥ १९ :८॥

कपाललिङ्गिनां भुक्त्वा पुनर्दीक्षान्तु कारयेत्।
लिङ्गोद्धरणपूर्व्वान्तात् स्वयङ्कुर्यात्परोऽपि वा॥ १९ :९॥

लिङ्गस्यैव समुद्धारो जातीशैरन्नसङ्करात्।
कादिविद्याप्रसिद्ध्यर्थन्तच्छक्तिगुणहेतवे॥ १९ :१०॥

स्वाहया योजने क्षेपे मण्डलाब्जस्य क्षेपणे।
हेमतारायसाब्जाश्ममणिभाजनशोधनं॥ १९ :११॥

स्यात्स्नेहलेपगन्धघ्नं सचूर्णेण जलेन तु। (f. 55r)
वारिणा मृण्मयं शोध्यं यन्न भोजनभाजनं॥ १९ :१२॥

दारवं लोहकोद्घुष्टं तत्क्षणाद्रुपघातितं।

19:8 °शैवलिङ्गानां] *em.*; °शैवलिङ्गाना C **19:10** °सङ्करात्] *em.*; °शङ्करात C (unmetrical)

वंशतुम्बादिगोवालैर्व्वैदलानान्तथैव च॥ १९ :१३॥

ताम्रस्याम्लेन शुद्धिः स्यात्कांस्यपात्रस्य भस्मना।
नकुलश्वाहिकीटाद्यैरवलीढं मृदग्निना॥ १९ :१४॥

श्वगोखरोष्ट्रसंलीढं पार्थिवन्तु परित्यजेत्।
दुष्टास्त्री रजसा शुद्ध्येत्सत्याद्वाग्वेगतो नदी॥ १९ :१५॥

भृत्यस्थङ्कारुहस्तस्थं पण्यम्विक्रयमाकरात्।
अदृष्टं धौतमद्भिस्तु शकुनिः फलपातने॥ १९ :१६॥

क्षिप्रमुद्धरतः शुद्धं यच्च वाचा प्रशस्यते।
क्ष्मा गोक्रान्ता दग्धा सिक्ता शुद्धेल्लेखितलेपिना॥ १९ :१७॥

रथ्यामार्गगतं स्पृष्टं वातचन्द्रार्क्करस्मिभिः।
वने भृतानि पूतानि न पूतानि समुद्धरेत्॥ १९ :१८॥ (f. 55v)

त्यक्त्वा केशे तथालक्ष्ये भस्ममृज्जलकेऽपि वा।
स्थानाजीर्णे भ्रमाच्छुद्धिर्मात्रामादाय नैकशः॥ १९ :१९॥

नाभेरूर्ध्वे मतं स्नानमुपघाते सकूर्प्परे।
न निन्द्याच्छिवमाचार्यन्न शास्त्रन्दीक्षितान्न च॥ १९ :२०॥

गाश्च वेदास्तथांगानि वेदेसूक्तानि देहिनः।
यावज्जीवं सदा पूज्ये स्वगुरोः काष्ठपादुके॥ १९ :२१॥

समक्षम्वा परोक्षम्वा पीठस्थे शिववद्गृहे।
कथञ्चित्पतिते लेख्ये भूमौ मुक्ते तथासने॥ १९ :२२॥

पतिते च तथा सूत्रे पटलस्थे शिवम्व्रजेत्।
जलाग्निपतने वापि संन्यस्तामरणे तथा॥ १९ :२३॥

न मृता हीनसत्वा ये तेषां शुद्धिं वदाम्यहं।
लक्षार्द्धङ्डुकानान्तु पञ्चलक्षाणि वै जपेत्॥ १९ :२४॥

तावत्स्नानर्च्चनन्तस्य यावज्जाप्यं समाप्यते।

19:14 कांस्यपात्रस्य] *em.*; कांशपात्रस्य C 19:14 भस्मना] *conj.*; भन C (unmetrical)

कामतस्तु विशुध्येत संन्यासेऽग्नौ जलेऽपि वा॥ १९ : २५ ॥ (f. 56r)

पतनस्य न दोषोऽस्ति प्राप्ते आरोहणम् विना।
मार्गान्निर्वर्त्तनोहीना असन्यस्ते त्वपागते॥ १९ : २६ ॥

महापथे चाप्येवं स्याद्भैरवेऽपि समाचरेत्।
तन्त्रार्थञ्चैव मन्त्राणां श्रावणं लक्षणन्न च॥ १९ : २७ ॥

पशोर्दीक्षां न कुर्व्वीत रजःपातं न दर्शयेत्।
त्रिकालमेककालम्वा स्वस्थात्मा शिवमर्च्चयेत्॥ १९ : २८ ॥

ध्यायेज्जपेद्धुनेद्वह्निं शिवात्पूर्व्वन्न खादयेत्।
कांस्यदत्तन्तुनाश्नीयात्भक्तम्पानञ्च वर्ज्जयेत्॥ १९ : २९ ॥

अक्षालितकटिवस्त्रं धारयेन्न कदाचन।
अष्टम्याञ्च चतुर्दश्यां पञ्चदश्याञ्च पक्षयोः॥ १९ : ३० ॥

पूजाद्यमधिकं कुर्यादयनेषु च पर्व्वसु।
तैलम्मांसं स्त्रियं क्षौरं त्यजेन्मद्यञ्च मद्यपः॥ १९ : ३१ ॥

चरुभुग्वर्त्तयेत्तासु नक्ते नेकासनेन वा।
रोगार्त्तमद्ध्वखिन्नञ्च भीतं त्रस्तं सुविह्वलं॥ १९ : ३२ ॥ (f. 56v)

पालयेत्समयज्ञन्तु शैवमन्यञ्च मानवः।
अन्नं पुष्पवतीस्पृष्टं गर्भकर्म्मणि संस्कृतं॥ १९ : ३३ ॥

निष्क्रामण्याञ्चतुर्थ्याञ्च न खादेन्नामकर्मणि।
आरामोदककीर्त्तीनान्थैव तरुकल्पनं॥ १९ : ३४ ॥

कर्णवेधे तथा चूडे प्राशनेऽन्नञ्च वर्ज्जयेत्।
पुष्पोत्सवे न भोक्तव्यं सूतके मृतके तथा॥ १९ : ३५ ॥

॥ इति हंसपारमेश्वरे महातन्त्रे प्रायश्चित्तप्रकरणं समाप्तमिति॥

॥ पञ्चशतिकहंसपारमेश्वरे महातन्त्रे प्रायश्चित्तं लिख्यते॥

19:26 दोषोऽस्ति] *em.*; दोस्ति C (unmetrical) **19:31** मांसं] *em.*; °मासं C **19:32** त्रस्तं] *em.*; त्रस्त C **19:35** प्राशने] *conj.*; प्रासने C

सन्मार्गाणान्द्विजातीनां भोज्यमन्नम्प्रकीर्त्तितं।
सूद्रस्य मद्यपस्यैव न भोज्यं स्याद्विजोत्तम॥ २०:१॥

ब्रह्मचारी गृही चैव भोज्यावेतौ प्रकीर्तितौ।
शैवाचार्यौ च तावेव परानुग्रहकारकौ॥ २०:२॥

ब्रह्मचर्यपरित्यागादभोज्याः शिवनैष्ठिकः। (f. 57r)
नित्यं सर्वगुणोपेता न भोज्याः परलिङ्गिनः॥ २०:३॥

शैवाः स्वायम्भुवा ये च स्वाचारस्था न दीक्षिताः।
तेषामपि न भोक्तव्यमित्याह परमेश्वरः॥ २०:४॥

॥ इति पञ्चशतिकपारमेश्वरे प्रायश्चित्तमिदं॥

॥ तिलकपारमेश्वरे प्रायश्चित्तं लिख्यते॥

स्वेष्टलिङ्गे हृते नष्टे दग्धे चैव प्रमादतः।
प्रायश्चित्तं भवेल्लक्षं मन्त्रस्यारोहणं पुनः॥ २१:१॥

प्रमादात्पतितं भूमौ पशुस्पृष्टमथापि वा।
दशसाहस्रिकं जाप्यं कुर्यात्संस्कारमौलिकं॥ २१:२॥

हस्तात्प्रच्यवितं लिङ्गं सहस्रैः पञ्चभिः शुचिः।
द्विहस्तात्तु यदा लिङ्गं पतितन्तु प्रमादतः॥ २१:३॥

तदा लक्षेण शुद्धिः स्यात्पुनःसंस्कारमौलिकं। (f. 57v)
नरमात्राच्च्युतं लिङ्गं यदा भिन्नं प्रमादतः॥ २१:४॥

प्रायश्चित्तन्न तस्यास्ति शलाकापतितं यतः।
स्थावरं जङ्गमञ्चैव लिङ्गन्तु द्विविधं स्मृतं॥ २१:५॥

कामतोऽकामतो वापि घातितं स्फोटितं यदा।
प्रायश्चित्तन्न तस्यास्ति इत्याह भगवांच्छिवः॥ २१:६॥

लिङ्गोत्पाटं महाघोरमधिक्षेपं तपस्विनां।

21:1 प्रमादतः] *em.*; प्रामादतः C **21:5** स्थावरं] *em.*; स्थारं C (unmetrical) **21:7** तपस्विनां] *em.*; तपश्विनां C

न क्षमामि द्विजश्रेष्ठ ब्रह्मकेशवयोरपि॥ २१ : ७ ॥

शलाकापतितस्यैव प्रायश्चित्तन्निगद्यते।
शलाकापतितं दृष्ट्वा देशं त्याज्यं तु देशिकैः॥ २१ : ८ ॥

दुर्भिक्षम्व्याधयस्तस्मिन्नीतयश्च निरन्तराः।
ते देशा नैव वृद्ध्यन्ते न च दीर्घायुषो नराः॥ २१ : ९ ॥

सप्त वैद्यापरे तन्त्रे तिलके तु तथैव च।
शलाकापतितं विप्र ज्ञायते नात्रसंशयः॥ २१ : १० ॥

नातः परतरङ्किञ्चिद्धर्मार्थकाममोक्षदं। (f. 58r)
दृश्यते नैव भूलोके एवं मे निश्चयः स्थितः॥ २१ : ११ ॥

अपवादाद्गुरोर्वाचः शुद्धिरब्दान्नियम्य तु।
परेभ्यो दुःखमुत्पाद्य वाङ्मनःकायकर्मभिः॥ २१ : १२ ॥

प्रमादतः परिज्ञाय शुद्धिः शक्तिजपात्तदा।
अकामात्ब्राह्मणं हत्वा गवाङ्गोष्ठे जपेज्जपं॥ २१ : १३ ॥

अकामाच्च सुरां पीत्वा जपेद्यामं शिवालये।
उपपातकिनामेष सर्व्वेषां च विधिः स्मृतः॥ २१ : १४ ॥

गोघ्नस्त्रिरुषितो भूत्वा सद्यं पञ्चशतं जपेत्।
स्नानं च पञ्चगव्याशी पुण्यस्थाने समाश्रितः॥ २१ : १५ ॥

गोवधान्मुच्यते क्षिप्रमत्र नास्ति विचारणा।
दिवा वा यदि वा रात्रौ दुःस्वप्नं यदि पश्यति॥ २१ : १६ ॥

स्नात्वा जपेत्ततः सद्यन्तस्मात्मुच्येत किल्बिषात्।
पितुर्मातुः श्वसुश्चापि पितृव्यस्य वधस्तथा॥ २१ : १७ ॥ (f. 58v)

मातुलस्य वधश्चैव सामान्यं ब्रह्महत्यया।
क्षत्रियादित्रयं हत्वा पादन्यूनो जपो भवेत्॥ २१ : १८ ॥

वधं कृत्वान्त्यजानान्तु कृमिपक्षिमृगेषु च।
तत्र न्यूनं शताद्यावज्जपं युज्ज्याद्दशावधि॥ २१ : १९ ॥

21:7 °श्रेष्ठ] *em.*; °श्रेष्ट C

अग्निदं गरदश्चैव तथा द्रव्यापहारकं।
शस्त्रपाणिं रणे विप्रं हत्वा नो पातकं भवेत्॥ २१ : २०॥

रेतोमूत्रपुरीषाणां श्वपचान्नस्य भक्षणं।
तदम्भसश्च तत्पानं सुरापानसमो गणः॥ २१ : २१॥

न्यूनन्यूनविधिर्योज्या निखिलास्वन्त्यजातिषु।
अभक्ष्याच्चान्नपानाद्वा विधिसूत्राधिकः परः॥ २१ : २२॥

॥ इति तिलकपारमेश्वरे प्रायश्चित्तप्रकरणं समाप्तमिति॥

॥ मतङ्गपारमेश्वरे महातन्त्रे प्रायश्चित्तं लिख्यते॥ (f. 59r)

श्वमार्ज्जारखरादीनाम्विल्लेपात्स्नानमाचरेत्।
नाभेरधः संयोगात् मृत्भिः शुध्यति सप्तभिः॥ २२ : १॥

उत्तमाङ्गो यदालिप्तः स्नात्वा विद्याङ्गपञ्चकं।
जप्तव्यं शतमेकन्तु द्विगुणं मन्त्रवादिना॥ २२ : २॥

अदीक्षितेन संस्पृष्टः स्नानमाग्नेयमाचरेत्।
बाह्यवर्णस्य संस्पर्शाद्वारुणं स्नानमाचरेत्॥ २२ : ३॥

रेतोत्सर्गकृते स्नात्वा जप्तव्यं ब्रह्मपञ्चकं।
निर्माल्यशङ्करे कामात्संपूज्य चण्डनायकं॥ २२ : ४॥

जप्त्वा तद्वुत्तं कार्यं जपः साङ्गस्य वै शतं।
अकामतोऽपि †सम्राडात्†केवलस्य शतं जपेत्॥ २२ : ५॥

यदन्नं केवलं भुक्त्वा प्रमादात्मुनिसत्तम।
मृत्पात्रमग्निना दग्धं शंकतः शुद्धिमेव हि॥ २२ : ६॥

तत्क्षणादारवं पात्रं लोहं क्षाल्याश्मताडनात्। (f. 59v)
क्षारोदकाद्वस्त्रशुद्धिः सलेपानामलेपतः॥ २२ : ७॥

---

1. This chapter corresponds to *Mataṅgapārameśvara*, *caryāpāda* 6:14–39.

22:4 चण्डनायकं] *em.*; चण्डनाकं C (unmetrical)

अम्लेन ताम्रपात्रस्य कांस्यपात्रस्य भस्मना।
वारिणा हेमरौप्यादेर्धातुवर्गस्य कीर्तिता॥ २२ :८॥

तथा चैवाश्मजातीनां मथितेनास्तु मस्तुना।
जलजानाञ्च सर्वेषां वैणवानान्तथांभसा॥ २२ :९॥

गोवालैर्दलपात्राणां वारिणा सह घर्षणात्।
स्निग्धानां रूक्षणाच्छुद्धिः पात्राणाम्परिकीर्तिता॥ २२ :१०॥

विण्मूत्रमद्यनिर्माल्यऋतुमत्स्त्रीविजातिभिः।
मृत्पात्राणि समस्तानि सन्त्याज्यानि तु सङ्करात्॥ २२ :११॥

समयानाम्प्रमादात्तु शक्तिजापः प्रशस्यते।
शतमुक्तं परा निष्ठा वाग्दोषाद्द्विगुणं भवेत्॥ २२ :१२॥

अभक्ष्यभक्षणे साङ्गन्देवं जप्त्वा विशुध्यति।
शतमेकं सहस्रं वा लक्षं वा सुविचार्य तु॥ २२ :१३॥ (f. 60r)

अगम्यागमने चैव विधिरेष प्रकीर्तितः।
न्यायोपार्ज्जितसद्वित्तं सद्भ्यो ग्राह्यं विजानता॥ २२ :१४॥

स्थित्यर्थमुपचितं वस्तु न लोभेनाधिकं क्वचित्।
वस्त्रशय्यासनादीनां गायत्र्या शतमभ्यसेत्॥ २२ :१५॥

देवाग्निगुरुकार्येषु गृहीतन्तन्निवेदनात्।
शुध्यते न्यायतो नित्यमन्यायान्मुनिपुङ्गव॥ २२ :१६॥

ग्लानेभ्यो व्याधितेभ्यो वा यतिभ्यः किञ्चिदौषधं।
सर्वेभ्यः सर्वदाग्राह्यन्न दोषोऽस्त्यत्र शासने॥ २२ :१७॥

खरोष्ट्रकाकमार्ज्जारश्वशृगालादिभिश्च यत्।
संस्पृष्टं लीढमाघ्रातं ज्ञात्वा वस्तुबलाबलं॥ २२ :१८॥

प्रोक्षणात्क्षालनाद्वर्षात्त्यागाद्वा शुद्धिमेति हि।

22:8 कांस्य°] *conj.*; कांश्य° C 22:11 सङ्करात्] *em.*; शङ्करात् C 22:13 अभक्ष्य°] *conj.*; अभक्ष° C 22:15 °पचितं] *conj.*; °पधितं C 22:15 °सनादीनां] *em.*; °शनादीनां C 22:15 °भ्यसेत्] *em.*; °भ्यशेत् C

सुतप्तस्य घृतस्याथ शुद्धिराज्यस्य कीर्तिता॥ २२ :१९॥

पुनःपाकेन संशुद्धिर्ल्लवणस्य सहाम्भसा।
गुडस्यापि विक्लिष्टस्य प्रोक्षणादेव केवलात्॥ २२ :२०॥ (f. 60v)

मधुनः पाकतः शुद्धिस्तथैवेक्षुरसस्य च।
फलानां क्षालनाच्छुद्धिर्दध्नश्चैव निरीक्षणात्॥ २२ :२१॥

क्वथितं शुध्यते क्षीरं शेषः स्यात्पाकजं हि तत्।
शुध्यते प्रोक्षणात्क्षीरं पर्यग्निकरणात्तथा॥ २२ :२२॥

पक्वान्नं प्रोक्षणात्सर्वम्पर्यग्निकरणादपि।
अपवादाद्गुरोर्वाचः शुद्धिरब्दान्नियम्य च॥ २२ :२३॥

परेभ्यो दुःखमुत्पाद्य वाङ्मनःकायकर्मभिः।
प्रमादतः परिज्ञाय शुद्धिः शक्तिजपात्तदा॥ २२ :२४॥

शताच्छतद्वयाद्वाथ सहस्राच्च क्रमोदितात्।
गुरोर्निवेद्य कर्तव्यं गुरवे रोचते यदा॥ २२ :२५॥

समुचितमविशेषाद्भाषितन्ते विधानं
    गुरुलघुविनियोगात्साधकानां त्रिसंख्यं।
कथितमिह समग्रं साम्प्रतं वर्त्तनार्थं
    शिववदनसमुत्थं कथ्यते ते यथावत्॥ २२ :२६॥ (f. 61r)

॥ इति मतङ्गपारमेश्वरे महातन्त्रे प्रायश्चित्तप्रकरणं समाप्तमिति॥

॥ पाराके प्रायश्चित्तं लिख्यते॥

भवेदलुप्तनियमो लोपे चोपवसेद्दिनं।
बहुदैवसिके भ्रंसे त्रारात्रञ्च जपेन्मनुं॥ २३ :१॥

प्रमादात्सूतकान्नन्तु ज्ञात्वा वा भक्ष्यभोजने।
ईशानजपविंशत्या पूतो भवति तत्क्षणात्॥ २३ :२॥

केशकीटोपविद्धन्तु दूषितं वापि केनचित्।

22:19 घृतस्याथ] *em.*; श्रुतस्याथ C

सकृज्जप्त्वा तु ईशानन्तस्मात्पापात्प्रमुच्यते॥ २३ : ३॥

एकान्नमथ भैक्ष्यम्वा यस्तुभुंक्ते द्विजोत्तम।
यावन्तोऽश्नाति तत्पिण्डांस्तावद्दोषैर्न्न लिप्यते॥ २३ : ४॥

लसुनं भक्षयेद्यस्तु पलाण्डुं वापि दीक्षितः।
गृञ्जनादीन्यभक्ष्याणि भौमानि कबकानि च॥ २३ : ५॥ (f. 61v)

सकृज्जप्त्वा तु ईशानन्तस्मान्मुच्येत पातकात्।
हिंसाचारविनिर्मुक्तो तक्ष्याचारान्वितो यदा॥ २३ : ६॥

कुलालश्च तदा भोज्यो नैवान्याश्चान्त्यजातयः।
भोज्यमन्नमन्त्यजातेः कष्टमार्गे तथापदि॥ २३ : ७॥

भुक्त्वाघोरसहस्रन्तु जपेदर्धमकामतः।
भिक्षां त्यक्त्वा यदेकान्नन्तद्योगात्सूच्यते भृशं॥ २३ : ८॥

एकान्नन्नित्यमश्नीयाद्युक्ताचारोऽथ गूढवान्।
अहोरात्रञ्जपेद्वक्त्रमन्नदोषाद्विमुच्यते॥ २३ : ९॥

पात्रस्य तैजसस्याद्भिस्ताम्रमस्लेन भस्मना।
काम्स्यं क्षारेण वस्तुञ्च चर्म काषायवारिणा॥ २३ : १०॥

मृत्मयस्य पुनःपाकात्तत्क्षणाद्दारवस्य च।
मूत्रादिदुष्टलेपञ्च त्यजेन्मृन्मयभाजनम्॥ २३ : ११॥

तैजसं शुध्यते अग्नौ मृदा गोमयवारिणा। (f. 62r)
प्रोक्षिते तृणकाष्ठे च क्षितिर्गोमयवारिणा॥ २३ : १२॥

सत्यपूताः स्मृता वाचः सद्भिराचरिताः क्रियाः।
मनः पूतञ्च सर्वत्र पूतमित्यभिधीयते॥ २३ : १३॥

शुनादष्टो यदा मन्त्री आचार्यपुत्रकोऽपि वा।
सप्तवारान्जपेत्सद्यं स्नात्वा चैव विशुध्यति॥ २३ : १४॥

उपवासेन चैकेन सर्पदष्टो विशुध्यति।
अज्ञानाद्ब्राह्मणं हत्वा कामतो वा महामुने॥ २३ : १५॥

सद्योजातञ्जपेत्तत्र ततः पापात्प्रमुच्यते।
सङ्गमेवा गवाङ्गोष्ठे एकाहञ्च व्रतञ्चरेत्॥ २३:१६॥

सद्योजातञ्जपेत्तत्र ब्रह्महत्यां व्यपोहति।
हत्वापि सुबहून्मन्त्री चरेत्षड्रात्रिकम्व्रतं॥ २३:१७॥

निरपेक्षो जपाभिज्ञो दहेत्पापं विशेषतः।
तद्दिनानि जपङ्कुर्याद्धुतशेषं विशुध्यति॥ २३:१८॥ (f. 62v)

अभक्ष्यभक्षणङ्कृत्वा कामाकामे द्विजोत्तम।
दिनशेषञ्जपेद्वक्त्रं पातकाद् विप्र मुच्यते॥ २३:१९॥

सुरापो दशलक्षाणि पञ्चगव्याशनो निशि।
शिवपूजारतो नित्यं जपेदात्मविशुद्धये॥ २३:२०॥

सुवर्णस्तेयगोधान्यं हत्वा च प्रवरां स्त्रियं।
बलादकारणान्मन्त्री मित्रद्रोहे कृते तथा॥ २३:२१॥

जानुमात्रोदके विश्य त्रिरात्रोपवसेन्नरः।
वामदेवं जपेत्तत्र तस्मात्पापात्प्रमुच्यते॥ २३:२२॥

ग्रन्थापहरणे वक्त्रञ्जपेदज्ञानतः शतं।
अगम्यागमनं कृत्वा वामदेवशतं जपेत्॥ २३:२३॥

ब्राह्मणीमितराम्वापि योऽभिगच्छति दीक्षितः।
ब्राह्मणोऽष्टशतं जप्त्वा तस्मात्पापात्प्रमुच्यते॥ २३:२४॥

क्षत्रियो द्विशतेनैव वैश्यस्तु त्रिशतेन तु। (f. 63r)
शूद्रो जप्त्वाथ चत्वारि वामदेवं शिवाग्रतः॥ २३:२५॥

एकरात्रोषितो भूत्वा तस्मात्पापात्प्रमुच्यते।
यस्तु प्रव्रजिताङ्गच्छेद्ब्राह्मणीन्तु कुलस्त्रियं॥ २३:२६॥

ईशानाष्टशतं जप्त्वा दोषान्मुच्येत दीक्षितः।
कदाचिच्च प्रमादेन वृषलीसङ्गमाचरेत्॥ २३:२७॥

23:18 पापं] *em.*; पाप C **23:19** अभक्ष्यभक्षण°] *em.*; अभक्ष्यभण° C (unmetrical) **23:21** सुवर्ण°] *em.*; शुवर्ण° C

ईशानस्य शतं जप्त्वा तस्मान्मुच्येत पातकात्॥ २३ : २८॥

॥ इति पाराके प्रायश्चित्तपटलं समाप्तमिति॥

॥ अथ विद्यापुराणे प्रायश्चित्तं लिख्यते॥

अज्ञानादाचरेद्वापि समयादिविलंघनं।
कृत्वा वा कामतस्तस्य शुद्दिर्देव कथम्भवेत्॥ २४ : १॥

ईश्वर उवाच—

देवाग्निगुरुशास्त्राणाङ्कृत्वा निन्दां जपेच्छतं।
लघ्वादिभावं विज्ञाय ईशन्दशगुणोत्तरं॥ २४ : २॥ (f. 63v)

कृत्वा पूजां यथाशक्त्या स्तुत्वा चैव क्षमापयेत्।
दशतः साधकादीनां दीक्षितानामथैकतः॥ २४ : ३॥

अन्यद्वा यत्कृतम्पापन्तदीशस्मरणाद्दहेत्।
निर्माल्यभोजने वक्त्रञ्जपेल्लक्षमतन्द्रितः॥ २४ : ४॥

कामाद्दशगुणम्वापि चण्डेशाय निवेदयेत्।
भुक्त्वायुतञ्च देवस्य नैवेद्यमविसर्ज्जिते॥ २४ : ५॥

तद्वन्निवेद्य शुद्धिः स्याल्लंघने च शतं जपेत्।
भुक्त्वा गर्भादिसंस्कारे सहस्रम्परिवर्तयेत्॥ २४ : ६॥

कांस्यपात्रे शतं जप्यन्तद्वत्मांसादिभोजने।
उच्छिष्टन्तु समानानां भुक्त्वोपोष्य विशुध्यति॥ २४ : ७॥

सहस्रमयुतं चैव तथा मध्यमहीनयोः।
द्वित्रिरात्रोपवासश्च सवर्णोच्छिष्टभोजने॥ २४ : ८॥

जघन्योच्छिष्टसम्पर्कादेवन्दशगुणं स्मृतं। (f. 64r)
जपोपवासवृद्धिश्च एकरात्रादितः क्रमात्॥ २४ : ९॥

माज्जरिमूषकैर्ज्जग्धमन्नम्भुंक्ते तु यः क्वचित्।
जीर्णान्ते च पिबेत्स्नात्वा पञ्चगव्यं विशुद्धये॥ २४ : १०॥

24:3 दशतः साधक°] *em.*; दशत⏓⏓धका° C

सद्येन गोमयङ्ग्राह्यं गोमूत्रं मनसा घृतं।
सर्वेण पयस्त्वास्येन दधीशेन कुशोदकं॥ २४ :११॥

गायत्र्या चैकतः कृत्वा पिबेत्पापविशुद्दये।
कृमिकीटादिसंस्पृष्टं भुक्त्वा वान्तेन शुध्यति॥ २४ :१२॥

श्वकाकोपहतं भुक्त्वा निराहारो नरञ्जपेत्।
त्रिरात्रं लसुनादीनां भक्षणे चैतदेव हि॥ २४ :१३॥

सुरापो दशलक्षाणि पञ्चगव्याशनो निशि।
शिवपूजारतो नित्यञ्जपेदात्मविशुद्दये॥ २४ :१४॥

विण्मूत्रं भक्षयेद्यस्तु सप्ताहं शुद्धये जपेत्।
सह पङ्क्तौ निकृष्टैस्तु भुञ्जानो दशधा जपेत्॥ २४ :१५॥

शतम्भुक्त्वाथ यन्नोक्तं ज्ञात्वा तु गुरुलाघवं। (f. 64v)
जपः कार्यो विशुध्यर्थमधमोत्तममध्यमः॥ २४ :१६॥

कुतो ज्ञातः शताच्चैव अधमो मध्यमे द्विकम्।
किन्तूत्तमो जपश्चौर्ध्वन्त्रिकं स्याज्जपकर्मणि॥ २४ :१७॥

लिङ्गं हित्वा गुरुं हत्वा जपेत्सर्वमतन्द्रितः।
निशि भुक्त्वा तपं वह्निम्प्रथमञ्चोत्तमे त्रिकं॥ २४ :१८॥

दत्वा शर्व्वाय सर्व्वस्वन्तस्मात्पापाद्विमुच्यते।
द्विजं हत्वा जपेत्तद्वत्पञ्चातपविवर्ज्जितः॥ २४ :१९॥

भिक्षाहारोऽथ सर्वस्वं पूर्ववच्च निवेदयेत्।
स्वशक्त्या कारयेद्वापि दीक्षां निर्वाणगामिनीं॥ २४ :२०॥

पादपादश्च हीयेत क्षत्रियादिष्वनुक्रमात्।
अन्त्यजानां गवां चैव शूद्रहत्याव्रतं चरेत्॥ २४ :२१॥

महिषाश्वखरादीनान्तदर्द्धं पादसंमितं।
श्वशृगालमृगादीनान्तस्याप्यर्धञ्च दक्षिणं॥ २४ :२२॥ (f. 65r)

माण्डूकनकुलादीनान्तस्य पादो विधीयते।

24:18 प्रथमञ्चोत्तमे] *em.*; प्रथञ्चोत्तमे C (unmetrical)

क्षुद्रजन्तुवधं कृत्वा दशधावर्त्य शुध्यति॥ २४ :२३॥

सर्वहिंसाकृतं पापमन्यन्न कथितञ्च यत्।
अघोरो घोरहा सर्वं स्मरणादेव निर्दहेत्॥ २४ :२४॥

वामं गुरुस्त्रियङ्गत्वा शुद्धये लक्षमभ्यसेत्।
आर्द्रवासाः पयः पीत्वा भ्रातृजायां सहोदरां॥ २४ :२५॥

पितृमातृश्वसाश्वस्रूमातुलादींश्च योजयेत्।
लक्षहानिः क्रमाद्दुक्तो गत्वा विप्रादियोषितं॥ २४ :२६॥

अन्त्यजं पञ्चलक्षाणि नाभिमात्रोदके जपेत्।
सामान्यमयुतं शूद्रीं द्विगुणं द्विगुणम्पुनः॥ २४ :२७॥

वैश्यादिवर्णजाङ्गत्वा गाङ्गत्वा चायुतं जपेत्।
उभयोर्द्विगुणं प्रोक्तमजादीनान्तदर्द्धकं॥ २४ :२८॥

योनिपापन्दहेद्वामः सर्वमन्यच्च यद्भवेत्। (f. 65v)
लक्षञ्जप्त्वा भवेच्छुद्धिर्हैमहर्तुरजं ध्रुवं॥ २४ :२९॥

हत्वा गाञ्च तदर्धेन स्त्रियन्तावदजाविकं।
कांस्यवस्त्ररसादीनि लक्षेणैकेन शुध्यति॥ २४ :३०॥

सद्योजातो दहेत्सर्वमन्यद्वा चौर्यसम्भवं।
संकीर्णकल्मषीमन्त्रान् सर्वानेव जपेच्छुचिः॥ २४ :३१॥

व्योमव्यापिशिवम्वापि सर्वपापविशुद्धये।
प्रायश्चित्तं चरेज्ज्ञात्वा कर्मणां गुरुलाघवं॥ २४ :३२॥

कर्तुः शक्तिवयोवित्तमसाठ्येन विशुद्धये।
अज्ञानाज्ज्ञानतो वापि कृतमेवं विशुध्यति॥ २४ :३३॥

कामतस्तु कृतं मोहात्त्रिगुणेन विशुध्यति।
कायिकस्यैवमुद्दिष्टो लघुमध्योत्तमो जपः॥ २४ :३४॥

कर्मणा च कृतस्यापि सताल्लघ्वादितो जपेत्।
मानसस्यैकतः प्रोक्तः पूर्वोक्तानाञ्जपः क्रमात्॥ २४ :३५॥ (f. 66r)

सर्वं समयिनामेतन्निर्दिष्टः शुद्धये क्रमः।
स्थित्यर्थं पुत्रकादीनां सिद्ध्यर्थं मन्त्रवादिनां॥ २४ :३६॥

अनुग्रहाधिकाराय देशिकानामपीष्यते।
दीक्षया वा दहेत्सर्वं पापमाचार्यसत्तमः॥ २४ :३७॥

अभिशस्तादिभिस्पृष्टः स्नात्वा विप्रो विशुध्यति।
पादौ प्रक्षाल्य चाचम्य शुद्धिर्भवति नान्यथा॥ २४ :३८॥

उच्छिष्टलेपसम्पर्कात्प्रागुक्तविधिमाचरेत्।
असत्प्रतिग्रहं गृह्य सद्योद्वादशभिः पुनः॥ २४ :३९॥

मुच्यते किल्बिषात्क्षिप्रं मन्त्री यश्चाप्यकुत्सितः।
होमार्थञ्चैव गुर्वर्थं लिङ्गार्थं याचितं च यत्॥ २४ :४०॥

यदि तद्भक्षयेल्लोभात्कदाचिदेव दुर्मतिः।
जपेल्लक्षं सपादञ्च तस्य शुद्धिस्तदा भवेत्॥ २४ :४१॥

॥ इति विद्यापुराणे प्रायश्चित्तपटलं समाप्तमिति॥ (f. 66v)

॥ रौरवे प्रायश्चित्तं लिख्यते॥

अथातः संप्रवक्ष्यामि आत्मदीक्षामनुक्रमं।
भाषितं परमेशेन श्रीकण्ठाय महात्मने॥ २५ :१॥

शूद्रन्तु दीक्षयेद्यस्तु विधानेनाग्रजन्मनः।
निर्माल्यं भक्षयित्वा तु आपत्सु शिवयज्ञवित्॥ २५ :२॥

आज्ञां वा समतिक्रम्य शासने पारमेश्वरीं।
आत्मदीक्षामिमाङ्कुर्याद्विधिवत्संशितव्रतः॥ २५ :३॥

॥ इति रौरवे प्रायश्चित्तमिदं॥

॥ मृगेंद्रतत्त्वसंहितायां प्रायश्चित्तं लिख्यते॥

साधनादिकविच्छेदे सद्योजातायुतं जपेत्।

24:38 °स्पृष्टः] *em.*; °स्पृष्ट C **24:41** तस्य] *em.*; स्तस्य C

शतं वा संयतप्राणो वासरं मारुताशनः॥ २६ :१॥

वामस्यान्नव्यतिकरे हिंसायाम्बहुरूपिणः।
वक्त्रस्य स्पन्दने रात्रौ दिवा तद्द्विगुणञ्चरेत्॥ २६ :२॥

द्विजाद्युच्छिष्टसम्पर्क्कौ वक्त्राद्यन्यतमङ्गुणं। (f. 67r)
चतुर्द्दलेऽब्जमध्येऽष्टाः स्थाने तु पञ्चमञ्जपेत्॥ २६ :३॥

षडहोपोषितो लक्षं जपेद्धव्याशनोऽपि वा।
जुहुयादयुतं---द्विगुणं शुद्धिकारणं॥ २६ :४॥

जपेन्निर्माल्यसंपर्क्के सर्व्वे ब्रह्माणि लक्षशः।
समग्रसंहितालक्षञ्जपेन्निर्माल्यभोजने॥ २६ :५॥

वामाद्याः पतयः शाक्यपादार्थिककपालिनां।
अजातोऽधिपतिर्ज्ञेयस्त्रयीनैष्ठिकलिङ्गिनां॥ २६ :६॥

तदन्नभोजने शुद्धिर्ज्जातिसम्पर्क्कशुद्धिवत्।
किन्त्वैन्दवं व्रतं प्रान्ते कापाल्यन्नाशने मताः॥ २६ :७॥

ईशानस्य जपेल्लक्षन्तत्सङ्करविशुद्धये।
कापालिसंकरे त्रीणि लक्षाणि कृतनिश्चयः॥ २६ :८॥

प्रमादाद्योषितङ्गत्वा प्राणायामायुतं जपेत्।
द्विपञ्चगुणितं शुद्ध्यै प्रणवोच्चारसंयुतं॥ २६ :९॥ (f. 67v)

महापातकसंयोगे शिवैकादशिकायुतं।
जपेद्दशगुणं प्राणसंयमी फलमूलभुक्॥ २६ :१०॥

तत्समेष्वेवमेवस्यात्किन्तु प्राणायामं विना।
पातकेषु तदन्येषु क्रियाव्यतिकरेषु च॥ २६ :११॥

जपेदेकादशात्मानमेकं वा ब्रह्ममव्ययं।
नादद्यात्करकं किञ्चित्संख्याजातांभसा हृतं॥ २६ :१२॥

आददन्नपरिज्ञानात्तदुक्तार्द्धं समाचरेत्।

26:10 महापातक°] *em.*; महापाक° C (unmetrical)

बहुदैवसिके योगे तुल्यं साधर्म्ययोगतः॥ २६ : १३॥

नाक्षं विलङ्घयेद्विद्वान्सृष्टिसंहारकारणं।
विलंघ्याच्चेतसो दोषाद्बहुरूपायुतं जपेत्॥ २६ : १४॥

॥ इति मृगेन्द्रतत्त्वसंहितायां प्रायश्चित्तपटलमिति॥

॥ निःश्वासकारिकायां प्रायश्चित्तं लिख्यते॥

असमाप्ताह्निको मन्त्री नान्यत्का --- समाचरेत्। (f. 68r)
प्रमादाह्निकविच्छेदे घृतहोमो विधीयते॥ २७ : १॥

आहुतीनां सहस्रन्तु शतं चैव हुताशने।
द्वात्रिंशाक्षरमन्त्रस्य यावच्छत्त्या तु होमयेत्॥ २७ : २॥

हुत्वा चैवं ततो मन्त्री शतमष्टोत्तरं जपेत्।
अकामाच्चैव संच्छेद आह्निकन्तु यदा भवेत्॥ २७ : ३॥

मालामन्त्रस्य मन्त्रज्ञो द्विगुणन्तु समाचरेत्।
शुना दष्टो विशुध्येत गायत्र्यष्टशतेन तु॥ २७ : ४॥

मार्ज्जारमूषकैर्दष्टः सप्तजप्तेन शुध्यति।
शृगालवृकदष्टो वा शुध्यत्यष्टशतेन तु॥ २७ : ५॥

चाण्डालस्पर्शसंभाषे प्राणायामशतं जपेत्।
सद्योजातेन मुच्येत नात्र कार्या विचारणा॥ २७ : ६॥

स्तेयं कृत्वा जपेद्घोरं मनाक्तत्पुरुषं जपेत्।
तत्संपर्क्केण चेशानं जपेत्पर्वतमस्तके॥ २७ : ७॥ (f. 68v)

ताम्ररोप्यं विटंकं वा हृत्वा स्तेयसन्त्रयं।
कङ्गुधान्यापरं धान्यं लोहं वा बहुधात्मकं॥ २७ : ८॥

अर्थश्च विविधं हृत्वा न्यूनन्तत्र विनिर्णयेत्।

26:13 वहुदैवसिके] *em.*; वहुदैवशिके C 26:13 °योगतः] *em.*; °योतः C (unmetrical) 27:2 यावच्छत्त्या] *em.*; यावच्छ ⏑̄ C 27:3 अकामाच्चैव] *conj.*; अकाच्चैव C (unmetrical)

अजं जप्त्वा भवेच्छुद्धिर्हेमहर्तुर्न संशयः॥ २७:९॥

हृत्वा गाञ्च तदर्द्धेन स्त्रियस्तद्वदजादिकं।
कांस्यं वस्त्रं रसाद्यञ्च लक्षैकेन विशुध्यति॥ २७:१०॥

सद्योजातो दहेत्क्षिप्रमन्यद्वा चौर्यसम्भवं।
देवाग्निगुरुशास्त्राणाङ्कृत्वा निन्दां जपेच्छतं॥ २७:११॥

लघ्वादिभावं विज्ञाय ईशं दशगुणोत्तरं।
कृत्वा पूजां यथाशक्त्या स्तुत्वा चैव क्षमापयेत्॥ २७:१२॥

दशतः साधकादीनां शतमेवमथैकतः।
अन्यद्वा यत्कृतं पापं तदीशस्मरणाद्दहेत्॥ २७:१३॥

गुरोः कृत्वापवादं च तथा मन्त्री शिवस्य च। (f. 69r)
गायत्र्यष्टसहस्रेण प्रमादाच्छुध्यते भृशं॥ २७:१४॥

शिवविद्याङ्गसंपूर्ण आचार्यः परमेश्वरः।
शिववत्पूजनीयोऽसौ तन्निन्दान्न समाचरेत्॥ २७:१५॥

समयी चात्मवानन्यः पुत्रकश्च विशेषतः।
कृत्वा निन्दां ततस्तेषान्तदर्द्धेन विशुध्यति॥ २७:१६॥

शिवस्य शिवमन्त्रस्य शैवाचार्यस्य कामतः।
निन्दकान्विनिहत्यापि हत्यया न विलिप्यते॥ २७:१७॥

शतमेकं जपेदीशं प्रायश्चित्तविशुद्धये।
हृत्वा देवस्य सर्वस्वं पञ्चब्रह्मण्यनुक्रमात्॥ २७:१८॥

जपेत्पञ्चशतान्मन्त्री पञ्चातपसमन्वितः।
भिक्षाहारः स्वशक्त्या वा दीक्षान्निर्वाणगामिनीम्॥ २७:१९॥

शतायुतसहस्राणि विंशद्विंशत्तदुत्तरा।
लक्षं यावत्परा काष्ठा जपस्येयङ्कृतिर्मता॥ २७:२०॥ (f. 69v)

हत्वा तु देशिकङ्कामाद्भैक्षभुक्सुसमाहितः।

27:9 °हर्तुर्न] *em.*; °हर्तु न C   27:14 गायत्र्यष्ट°] *em.*; —यत्र्यष्ट° C   27:15 पूजनीयोसौ] *em.*; पूनीयोसौ C (unmetrical)

एकाशीतिपदं मन्त्रं लक्षमावर्त्य शुध्यति॥ २७:२१॥

॥ निःश्वासप्रायश्चित्तप्रकरणं समाप्तमिति॥

॥ सप्तवैद्याधरे प्रायश्चित्तं लिख्यते॥

व्यापादितो यदा लिङ्गी शैवो वान्याश्रमी तथा।
प्रायश्चित्तं चरेन्मन्त्री गुरूक्तं शिवभाषितम्॥ २८:१॥

षट्सप्त बहुभिर्दत्तं आचार्यैर्गुरुणा विना।
कर्तव्यं शास्त्रसंसिद्धं महापातकशुद्धये॥ २८:२॥

अष्टौशतान्यघोरेण जुहुयाच्छिवपावके।
अनाज्ञातशिवे मन्त्री निर्वाणे दोषशान्तये॥ २८:३॥

॥ इति सप्तवैद्याधरे प्रायश्चित्तमिदं॥

॥ निःश्वासोत्तरे प्रायश्चित्तं लिख्यते॥

असमाप्ताह्निको मन्त्री नान्यत्कर्म कथञ्चन। (f. 70r)
प्रमादाह्निकविच्छेदे घृतहोमो विधीयते॥ २९:१॥

आहुतीनां सहस्रैकमप्रमादाच्छतं हुनेत्।
पञ्चाशत्पञ्चविंशद्वा मन्त्री मन्त्रन्ततो जपेत्॥ २९:२॥

विद्याधिपेन मन्त्रेण पञ्चब्रह्मयुतेन च।
परिगृह्य जपं मन्त्री संख्याच्छिन्नं जपेत्ततः॥ २९:३॥

कल्पोक्तं तु जपं कृत्वा रुद्राय विनिवेदयेत्।
रुद्रार्पितज्जपेन्मन्त्री विघ्नेन्द्रेण न बाध्यते॥ २९:४॥

जानुभ्यामवनीं गत्वा जपमीशे निवेदयेत्।

॥ इति निःश्वासोत्तरे प्रायश्चित्तं समाप्तमिति॥

॥ अथ साहस्रे शिवभेदे प्रायश्चित्तं लिख्यते॥

29:3 विद्याधिपेन] *conj.*; विद्याधिपेण C

गुरुदेवस्वहर्त्ता च गुर्वङ्गनागमञ्चरेत्।
अमेध्याद्दशगुणं मांसं तप्तकृच्छ्रं प्रदापयेत्॥ ३०:१॥ (f. 70v)

त्र्यहमम्भः पिबेत्तप्तं क्षीरं तप्तं त्र्यहं पिबेत्।
त्र्यहमुष्णं घृतं पीत्वा त्र्यहं स्यान्मारुताशनः॥ ३०:२॥

तप्तकृच्छ्रमिदं भद्रे महापातकनाशनं।
पितृघ्नो मातृभ्रातृघ्नश्चातिकृच्छ्रेण शुध्यति॥ ३०:३॥

अश्नीयात्त्र्यहमेकैकङ्ग्रासं मध्यदिने सुधीः।
पुनस्त्रीणिदिनैकैकं अश्नीयात्तदयाचितं॥ ३०:४॥

अहानि त्रीणि नक्तेन निराहारस्त्रिवासरं।
अतिकृच्छ्रविधानन्तु समासात्तदुदाहृतं॥ ३०:५॥

अगम्यागमनं कृत्वा कृच्छ्रं सान्तपनञ्चरेत्।
गोमूत्रं गोमयं क्षीरमाज्यं दधिकुशोदकं॥ ३०:६॥

अहोरात्रोषितो भूत्वा पिबेत्सान्तपनं स्मृतं।
गोऽश्वमृगादिकं हत्वा प्राजापत्यं चरेद्द्विजः॥ ३०:७॥

त्र्यहमयाचितं भुंक्ते नक्तभोजी त्रिवासरां। (f. 71r)
एकभुक्तं त्र्यहङ्कुर्यान्निराहारो दिनत्रयं॥ ३०:८॥

प्राजापत्यमिदं ख्यातमुपपातकनाशनं।
कृत्वैतानि तु कृच्छ्राणि शिवमन्त्र? गुरोर्भवेत्॥ ३०:९॥

लोपयित्वा गुरोराज्ञां ⊔।
वक्त्रोच्चारं विदित्वा तु सद्योजातशतं जपेत्॥ ३०:१०॥

सहस्रमथवा देवि ज्ञात्वा वाक्यबलाबलम्।
अवज्ञाञ्च वदेद्वाममघोरं क्रोधकर्मणि॥ ३०:११॥

दुर्भाषिते ददेद्वक्त्रमयुतं भोजनेषु च।
गुरुदेवाग्रतः ष्ठीवी प्रच्छादितोऽथ वेष्टितम्॥ ३०:१२॥

शृणोति चाथवाख्याति कुरुते चाप्रदक्षिणम्।

30:8 एकभुक्तं] *em.*; एकभुभु C

प्रणिपत्य गुरुं मन्त्री ईशानञ्च तदा जपेत्॥ ३०:१३॥

अथवा चैव सर्वेषाम्प्रायश्चित्तञ्च दुर्द्धरं।
अघोरञ्च जपेद्देवि सर्वपापप्रणाशनं॥ ३०:१४॥ (f. 71v)

हेमं रौप्यञ्च ताम्रञ्च कांस्यञ्चायसमृत्मयं।
नागजं वारिजं वापि पात्रम्वा वेणुसम्भवं॥ ३०:१५॥

उच्छिष्टं मृण्मयं त्याज्यं शुद्धिन्तु इतरां श्रुणु।
वारिजां वारिणा शुद्धिर्व्यामिश्राणां मृदम्भसा॥ ३०:१६॥

विण्मूत्रश्लेष्मसंस्पृष्टास्त्याज्यास्ते वेणुसंभवाः।
सर्वधातुसमुत्थन्तु वह्नौ स्पृष्टा विशुध्यति॥ ३०:१७॥

ताम्रमम्लेन कांस्यन्तु भस्मना काञ्चनं गोमयैः।
वंशञ्चायसमश्मना? वारिसर्वत्र योजयेत्॥ ३०:१८॥

वाक्कर्म च मनश्चैव यस्तु दण्डयति त्रयं।
त्रिदण्डी स तु विज्ञेयः प्राप्नोति गतिमुत्तमाम्॥ ३०:१९॥

त्रयाणामपि चैतेषां निःकृतिञ्च श्रुणुष्वथ।
वाचिकैस्तत्त्र्यहं मौनमग्निकार्यार्चनञ्जपः॥ ३०:२०॥

समाप्ते गुरुदेवाय दीनां वाचां निवेदयेत्। (f. 72r)
स मुक्तो वाचिकैर्बन्धैः कर्मबन्धन्निबोधत॥ ३०:२१॥

निराहारस्त्रिरात्रञ्च त्रिसन्ध्यञ्जलगाहनं।
ब्रह्मजापी च मौनी च कर्मबन्धेन मुच्यति॥ ३०:२२॥

मानसस्य तु पापस्य प्राणायामाम्भसि कृते।
शिवगायत्रिमन्त्रेण मुच्यते बन्धमानसैः॥ ३०:२३॥

॥ इति साहस्रे शिवभेदे प्रायश्चित्तं समाप्तं॥

॥ वामदेवीये क्रियासङ्ग्रहे प्रायश्चित्तं लिख्यते॥

30:15 कांस्य°] *conj.*; कास्य° C 30:15 पात्रम्वा] *em.*; पात्रम्वात्रम्वा C (unmetrical) 30:16 मृण्मयं] *conj.*; मृत्मयं C 30:19 °त्तमाम्] *em.*; °त्तमम् C

सन्ध्यालोपे तु सञ्जाते शिवैकादशिकाञ्जपेत्।
सरुजो निरुजो मन्त्री सद्योजातशतं जपेत्॥ ३१:१॥

साध्यमन्त्रेण वा प्राज्ञो द्विगुणं जपमाचरेत्।
जपशेषञ्च ततो जप्त्वा सन्ध्यां वन्देत पूर्ववत्॥ ३१:२॥

सन्ध्यालोपे च सञ्जाते ईशस्य त्रिशतं जपेत्।
निरुजः सरुजो मन्त्री संहितां वर्त्तयेत्त्रिधा॥ ३१:३॥ (f. 72v)

साध्यमन्त्रेण वा मन्त्री त्रिगुणं जपमाचरेत्।
चतुर्थायाञ्च सन्ध्यायां पूर्ववच्च चतुर्गुणं॥ ३१:४॥

विधिरावश्यको ह्येषः प्रायश्चित्तम्विशुद्धये।
बहुदैवसिको भ्रंसः सोपवासम्व्रतञ्चरेत्॥ ३१:५॥

सहस्रम्पञ्चमस्यैकं सरुजस्य प्रकीर्तितं।
निरुजस्य तथा गव्यं त्रिरात्रञ्चायुतद्वयं॥ ३१:६॥

प्राणायामत्रयं कृत्वा शिवमग्निञ्च पूजयेत्।
रेतोमूत्रपुरीषञ्च प्रमादाद्यदि भक्षयेत्॥ ३१:७॥

भुक्त्वा चान्नमभोज्यन्तु गत्वा चाप्यन्तजां स्त्रियं।
जप्त्वा शिवायुतं मन्त्री पूर्वोक्तविधिनाथ तत्॥ ३१:८॥

पञ्चगव्यं सकृत्पीत्वा सर्वपापैः प्रमुच्यते।
अहोरात्रोषितो भूत्वा शिवस्य पुरतः स्थितः॥ ३१:९॥

ओंकाराद्येन मन्त्रेण पूर्वाशाभिमुखो विशेत्। (f. 73r)
पीतमात्रम्भवेच्छुद्धं शरदिन्दुमिवामलं॥ ३१:१०॥

मातृपितृसमुद्भूतं सहजागन्तुकञ्च यत्।
अस्थिमज्जागतम्पापं ब्रह्मकूर्चो दहेत्क्षणात्॥ ३१:११॥

विधिः प्रच्छन्नपापेषु प्रकाशे कथयेद्गुरोः।
पञ्चगव्यं स्मृतंह्येतत्महापातकनाशनं॥ ३१:१२॥

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमं।

31:5 ॰वश्यको] *conj.*; ॰वस्यको C

यैः कृतास्ते स्मृताः सद्भिर्महापातकिनो नराः॥ ३१ :१३॥

यस्य योगस्तु तैः सार्द्धं सोऽपि चैतत्समो भवेत्।
हत्वा विप्रञ्जपेत्सद्यङ्गवाम्मध्ये सुयन्त्रितं॥ ३१ :१४॥

सुरां पीत्वा जपेद्वामं शिवहर्म्ये विशुद्धये।
कृत्वा स्तेयमकामाच्च घोरं पितृवने जपेत्॥ ३१ :१५॥

गुरुस्त्रीगमने वक्त्रमकामाद्विजने वने।
एषां योगाज्जपेदीशं नगाग्रे संयतेन्द्रियः॥ ३१ :१६॥

प्रकाश्यैकाग्रतः कृत्वा लक्षञ्जप्त्वा विशुध्यति। (f. 73v)
अकामाद्वा रहस्ये च सहस्राच्छुद्धिरिष्यते॥ ३१ :१७॥

कामतस्तु रहस्ये च जपस्तत्रायुतद्वयं।
अकामतः प्रकाशे तु जपेत्तत्रायुतद्वयं॥ ३१ :१८॥

गुरुस्त्रीगामिनं कामाच्चीर्ण्णकृच्छ्रन्तु दीक्षयेत्।
दयावान्देशिको यस्य लक्षजापाद्विशुध्यति॥ ३१ :१९॥

सुरां पीत्वा जपेद्वामं सहस्रङ्कामतो यदा।
अकामात्त्रिशतं जप्त्वा प्रमादाच्छुद्धिरिष्यते॥ ३१ :२०॥

निर्माल्यभक्षणे जाते प्रमादादयुतं जपेत्।
बहुरूपन्तथा कामाद्दीक्षां कृत्वा विशुध्यति॥ ३१ :२१॥

रजस्वलान्नं भुंजानो गुह्यकस्य शतं जपेत्।
कामात्पञ्चशतं यद्वत्तद्वन्निर्माल्यलंघनात्॥ ३१ :२२॥

निर्माल्यसङ्करे भुक्त्वा तत्राघोरशतं जपेत्। (f. 74r)
उपेक्षिते तु निर्माल्ये वायसश्वादिभक्षिते॥ ३१ :२३॥

बहुरूपसहस्रन्तु जप्त्वा मन्त्री विशुध्यति।
शिवम्पर्वसु सम्पूज्य गुरुमग्निम्विशेषतः॥ ३१ :२४॥

31:17 °श्यैकाग्रतः] *em.*; °स्यैकागतः C **31:17** विशुध्यति] *em.*; विध्यति C (unmetrical) **31:22** कामात्] *conj.*; कामोत् C **31:23** °सङ्करे] *em.*; °शङ्करे C **31:23** °भक्षिते] *conj.*; °भक्षितैः C **31:24** पर्वसु] *em.*; पर्वशु C

अदत्वा चलितन्तत्र शिवाष्टकशतं जपेत्।
अनिवेद्य यदा भुङ्क्ते शिवमिष्ट्वा शतं जपेत्॥ ३१:२५॥

श्वविड्वराहच्छागाद्यैर्मार्जारकपिकुक्कुटैः।
उलूकगृध्रकाकाद्यैः स्पृष्टस्यान्नस्य भक्षणात्॥ ३१:२६॥

शिवैकादशिकाञ्जप्त्वा पञ्चगव्येन शुध्यति।
मृतके सूतके भुक्त्वा जपेत्सद्यादिपञ्चकं॥ ३१:२७॥

सहस्रं कामतो जप्त्वा अकामाच्च शतं जपेत्।
गणान्नम्भक्षणात्सद्यम्प्रमादात्तु शतञ्जपेत्॥ ३१:२८॥

द्विशतङ्गणिकान्नस्य पतितानां शतं जपेत्।
अष्टमे मासि पुंस्त्वे च वामदेवशतं जपेत्॥ ३१:२९॥ (f. 74v)

नामप्राशननिष्क्रामे भुक्त्वा वक्त्रशतञ्जपेत्।
चतुर्थिकान्नं भुक्त्वा तु वामदेवशतञ्जपेत्॥ ३१:३०॥

सद्यःश्राद्धे तु यो भुङ्क्ते अघोरं त्रिशतं जपेत्।
सहस्रङ्कामतः प्रोक्तमसच्छूद्रान्नभक्षणे॥ ३१:३१॥

वान्ते स्नानञ्जले कृत्वा सद्योजातशतञ्जपेत्।
वापीकूपतडागानां वृक्षाणाम्मोक्षणे तथा॥ ३१:३२॥

शिववर्ज्याप्रतिष्ठान्नम्भुक्त्वान्नं चान्यलिङ्गिनां।
अभक्ष्यभक्षणान्नाद्वा तदर्द्धे वाप्यकामतः॥ ३१:३३॥

सद्योजातं जपेन्मन्त्री प्रमादान्मांसभक्षणे।
दशरूपाणि वक्त्रस्य पञ्च चैकान्नभक्षणात्॥ ३१:३४॥

भैक्ष्यन्त्यक्त्वा प्रमादात्तु ततः शुध्यति किल्बिषात्।
वस्त्रं चतुर्विधञ्चर्म्म प्रतिगृह्य शतञ्जपेत्॥ ३१:३५॥

कामतोऽथ सहस्रन्तु सद्योजातञ्जपेद्बुधः। (f. 75r)
दधिक्षीरं मधुं सर्पिस्तैलं लवणमेव च॥ ३१:३६॥

31:25 चलितन्तत्र] *em.*; चलिन्तत्र C (unmetrical) 31:30 °प्राशन°] *em.*; °प्रासन° C 31:31 सद्यःश्राद्धे] *em.*; सद्यं श्राद्धे C 31:36 कामतो°] *em.*; कामातो° C

शर्कराञ्च गुडञ्चैव गृहीत्वा वाममभ्यसेत्।
मणिमुक्ताप्रवालानि सुवर्णं रौप्यमेव च ॥ ३१ : ३७ ॥

बहुरूपं जपेद्विद्वान्सहस्रं शतमेव वा।
गजं हयमनड्वाहं गृहीत्वा च वरस्त्रियम्॥ ३१ : ३८ ॥

जपेत्तत्पुरुषं मन्त्री सहस्रं शतमेव वा।
सर्वसस्यसमृद्धान्तु सर्वरत्नसमन्वितां॥ ३१ : ३९ ॥

गृहीत्वा पृथिवीं विद्वानीशानम्पूर्ववज्जपेत्।
सर्वेषामेव पापानां सङ्करे समुपस्थिते॥ ३१ : ४० ॥

पवित्राणि जपेत्पञ्च एकं वा बहुरूपिणं।
वामदेवं जपेद्विद्वांश्छुध्यत्येवं न संशयः॥ ३१ : ४१ ॥

योनिसंकरजं दोषं अश्मकाष्ठतृणादिकं।
गृहीत्वा वस्तु यत्किञ्चिद्बहुरूपञ्जपेद्बुधः॥ ३१ : ४२ ॥

ज्ञानापहारणे वक्त्रङ्कामाकामे कृते सति। (f. 75v)
गुरुपुत्रं गुरोर्भार्यां निन्दयेद्यस्तु दीक्षितः॥ ३१ : ४३ ॥

ईशानस्य शतं जप्त्वा ततः शुद्धिमवाप्नुयात्।
मूषिकाश्यविघाते च पञ्चगव्यन्तु भक्षयेत्॥ ३१ : ४४ ॥

सप्ताभिमन्त्रितङ्कृत्वा सद्योजातेन शुध्यति।
श्वानदष्टे तथैवेह स्नात्वा पूर्ववदाचरेत्॥ ३१ : ४५ ॥

असत्प्रतिग्रहं गृह्य सद्योजातशताच्छुचिः।
चाण्डालस्पर्शने स्नात्वा सद्योजातं सकृज्जपेत्॥ ३१ : ४६ ॥

प्राणायामत्रयङ्कृत्वा ततः शुद्धिमवाप्नुयात्।
गुर्वाज्ञां लङ्घयेद्यस्तु दीक्षितानान्तु निन्दकः॥ ३१ : ४७ ॥

सद्योजातशतञ्जप्त्वा ततः शुध्यति मन्त्रवित्।

31:38 वरस्त्रियम्] *conj.*; वरत्रियं C **31:39** सर्वसस्य॰] *conj.*; सर्वशस्य C **31:40** पूर्ववज्जपेत्] *conj.*; पूर्वजपेत् C (unmetrical) **31:40** सङ्करे] *em.*; शङ्करे C **31:42** ॰संकरजं] *em.*; ॰शंकरजं C **31:46** सद्योजातं] *em.*; सद्योतं C (unmetrical)

दुःस्वप्नदर्शने स्नात्वा जपेत्सद्यञ्च पूर्ववत्॥ ३१:४८॥

कर्मणा मनसा चैव प्रमादाद्भाषितेऽनृते।
वामदेवशतं जप्त्वा ततः शुध्यति किल्बिषात्॥ ३१:४९॥ (f. 76r)

अकामाद्रेतसोत्सर्गे जपेद्वामशतद्वयम्।
गर्भापहरको वक्त्रञ्जपेत्सम्यक्चतुःशतं॥ ३१:५०॥

धेनुं प्रमादतो हत्वा जपेत्सद्यादिपञ्चकं।
शतानि पञ्च प्रत्येकमीशानेन विशुध्यति॥ ३१:५१॥

मनसा चिन्तितं पापं कर्मणा न च तत्कृतं।
सप्तवाराञ्जपेद्घोरं ततः शुध्यति किल्बिषी॥ ३१:५२॥

स्थावराणां लताच्छेदे अघोरस्य शतं जपेत्।
चत्वरं लंघयेद्यस्तु दशरूपाणि तं जपेत्॥ ३१:५३॥

दिवासुप्तप्रमादाच्च जपेत्सप्त त्रिपञ्चकं।
गुरुञ्च खेदयेद्यस्तु दुष्टालापैश्च मूढधीः॥ ३१:५४॥

उपवासत्रयं कृत्वा जपेद्ब्रह्मशतत्रयं।
शिवारामे यदा कुर्यान्मूत्रोत्सर्गं शिवाङ्गणे॥ ३१:५५॥

प्रत्येकं सोपवासस्तु जपेद्ब्रह्म शतं क्रमात्।
चत्वरे वृक्षमूले वा श्मशाने च सकृत्त्यजेत्॥ ३१:५६॥ (f. 76v)

ईशानन्तु जपेन्मन्त्री प्रमादाच्छतपञ्चकं।
ऊषरे जलकृष्टे च नदीतीरेऽद्रिमस्तके॥ ३१:५७॥

विपरीतककुभो वापि सोऽप्यघोरशतञ्जपेत्।
नग्नो वा दीक्षितः स्नात उपोष्याष्टशतं जपेत्॥ ३१:५८॥

दीक्षिता ये शिवे भक्ता निन्दाङ्कुर्वन्त्यनिन्दिताः।
गुरुदेवाग्निविदुषान्दीक्षितानां शिवागमे॥ ३१:५९॥

सहस्रं पञ्चमस्यैकं जप्त्वा शुध्यति किल्बिषात्।
सर्पदष्टः शतं जप्त्वा उपवासाद्विशुध्यति॥ ३१:६०॥

31:60 सर्पदष्टः] *em.*; शर्पदर्ष्टः C

तन्त्राचारान्यदा निन्देदघोराष्टशतञ्जपेत्।
गुरुदेवाग्निवृद्धानां सन्निधौ स्नानभोजनं॥ ३१ : ६१॥

परिहासन्तथादर्पङ्कृत्वा पञ्चपवित्रकं।
दशवाराञ्जपेन्मन्त्री वक्रन्तु क्लीबभाषणात्॥ ३१ : ६२॥

गुरुपत्नी यदा दृष्टा दुष्टबुध्या शतं जपेत्।
बहुरूपं प्रमादात्तु विवस्त्रां त्रिशतञ्जपेत्॥ ३१ : ६३॥ (f. 77r)

अनस्थिप्राणिसंघातं हत्वा वै संहिताञ्जपेत्।
पक्षिणस्तु बहून्हत्वा तामेव त्रिगुणाञ्जपेत्॥ ३१ : ६४॥

सर्पमाण्डूकमार्जारनकुलश्वाश्वगर्दभान्।
उष्ट्रं गजं मृगं व्याघ्रं हत्वा चैशशतं जपेत्॥ ३१ : ६५॥

हत्वा शूद्रं स्त्रियं बालं शिवं पञ्चशतं जपेत्।
जपेदष्टसहस्राणि सच्छूद्रस्य निपातनात्॥ ३१ : ६६॥

चाण्डालिनी यदा ज्ञानान्मन्दिरे संव्यवस्थिता।
मृन्मयादि त्यजेद्भाण्डं कृच्छ्रचीर्ण्णे नरञ्जपेत्॥ ३१ : ६७॥

सहस्राणि तदा पञ्च ततः शुद्धिमवाप्नुयात्।
भुक्त्वा चाकामतश्चैव तप्तकृच्छ्राद्व्रताच्छुचिः॥ ३१ : ६८॥

कामतो यदि सा भुक्त्वा सकृत्कृच्छ्रातिकृच्छ्रतः।
वामदेवं जपेच्छुद्धिः पराकोऽन्तेऽथवा सकृत्॥ ३१ : ६९॥

ज्ञात्वा भुक्त्वाथवा तेन तदासौ तत्समो भवेत्। (f. 77v)
रजकीञ्चर्मकारीञ्च स्पृष्ट्वा वा मन्दिरे स्थितां॥ ३१ : ७०॥

भाण्डत्यागादजाच्छुद्धिस्त्र्यहात्पञ्चसहस्रिका।
अकामतो यदा स्पृष्टा भुक्त्वाघोरञ्जपेत्त्र्यहं॥ ३१ : ७१॥

कामाद्वा द्विगुणङ्कर्म सकृद्योगाद्भवेद्यदि।
अकामाद्वाथ संयोगः सञ्ज्ञातस्तद्द्वयोरपि॥ ३१ : ७२॥

तदा चान्द्रायणङ्कार्यमन्यथा नैव शुध्यति।

31:65 उष्ट्रं] *em.*; उष्टं C

बहुदैवसिको योगः सञ्जातः कामतोऽपि वा॥ ३१ : ७३॥

तदा चान्द्रायणं कार्यं वारिणा केवलेन तु।
मासार्धं ग्रासवृद्धिः स्याच्छुक्ले कृष्णे च ह्रासयेत्॥ ३१ : ७४॥

चान्द्रायणविधिः प्रोक्तो जलाच्चैव जलात्मकः।
एकभुक्तं त्र्यहं कुर्यात्त्र्यहङ्कुर्यादयाचितम्॥ ३१ : ७५॥

त्र्यहञ्च नक्तभोजीत्वं त्र्यहंस्यान्मारुताशनः।
एवं कृच्छ्रः समाख्यातः प्राजापत्यं यथा विधिः॥ ३१ : ७६॥ (f. 78r)

त्र्यहमुष्णं पिबेद्वारि त्र्यहंस्यात्क्षीरभोजनं।
त्र्यहमुष्णं घृतं पीत्वा निराहारो दिनत्रयं॥ ३१ : ७७॥

तप्तकृच्छ्रं समाख्यातमतिकृच्छ्रमतः शृणु।
क्षीरस्य त्रिपलं पानन्दिवसानेकविंशतिः॥ ३१ : ७८॥

अतिकृच्छ्रं समाख्यातं पराकं शृणु साम्प्रतं।
द्वादशाहन्निराहारः पराकस्य विधिः स्मृतः॥ ३१ : ७९॥

पर्वसन्धिषु सर्वेषु कदाचिन्मैथुनन्दिवा।
कृत्वायुतं जपेत्प्राज्ञः प्रणवस्य व्रते स्थितः॥ ३१ : ८०॥

रात्रौ कृत्वायुतार्द्धन्तु सन्ध्यायामयुतं जपेत्।
कथां मैथुनजाङ्कृत्वा हृद्बीजस्य शतञ्जपेत्॥ ३१ : ८१॥

ब्रह्मचर्यादृते धीमान्प्रायश्चित्तं गृही चरेत्।
गृहस्थानान्तु सर्वेषान्दीक्षितानां शिवाध्वरे॥ ३१ : ८२॥

दशाहेन भवेच्छुद्धिः सूतके मृतके तथा। (f. 78v)
एकवृध्याचतुर्णान्तु अनध्यायो दिनानि तु॥ ३१ : ८३॥

समयादिविधिस्थानान्तपः स्थानान्तु यद्विधिः।
देवाग्निगुरुकार्येषु विच्छेदो नैव विद्यते॥ ३१ : ८४॥

ब्रह्मचर्यन्ततो मौनं क्षान्तिराहारलाघवं।

31:76 मारुताशनः] *em.*; मारुतासनः C **31:78** °विंशतिः] *em.*; °विसतिः C

एतद्घोरं समुद्दिष्टन्तपो वै पञ्चलक्षणं॥ ३१ : ८५॥

स्वधर्मस्थः क्रियानिष्ठो ज्ञानवृत्तिं समाश्रितः।
शुध्यते तत्क्षणात्स्नानान्नित्यहानिरतोऽन्यथा॥ ३१ : ८६॥

पृथक्पाकः प्रकर्तव्यस्तद्योगं वर्ज्जयेत्सदा।
तद्योगाद्दोषसंबन्धस्तदासौ तत्समो भवेत्॥ ३१ : ८७॥

तस्य वै तामसी शुद्धिर्याचकान्नक्तभोजनात्।
त्रिष्कालं शुध्यते स्नानाद्घोरजापाच्छतत्रिकात्॥ ३१ : ८८॥

न हानिर्न पृथक्पाकस्तदा शुद्धिस्त्र्यहात्मिका।
हानिश्चैव पृथक्पाकस्तदा शुद्धिस्त्र्यहात्मिका॥ ३१ : ८९॥ (f. 79r)

पतनात्पूर्णगर्भस्य शुद्धिः स्यात्तत्क्षणात्मिका।
अर्वाक्स्याच्चूडसंज्ञस्य मृतो वालो न दुष्यति॥ ३१ : ९०॥

येषान्तत्सूतकन्तेषां स्पर्शः पञ्चदिनार्द्धतः।
कारुकाणान्तथा राज्ञां शिल्पिनां राजसेविनां॥ ३१ : ९१॥

वैद्यानां दासकादीनां सद्यःशौचम्प्रकीर्तितं।
न चैवात्यन्तनियमो निःसङ्गानान्तपश्विनां॥ ३१ : ९२॥

शिवज्ञानानलज्वालप्रध्वस्ताज्ञानचेतसां।
यथा पर्वतमादीप्तन्नाश्रयन्ति मृगद्विपैः॥ ३१ : ९३॥

तद्वद्ब्रह्मविदन्दोषा नाश्रयन्ति कदाचन।
सर्वस्य समता दृष्टा शुध्यर्थमविचारतः॥ ३१ : ९४॥

शुद्धिरपि मुनिव्याघ्र सङ्गत्यागात्प्रकीर्तिता।
प्राणाः शुध्यन्ति विधिवत्प्राणायामबलात्सदा॥ ३१ : ९५॥

ध्यानाच्छुद्धिः समुद्दिष्टा प्रधानस्य महात्मनः। (f. 79v)
विवेकाच्छुध्यते ह्यात्मा यथोक्तं परमेष्ठिना॥ ३१ : ९६॥

सत्येन मनसः शुद्धिरिन्द्रियाणां यमादिभिः।

31:92 °शौचम्] *em.*; °सौचम् C

अहिंसासत्यमस्तेयं ब्रह्मचर्यमकल्कता॥ ३१:९७॥

पञ्चैते तु यमाः प्रोक्ता नियमांश्च निबोध मे।
अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवं॥ ३१:९८॥

अप्रमादस्तु पञ्चैते नियमाः संप्रकीर्तिताः।
धृतिः क्षमा दयास्तेयं शौचमिन्द्रियनिग्रहः॥ ३१:९९॥

ह्रीर्विद्या सत्यमक्रोधो दश धर्मस्य लक्षणाः।
सत्यशौचं मनः शौचं शौचमिन्द्रियनिग्रहः॥ ३१:१००॥

सर्वभूतदयाशौचं जलाशौचन्तु पञ्चमम्।
आत्मज्ञानं स्मृतं षष्ठम्भवेद् विच्छेदकारकम्॥ ३१:१०१॥

ग्लानेभो व्याधितेभ्यो वा पतिभ्यः किञ्चिदौषधं।
सर्वेभ्यः सर्वदा ग्राह्यन्नदोषोस्त्यत्र शासने॥ ३१:१०२॥ (f. 80r)

न त्यजेत्क्षणमेकञ्च स्मरणं पारमेश्वरं।
नाशुचिः क्षणमप्येकन्तिष्ठेद्वै दीक्षितोऽत्र तु॥ ३१:१०३॥

दशोर्द्धन्त्रिशतादर्वाग्भवेत्स्नानजपाच्छुचिः।
तदूर्ध्वं पञ्चमं यावच्छतं नक्तेन भोजनं॥ ३१:१०४॥

उपवासन्ततश्चोर्ध्वं त्रिरात्रञ्चायुतं जपेत्।
ज्ञात्वा बलाबलं ज्ञानजातिम्भक्तिसहिष्णुतां॥ ३१:१०५॥

दद्यात्तस्य तदा मन्त्री लघु वा गुरु वा समं।
तच्चावश्यं प्रकर्तव्यमथवा गुरुभाषितं॥ ३१:१०६॥

प्रायश्चित्तम्प्रकर्तव्यमन्यथा पतनं भवेत्।
पुरुषाघोरवामाजा जातीशा ब्राह्मणादिषु॥ ३१:१०७॥
अन्त्यजानान्तु सर्वेषामीशानः प्रभुरिष्यते॥ ३१:१०८॥

॥ इति वामदेवीये क्रियासंग्रहे प्रायश्चित्तपटलं समाप्तमिति॥ (f. 80v)

31:97 अहिंसासत्यमस्तेयं] *em.*; अहिंसासत्यमयम् C (unmetrical) 31:101 जलाशौचन्तु] *conj.*; चलशौचञ्चतु C 31:101 °कारकम्] *conj.*; °काकं C (unmetrical) 31:105 °श्चोर्ध्वं] *conj.*; °श्चोर्द्धं C

॥ अथाद्ये जयद्रथाधिकारे पिङ्गलामते प्रायश्चित्तं लिख्यते॥

वामे वामानुवर्त्ती च दक्षे दक्षिणगोचरी।
सामान्यः वामदक्षेऽपि प्रायश्चित्तन्तु लिख्यते॥ ३२:१॥

द्विगुणश्च जपः कार्यः सन्ध्यालोपे च मन्त्रिणा।
प्रमादात्कथितं भद्रे कामतश्च चतुर्गुणः॥ ३२:२॥

प्रमादाह्निकविच्छेदे कर्तव्यस्तु चतुर्गुणः।
जपश्च साधकेन्द्रेण कामतस्तद्विधा भवेत्॥ ३२:३॥

प्रमादाद्धोमसञ्च्छेदे हुत्वा च द्विशतं जपेत्।
कामाच्चतुर्गुणं हुत्वा जपेच्चैव चतुर्गुणं॥ ३२:४॥

प्रमादाज्जपभङ्गेन आपूर्य तत्समञ्जपेत्।
कामतो जपभङ्गे च जपेद्देवि चतुर्गुणं॥ ३२:५॥

स्वमन्त्रैश्चैव कर्तव्यं वैशेषिकमुदाहृतं।
मन्त्रं सामान्यमाख्यामि प्रायश्चित्ते यथा भवेत्॥ ३२:६॥ (f. 81r)

ओं नमो भगवते रुद्राय शूलपाणये हन हन दह दह पच पच नाशय नाशय सर्वपापम्भक्ष सर्वपापं भक्ष भक्ष ह्रीं हूं फठ् स्वाहा॥

विद्या सामयकी ख्याता प्रायश्चित्तार्थकर्मिणां।
प्रमादाच्चालिते लिङ्गे स्थिरे वा चलसंज्ञके॥ ३२:७॥

पीठे वा पिण्डिकायां वा विद्यालक्षञ्जपेद्बुधः।
प्रायश्चित्तार्थकञ्जप्त्वा होमङ्कृत्वा तथा पुनः॥ ३२:८॥

पूर्वोक्तेन विधानेन कर्तव्यं स्थितिस्थापनं।
चललिङ्गे च निर्दग्धे तस्करेण हृतेऽथवा॥ ३२:९॥

प्रायश्चित्तं स्मृतन्तत्र विद्यालक्षं जपेत् प्रिये।
हस्ताच्च पतिते लिङ्गे वहति स्थापितेऽथवा॥ ३२:१०॥

तत्रापि लक्षमावर्त्य पुनःसंस्कारमर्हति।
जपतश्चाक्षसूत्रस्य पतनादयुतं जपेत्॥ ३२:११॥ (f. 81v)

32:4 प्रमादाद्धोम°] *conj.*; प्रमादाधोम° C

निद्रया च यदा भूतः पतते साधको भुवि।
तदार्द्धलक्षञ्जप्तव्यन्नपतेदयुतं जपेत्॥ ३२ :१२॥

गुरुन्देवन्तथाशास्त्रम्पादेन स्पृशते यदि।
प्रमादादयुतं जाप्यं कामतो नियुतं जपेत्॥ ३२ :१३॥

गुरुसम्बन्धिनश्चैव शयनासनपादुकाः।
देवस्य गड्डुकाद्यञ्च पादेन स्पृशते यदि॥ ३२ :१४॥

प्रमादादर्द्धायुतञ्जाप्यं कामतश्चायुतं जपेत्।
पतिते पुस्तके हस्तात्स्थापिते यत्र तत्र वा॥ ३२ :१५॥

तत्सूत्रे भूगते वाथ भूमौ पुस्तकवाचने।
आसने शयने स्थाप्यं पटले तु गृहस्य च॥ ३२ :१६॥

विद्यापञ्चशतं जाप्यं कामतस्तद्विधा जपेत्।
जीर्णागमं स्वसिद्धान्तं पुस्तं जीर्णं घृतप्लुतं॥ ३२ :१७॥

अग्निकुण्डे तु होतव्यं हुत्वा विद्याशतञ्जपेत्।
पुष्पोच्चयनकाले तु तृणकाष्ठादिच्छेदने॥ ३२ :१८॥ (f. 82r)

सकृदुच्चार्य विद्यान्तु यत्किञ्चित्तत्समाचरेत्।
दुःस्वप्ननाशने चैव सप्तधावर्तयेच्छुचिः॥ ३२ :१९॥

निर्निमित्तन्तथा घाते प्राणिनां शतधा जपेत्।
पक्षिणां घातने चैव निर्निमित्तेन भामिनि॥ ३२ :२०॥

विद्यायायारिनामायास्त्रिशतं जपमाचरेत्।
निर्निमित्तञ्चतुष्पादघातने नवधा शतं॥ ३२ :२१॥

निर्विनोदं द्विजं हत्वा कामकारेण मन्त्रिणा।
विद्यापापारिणा भद्रे जाप्या दशसहस्रिका॥ ३२ :२२॥

यागार्थञ्च पशुं हत्वा तन्त्राचारस्य दूषकं।
न दोषो द्विजवधे नित्यन्न वधेत्तद्विलोमतः॥ ३२ :२३॥

अन्यांश्च मानुषान्हत्वा तदर्द्धञ्चाविनोदतः।

32:16 आसने] *em.*; असने C

बौद्धार्हन्तलिङ्गानां तथा वैष्णवलिङ्गिनाम्॥ ३२ : २४ ॥

न भेदो निर्न्निमित्तेन भेदाद्वाप्ययुतञ्जपेत्। (f. 82v)
शिवाग्निगुरुनिन्दायाः कर्तुर्घातेन दोषभाक्॥ ३२ : २५ ॥

शिवव्रतधरच्छायालंघनाच्छतधा जपेत्।
हत्वा च तान् अकामेन पञ्चधायुतकञ्जपेत्॥ ३२ : २६ ॥

कामतो नियुतं जाप्यङ्कलहेनायुतं जपेत्।
अकामाल्लिङ्गभेदे तु लक्षपञ्चाशतञ्जपेत्॥ ३२ : २७ ॥

कामतो द्विगुणञ्जाप्यं गुरूणां सम्मतेन तु।
तपश्विनान्निन्दने चैव योगिनीनान्तु दूषणे॥ ३२ : २८ ॥

स्त्रीणाञ्च ताडने चैव शिवज्ञानस्य दूषणे।
त्र्ययुतञ्चैव जप्तव्यं न जपेद्विघ्नभाग्भवेत्॥ ३२ : २९ ॥

द्रव्याणान्दूषणे चैव वीरचक्रे च संस्थिते।
तत्कालकलहोत्पन्ने सहस्रेण शुचिर्भवेत्॥ ३२ : ३० ॥

अथवा भोजनं कार्यं समं तेन तपस्विनां।
गुरुद्रोहे कृते नैव अज्ञानान्मोहवासनात्॥ ३२ : ३१ ॥ (f. 83r)

पुनः सन्तापनङ्कृत्वा तद्गुरुं यदि सर्पयेत्।
तदालक्षजपन्तस्य दातव्यं गुरुणा प्रिये॥ ३२ : ३२ ॥

गुरुपत्नीङ्गतो मोहात्सकृत् पश्चात् पुनस्त्यजेत्।
पुनः सन्तापनं कृत्वा प्रायश्चित्ताय सर्प्पति॥ ३२ : ३३ ॥

तस्यापि लक्षजाप्यन्तु दातव्यन्निर्विकल्पतः।
न त्यजेत्कामतो मोहान्नारकीस्यान्न संशयः॥ ३२ : ३४ ॥

प्रायश्चित्तन्न तस्योक्तं दीक्षाफलविरोधिनः।
आत्मघाती गुरोर्घाती घाती चैव परस्परं॥ ३२ : ३५ ॥

प्रमादात्तापनं कृत्वा प्रायश्चित्तं च मार्गति।

32:24 °लिङ्गानां] *conj.*; °लिङ्गानाञ्च C (unmetrical) **32:27** °शतञ्जपेत्] *em.*; °शकञ्जपेत् C **32:28** तपस्विना°] *conj.*; तपश्विना° C **32:31** तपस्विनां] *conj.*; तपश्विनां C

विद्यालक्षञ्जपं तस्य दातव्यञ्चुम्बकेन तु॥ ३२ : ३६॥

गुरुं सन्तोष्य यत्नेन पुनःसंस्कारमर्हति।
गुरुगुरुतराद्यैस्तु प्रमादाद्रक्तदर्शनात्॥ ३२ : ३७॥

दशलक्षं जपेत्तस्य तद्गुरोर्यदि संमतं। (f. 83v)
गुरोः स्थानविनाशी च तस्याचारस्य लङ्घनात्॥ ३२ : ३८॥

स्वागमस्य विरोधी च अस्थितिस्थितिकारकः।
†पुनर्लोकात्सम्भीतो† गुरुभ्यस्स गुरुम्व्रजेत्॥ ३२ : ३९॥

त्यक्ताचारविरुद्धस्तु प्रायश्चित्तञ्च मार्गति।
दशलक्षञ्जपन्तस्य दातव्यं शास्त्रवेदिभिः॥ ३२ : ४०॥

तेनापि भक्तिमाश्रित्य शुचिस्तद्गतमानसः।
विजने च शुचिस्थाने जप्तव्यं यावत्पूर्वके॥ ३२ : ४१॥

सम्पूर्णे च जपे पश्चाज्जपस्तेषां समर्पयेत्।
तेभ्यो भोज्यम्प्रदातव्यं व्रताख्यं द्रव्यसंभवं॥ ३२ : ४२॥

यद्यसौ भोजयेन्नैव अभोज्यं जपितेष्वपि।
अथवा पुष्पताम्बूलचन्दनोदकप्राशने॥ ३२ : ४३॥

धारणे लेपने शुद्धिर्गुरुभ्यश्चावधारणे। (f. 84r)
यथाशक्त्या तु मन्त्रज्ञैः कर्तव्यञ्चावधारणं॥ ३२ : ४४॥

प्रायश्चित्ते सुचीर्णे तु वर्तते चाविरोधतः।
पारम्पर्यन्तु वर्त्ती च वर्त्तयेच्चाविशङ्कितः॥ ३२ : ४५॥

॥ इत्याद्ये जयद्रथाधिकारे पिङ्गलामते प्रायश्चित्तपटलं समाप्तमिति॥

॥ अघोरेश्वरीस्वच्छन्दे मन्त्रपीठे द्वादशसाहस्रे प्रायश्चित्तं लिख्यते॥

देवचण्डगुरोर्द्रव्यं कामतो भक्षितं यदा।
द्विलक्षं बहुरूपस्य जपेल्लक्षमकामतः॥ ३३ : १॥

32:38 °विनाशी] *em.*; °विनासी C **32:43** °ताम्बूल°] *em.*; °ताम्वूल° C **32:45** °विशङ्कितः] *em.*; °विसङ्कितः C **32:45** जयद्रथा°] *em.*; जयद्रता° C

चतुःपञ्चगुणम्वापि दत्वा स्वञ्च विशुध्यति।
तदर्धेन तु संयोगी तदर्धेन च सङ्करी॥ ३३:२॥

तदर्द्धं प्रतिसङ्करे जप्त्वोपोष्य निशाद्वयं।
तेषामपि हि ये चान्ये कलुषितास्तु चेतसि॥ ३३:३॥

सहस्रेण विशुद्धिः स्यादघोरेण जपस्य तु। (f. 84v)
गुरुतल्पगतानान्तु अग्निवर्णामयः स्त्रियं॥ ३३:४॥

अवगृह्य त्रयःप्राणायामान्मुच्येत पातकात्।
अथवा दशलक्षाणि जप्त्वाघोरस्य सुन्दरि॥ ३३:५॥

लक्षैकं गड्डुकान्दत्वा कामतोऽपि विशुध्यति।
अकामात्सप्तलक्षाणि जप्त्वा स्नानार्चनेषु च॥ ३३:६॥

शुध्यते नात्र संदेहो लक्षार्द्धङ्गड्डुकैः सह।
व्यापादितो यदा लिङ्गी शैवो वान्याश्रमी तथा॥ ३३:७॥

प्रायश्चित्तञ्चरेन्मन्त्री गुरूक्तं शिवभाषितं।
षट्सप्तबहुभिर्दत्तमाचार्यैर्गुरुणा विना॥ ३३:८॥

कर्तव्यं शास्त्रसंसिद्धं महापातकशुद्धये।
उपपातकसामान्यैर्द्दत्वातिक्रममादिशेत्॥ ३३:९॥

कर्तव्यमात्मनान्यैर्वा देशिकैर्नेतरैर्ज्जनैः।
दशलक्षञ्जपेत्पूर्वन्द्विलक्षङ्गड्डुकान्ददेत्॥ ३३:१०॥ (f. 85r)

प्रातःस्नानं शिवे पूजा यावज्जाप्यं समाप्यते।
समाप्ते त्रिदिनं नक्तन्निराहारस्तथा त्रयं॥ ३३:११॥

अयाचितत्रयं कृत्वा शुद्धिस्तत्र प्रकीर्तिता।
एवम्वै विमले प्रोक्तं पञ्चार्थकारिके तथा॥ ३३:१२॥

तदा शुद्धिर्भवेद्देवि शैवादौ द्योतिते प्रिये।
अकामात्पादहीनन्तु विहीनं गड्डुकञ्चरेत्॥ ३३:१३॥

चरेत्पादं सकामोऽपि तत्संयोगी विशुध्यति।

पादार्द्धेन त्वकामस्य पादात्पादन्तु सङ्करे॥ ३३ :१४॥

तृतीये वा चतुर्थे वा पादहीनं चरेत्क्रमात्।
शेषाणामयुतैकेन शुद्धिस्तेषामुदाहृता॥ ३३ :१५॥

शिवलिङ्गी क्रमं ज्ञात्वा प्रायश्चित्तं हते यथा।
पादूनं †भगवघ्नस्य भगवात्पादन्द्विजे हते†॥ ३३ :१६॥

द्विजतुल्यं हते बौद्धे पादूनं क्षपणे हते। (f. 85v)
एवञ्जापः प्रकर्तव्यो गड्डुकानाङ्क्रमात्तथा॥ ३३ :१७॥

चीर्णे शुद्धिः सकामानामकामार्धं विधीयते।
प्रायश्चित्तेषु सर्वेषु गड्डुकानाञ्जपस्य तु॥ ३३ :१८॥

अकामात्कामतो ज्ञात्वा तत्संयोगी च सङ्करी।
प्रतिसङ्करसङ्कीर्णं बुद्ध्वातिक्रममादिशेत्॥ ३३ :१९॥

गाञ्च समयिनङ्कन्यां हत्वा लक्षञ्जपेद्बुधः।
उपोष्यरजनीः पञ्च गड्डुकानां शतत्रयं॥ ३३ :२०॥

दत्वा शुद्धिमवाप्नोति पादूनं वाप्यकामतः।
निन्दा देवगुरोः शास्त्रे अयुतैकं जपेच्छुचिः॥ ३३ :२१॥

व्रतिने तु हते क्रोधाद्यदि मृत्युर्न जायते।
रक्तस्य दर्शनं दृष्ट्वा त्रिलक्षाणि जपेन्नरः॥ ३३ :२२॥

रक्तन्न दृश्यते वाथ तदा लक्षेण शुध्यति।
किन्तु दद्यात्सहस्रैकं गड्डुकानां शिवस्य तु॥ ३३ :२३॥

अकामात्कामतो वाप्येवं शुद्धिः स्यान्नान्यथा प्रिये। (f. 86r)
लिङ्गं गुरुन्तथा शास्त्रम्प्रतिमां वाथ कामतः॥ ३३ :२४॥

पादेन यदि संस्पृष्टा जपेत्तत्रायुतद्वयं।
कामतः षड्गुणङ्कार्यङ्गड्डुकानां शतत्रयं॥ ३३ :२५॥

तदा निर्दोषतान्मन्त्री नान्यथा शुद्धिमर्हति।

33:14 सङ्करे] *em.*; शङ्करे C 33:17 क्षपणे] *em.*; क्षपने C 33:23 सहस्रैकं] *em.*; सस्रैकं C (unmetrical) 33:26 निर्दोषता°] *conj.*; निदोषता° C

गुरुशय्यासनं यानं पादुकोपानहौ तथा॥ ३३ :२६॥

अकामाद्रोहणं कृत्वा सहस्रावर्तने शुचिः।
ज्ञात्वा यदारुहेत्प्राज्ञस्तदा वै षड्गुणञ्जपेत्॥ ३३ :२७॥

अघोरेण चरेत्मन्त्री पापशुद्धिस्तदा भवेत्।
आज्ञालोपं गुरोः कृत्वा शिवे चण्डेश्वरेऽपि वा॥ ३३ :२८॥

लक्षञ्जप्त्वा ततः शुद्धिः गड्डुकानां शताष्टभिः।
अकामादयुतं जाप्यं गड्डुकानां शतं ददेत्॥ ३३ :२९॥

आदेशं गुरवे लोप्य शतसाहस्रिकं जपेत्। (f. 86v)
प्रायश्चित्ते कृते शुद्धिरकामात्सहस्रं जपेत्॥ ३३ :३०॥

नित्यकर्मण्यभावे च जपहोमार्चनादिके।
जपेत्पञ्चशतं घोरङ्कामतः शुद्धिरिष्यते॥ ३३ :३१॥

अकामाच्छतमेकन्तु द्विगुणञ्चाह्निके भवेत्।
गवाग्निमथ कौमारीं प्रतिमाञ्चापि सुन्दरि॥ ३३ :३२॥

पादेन संस्पृशेत्मोहाच्छतैः स्यात्पञ्चभिः शुचिः।
तिरस्कारं दीक्षितानान्दत्वा क्रोधवशङ्गतः॥ ३३ :३३॥

जपेत्पञ्चशतान्मन्त्री अघोरेण विशुध्यति।
कामयित्वा तु कौमारीं महाव्रतधरीं पुनः॥ ३३ :३४॥

विशेषाच्छिन्ननासोष्ठीं सहस्रावर्तनाच्छुचिः।
अघोरो हरते घोरं दुष्कृतन्तस्य सुन्दरि॥ ३३ :३५॥

गुरवं रोषयित्वा तु क्रोधदोषेण वा वदेत्।
अवश्यं तं चरेन्मन्त्री अचीर्णे बन्धनम्भवेत्॥ ३३ :३६॥ (f. 87r)

बध्यते किम्विचारेण नान्यो वै मोचने क्षमः।
गुरोरपि अभावत्वान्मृतो वा प्रवसितो यदि॥ ३३ :३७॥

उपसन्ने तदा तस्य सम्प्रधार्य त्रिपञ्चभिः।

33:26 यानं] *conj.*; यान C **33:35** ॰नासोष्ठीं] *em.*; ॰नाशोष्ठीं C

दातव्यं देशिकेन्द्रैस्तु प्रायश्चित्तं चरेद्बुधः॥ ३३ : ३८॥

सहस्रम्वाथ तस्यार्धं गुरु वा लघु वा समं।
अघोरेण प्रदातव्यं चरित्वा शुध्यते भृशं॥ ३३ : ३९॥

होमार्थञ्चैव गुर्वर्थे लिङ्गार्थं याचितं च यत्।
लौल्येन तृष्णया वाथ भक्षयेत्तं तु दुर्मतिः॥ ३३ : ४०॥

जपेल्लक्षं सपादञ्च तस्य शुद्धिस्तदा भवेत्।
अकामात्पादहीनन्तु जप्त्वा शुद्धिमवाप्नुयात्॥ ३३ : ४१॥

लंघयेच्छिवनिर्माल्यम्प्रणालम्वाथ लंघयेत्।
जप्त्वायुतत्रयम्मन्त्री गड्डुकानां शताष्टकं॥ ३३ : ४२॥ (f. 87v)

कामतस्तु विशुध्येत प्रमादादयुतद्वयं।
जलाग्निपतने वापि संन्यस्तामरणं यदा॥ ३३ : ४३॥

न मृता हीनसत्वा ये तेषां शुद्धिम्वदामि ते।
लक्षार्द्धङ्गड्डुकानान्तु पञ्चलक्षं जपेत्पुनः॥ ३३ : ४४॥

तावत्स्नानार्च्चनन्तस्य यावज्जाप्यं समाप्यते।
कामतश्च विशुध्येत कथितं तव सुन्दरि॥ ३३ : ४५॥

पतनस्य न दोषोऽस्ति स्थानादारोहणं विना।
मार्ग्गान्निवर्त्तिनो हीना असंन्यस्तमयागताः॥ ३३ : ४६॥

महापथेऽपि एतत्स्याङ्गैरवेऽपि समाचरेत्।
अकामाल्लङ्घिता छाया गुरुलिङ्गं तपस्विनाम्॥ ३३ : ४७॥

अघोरेण चरेन्मन्त्री प्रायश्चित्तं शतङ्क्रमात्।
कामतो द्विगुणं जाप्यङ्कन्याच्छायां तथाचरेत्॥ ३३ : ४८॥

प्राकारतोरणेऽट्टाले श्मशाने चत्वरे गुहां। (f. 88r)
चतुःपथे च शृङ्गाटे नदीमध्ये च सङ्गमे॥ ३३ : ४९॥

एकवृक्षे च कूपादौ विण्मूत्रं नैव कारयेत्।

33:42 प्रणाल°] *em.*; प्रनाल° C   **33:47** तपस्विनाम्] *em.*; तपश्विनाम् C

अकामाद्द्विशतं घोरं जपेत्कामाच्छतत्रयं॥ ३३ :५०॥

एवमन्येषु क्षेत्रेषु शुद्धिर्घोरजपाद्भवेत्।
घातयित्वा पशुं स्वार्थे सामान्यं प्राणिनं क्वचित्॥ ३३ :५१॥

सामान्यैः षट्च्छतं जाप्यं च्छागाद्यैर्द्विसहस्रकं।
आदेशं गुरवे दत्वा जपेद्दशशतं शुचिः॥ ३३ :५२॥

अकामाद्यच्छताच्छुद्धिरेवमन्यत्महन्तरे।
पादुकोपानहौ शय्यामासनञ्च तथैव च॥ ३३ :५३॥

पद्भ्यां स्थित्वा प्रमादाच्च शिरसा धारणे जपेत्।
अघोरं द्विशतं मन्त्री कामतः षड्गुणं जपेत्॥ ३३ :५४॥

गुर्वङ्गभूषणं यच्च वस्त्रच्छत्रादि सुन्दरि।
पद्भ्यां न संस्पृशेन्मन्त्री जिगीषान्नात्मनश्चरेत्॥ ३३ :५५॥

कृत्वा चैव प्रमादेन द्विशतेन विशुध्यति। (f. 88v)
कामतस्त्रिगुणं कृत्वा तस्य शुद्धिर्ध्रुवम्भवेत्॥ ३३ :५६॥

सङ्करञ्जन्महीनैस्तु समयाचारलङ्घनैः।
कृत्वा पुनश्चरेन्मन्त्री प्रायश्चित्तेन शुध्यति॥ ३३ :५७॥

अयुतैकञ्जपेद्घोरमकामाच्छुध्यते उमे।
कामतस्त्रिगुणङ्कार्यं लक्षं सकलुषश्चरेत्॥ ३३ :५८॥

दुःखमुत्पादयित्वा तु कन्यानां च तपस्विनाम्।
असंस्तुतैर्यदा वाक्यैर्न्निभर्त्सयेत्तमोवृतः॥ ३३ :५९॥

अघोरस्य शतान्पञ्च जप्त्वा चैव क्षमापयेत्।
यदा न क्षमते कश्चिद्द्विगुणन्तु जपेत्तदा॥ ३३ :६०॥

आहवे गोग्रहे वैरे विद्वरे तस्करेऽपि वा।
वधयन्तं वधेद्विप्रं न तेन ब्रह्महा भवेत्॥ ३३ :६१॥

भवेद्दोषो हते लिङ्गिन्यस्मिन्वा व्रतिन्यपि।

33:57 सङ्कर°] *conj.*; शङ्कर° C **33:59** °त्पादयित्वा] *em.*; °त्पायित्वा C (unmetrical) **33:59** तपस्विनाम्] *em.*; तपश्विनाम् C **33:61** वधयन्तं] C^{pc}; वध ×न्त× यन्तं C

येन केन हि दोषेण कर्मभिर्दुष्टकुत्सितैः॥ ३३ : ६२॥ (f. 89r)

चौर्ये वा प्रतिलक्षन्तु न वधेन्नैव निग्रहेत्।
निग्रहो नैव कर्तव्यः स्त्रीणाञ्चैव तपस्विनाम्॥ ३३ : ६३॥

लिङ्गभेदः स्त्रियो हत्वा भवेद्वै घातितैस्तु तैः।
निर्द्धारणपरो दण्डा यतिकन्यां शताम्भवेत्॥ ३३ : ६४॥

अपराधसहस्रेऽपि न हन्यान्न विडम्बयेत्।
शतं चोच्चासने जप्त्वा पादुके गुरुसन्निधौ॥ ३३ : ६५॥

अकामादुपविष्टस्तु तेन शुद्धिरकामतः।
कामतः षड्गुणञ्जप्त्वा अघोरेण विशुध्यति॥ ३३ : ६६॥

पैशुन्ये द्वेषवादे वा विरुद्धञ्जल्पितं यदि।
ज्येष्ठादिभिः सहान्यैर्वा प्रायश्चित्तं शतं जपेत्॥ ३३ : ६७॥

त्रिगुणं चोच्चवर्गाणामेवं शुद्धिरुदाहृता।
गुरुणापि समञ्जल्पं कृत्वा रागपदे स्थितः॥ ३३ : ६८॥

जपेदष्टसहस्रन्तु अघोरस्य तदा शुचिः।
किन्तु तस्य विशेषेण चन्दनञ्च क्षमापनं॥ ३३ : ६९॥ (f. 89v)

कृत्वागमाविरोधेन एवं सोऽपि विशुध्यति।
अथवा सर्वदोषाणां सामान्यं पापसंग्रहं॥ ३३ : ७०॥

प्रायश्चित्तविभागेन ज्ञात्वा कर्म लघुं गुरुं।
कर्तव्यं शास्त्रसंसिद्धमथवा गुरुभाषितं॥ ३३ : ७१॥

गुरुवाक्यम्प्रमाणम्वै किन्तु तद्भाषितम्मया।
यद्ददाति गुरुः शिष्ये तेन शुद्धं यथा शिवे॥ ३३ : ७२॥

सोऽपि दद्याद्बलं ज्ञात्वा कालं पात्रम्वयो वसु।
शुध्यर्थञ्च परेषान्तु गुरुकर्महितं जपेत्॥ ३३ : ७३॥

प्राणपीडा तथायासं यथा नृणान्न जायते।

33:63 तपस्विनाम्] *em.*; तपश्विनाम् C

दातव्यङ्कर्मसारेण संक्षिप्तं सुविचारितम्॥ ३३ : ७४ ॥

अन्यैर्वाथ प्रकर्तव्यं भ्रातृभग्नो शिष्यैरपि।
प्राणोत्पन्ने च संदेहे सम्पाद्येत ततः परे॥ ३३ : ७५ ॥

अथ वृद्धातुरा बाला व्याधिभिः परिपीडिताः।
तेषां संक्षिप्तमेवोक्तं स्त्रीणां चैव तथैव हि॥ ३३ : ७६ ॥ (f. 90r)

महापातकशुध्यर्थङ्गुरुर्दद्याद्गुरोरपि।
उपपातकसामान्यैर्बुद्धा बुद्धात्मना चरेत्॥ ३३ : ७७ ॥

एवमन्यानि पापानि उक्तानुक्तानि यानि तु।
भागं संकल्प्य शोध्यानि अशुधान्येव शुद्धिभाक्॥ ३३ : ७८ ॥

॥ इति अघोरेश्वरीस्वच्छन्दे मन्त्रपीठे द्वादशसाहस्रे प्रायश्चीत्तपटलं समाप्तमिति॥

॥ अथ मन्त्रपीठस्वच्छन्दे प्रायश्चित्तं लिख्यते॥

अर्च्चनन्तु यदा मन्त्री दिनमेकन्न कारयेत्।
सहस्रार्धञ्जपेन्मन्त्री द्विगुणञ्चार्च्चनम्भवेत्॥ ३४ : १ ॥

यथार्च्चनं जपस्तद्वद्द्विगुणः परिकीर्तितः।
हानिङ्कृत्वा समाधीनां समाधींश्च तथैव च॥ ३४ : २ ॥

समयज्ञे तथा पुत्रे साधकाचार्ययोरपि।
शत्वालापे तथा क्रोधे कथयामि शृणु प्रिये॥ ३४ : ३ ॥

द्वे सहस्रे जपङ्कुर्यात्समयाक्रोशने कृते। (f. 90v)
पुत्रके द्विगुणङ्कुर्यात्साधके द्विगुणञ्जपेत्॥ ३४ : ४ ॥

आचार्यैकशते देवि द्विगुणं साधकस्य तु।
ताडिते समयज्ञे तु यष्ट्यादिभिरनेकशः॥ ३४ : ५ ॥

यत्र रक्तं न दृश्येत बहुदण्डैश्च ताडितः।
द्वेऽयुते च वरारोहे कथिते च मया तव॥ ३४ : ६ ॥

33:74 सुविचारितम्] *em.*; शुविचारितम् C 34:4 ०क्रोशने] *conj.*; ०क्रोषन C 34:5 आचार्यैकशते] *conj.*; आचार्यैकशिने C

पूर्ववच्च फलं धत्ते द्विगुणम्पुत्रकादिषु।
क्षुरिकादिभिः सहस्रैस्तु हतस्तु लकुटादिभिः॥ ३४ :७॥

रक्तेन विह्वलीभूतो ह्यतिक्लेशेन जीवितः।
लक्षांश्चैव तु पञ्चाशत्कथितास्तव सुन्दरि॥ ३४ :८॥

हन्यात्समयिनं यस्तु मुच्यते नात्र संशयः।
द्विगुणं पुत्रकानान्तु हनने कथितं मया॥ ३४ :९॥

अस्यापि द्विगुणं प्रोक्तं साधकस्य महामते।
आचार्यं हन्ति यो मोहाज्जप्त्वा कोटिचतुष्टयं॥ ३४ :१०॥

बहुरूपस्य देवेशि नान्यथा तु कदाचन।
यः पुनः क्रोधचैतन्यो मोहाविष्टो निपातयेत्॥ ३४ :११॥ (f. 91r)

तस्य वक्तुन्न शक्नोमि प्रायश्चित्तं वरानने।
मनसापि न चिन्तेत प्रायश्चित्तं कथम्भवेत्॥ ३४ :१२॥

अन्यच्च शृणु कस्यापि लिङ्गभेदस्तु जायते।
अकामाद्धन्ति वा कोऽपि निर्लेपस्तु तदीयते॥ ३४ :१३॥

व्रतम्महाव्रतङ्कृत्वा मुण्डखट्वाङ्गधारकः।
कपालं वामहस्ते चाप्यक्षमालाविभूषितं॥ ३४ :१४॥

कर्णिका कण्ठदेशे तु चन्द्रिका च शिरस्यथ।
हस्तौ पादौ विभूषेत कटिस्थेन तु मेखला॥ ३४ :१५॥

अनुज्ञां प्रार्थयित्वा तु गुरोराचार्यकस्य तु।
ईदृशञ्च व्रतं कृत्वा पर्यटेद्धरणीतले॥ ३४ :१६॥

एकरात्रन्तथा ग्रामे त्रिरात्रं खटके तथा।
पञ्चरात्रं पुरे भोज्यं सप्तरात्रं महापुरे॥ ३४ :१७॥

श्मशाने त्वेकलिङ्गे वा एकवृक्षे चतुष्पथे। (f. 91v)
शून्यागारे नदीतीरे पर्वते सिन्दुसागरे॥ ३४ :१८॥

पितृवनादितीर्थेषु रुद्रतीर्थेषु सर्वदा।
स्थानेष्वेषु जपङ्कुर्यात्कायशुद्धिनिबन्धनं॥ ३४ :१९॥

शाकमूलफलाशी च एकान्तरमथापि वा।
हत्वा मान्यमकामस्तु समयी पुत्रकोऽपि वा॥ ३४ : २०॥

दशकोटीस्तदा जप्त्वा उपसर्पेद्गुरुं पुनः।
सर्वार्थशुद्धिशुद्धस्तु दीक्षितो भैरवेऽध्वरे॥ ३४ : २१॥

सर्वपापविनिर्मुक्तः शुध्यते नात्र संशयः।
पुत्रके च मृते देवि कर्तव्यो द्विगुणो जपः॥ ३४ : २२॥

ततो वै द्विगुणो जापः साधके तु मृते भवेत्।
यदाचार्यो मृतो देवि कोट्यशीति जपङ्कुरु॥ ३४ : २३॥

कृते जपेऽध्वरेणाथ पूर्ववद्यदि शोधितः।
शुध्यते नात्र सन्देहो यदि चाकलुषिते हृदि॥ ३४ : २४॥

निन्दन्समयिनं मोहात्सहस्रैकेन शुध्यति। (f. 92r)
पूर्ववत्पुत्रकाद्येषु द्विगुणाद्विगुणं भवेत्॥ ३४ : २५॥

गुरुं निन्दति मूढात्मा लक्षार्द्धेन स शुध्यति।
यस्तूपेक्षेद्गुरोर्द्रव्यं हानिर्यत्रोपजायते॥ ३४ : २६॥

तत्र लक्षञ्जपेदेकं प्रज्ञाहीने तदर्धकं।
यः शृणोति गुरोर्निन्दान्न गच्छेन्न निवारयेत्॥ ३४ : २७॥

सोपि देवि गुरुद्रोही लक्षजाप्येन निर्मलः।
गणिकापि हि या भुक्ता गुरुणा शैलराट्सुते॥ ३४ : २८॥

अभोज्या सा तु शिष्यस्य यतो मातेव कल्पिता।
अत्रापि लक्षमेकन्तु जपेन्नैवात्र संशयः॥ ३४ : २९॥

विण्मूत्रङ्कुरुते यस्तु भूभागे तु गुरुप्रिये।
न शिष्येण च कर्तव्यन्तत्र स्थाने कथञ्चन॥ ३४ : ३०॥

कृत्वा जप्त्वायुतञ्चैकं मूलमन्त्रस्य शुध्यति।
पशुक्रीडां यदा पश्येदकामात्तु शतं जपेत्॥ ३४ : ३१॥

दूराध्वानं ततो गत्वा आगतश्च पुनर्यदा। (f. 92v)

34:21 उपसर्पेद्] *conj.*; उपशर्प्पेद् C **34:30** शिष्येण] *em.*; शिष्येन C

विंशतिस्तु सहस्राणि शिष्यस्योक्तानि सुव्रते॥ ३४ :३२॥

परशिष्ये स्वशिष्ये तु द्विगुणं परिकीर्तितं।
महाव्रतधरैः सार्द्धन्तथापाशुपतैः सह॥ ३४ :३३॥

संपर्कङ्कुरुते यस्तु तस्य दोषम्वदाम्यहं।
लक्षमेकञ्जपेन्मन्त्री लक्षमन्नादिभक्षणे॥ ३४ :३४॥

श्वेतार्हन्तबौद्धानाम्भगवानान्तथैव च।
पूर्वमेव फलं प्रोक्तं संपर्क्केऽन्नादिभक्षणात्॥ ३४ :३५॥

सोमब्रह्मरविस्कन्दविष्णुदेव्यश्च मातरः।
उपजीवन्ति ये देवि पूजयित्वा तु भोजकाः॥ ३४ :३६॥

ते वै देवलकास्तेषाम्प्रायश्चित्तं वदाम्यहं।
सम्पर्क्कन्तैः समङ्कृत्वा भाण्डं स्पृष्टं यदा भवेत्॥ ३४ :३७॥

मृण्मयस्य तदा त्यागङ्कुर्यादेवाविचारतः।
लोहन्ताम्रन्तथा कांस्यं हैमं रौप्यादिसम्भवम्॥ ३४ :३८॥ (f. 93r)

अग्नौ शुद्धिस्तदा तेषां भस्मना मलशोधनम्।
शङ्खशुक्त्यादितोयोत्थम्पञ्चगव्येन शोधयेत्॥ ३४ :३९॥

वस्त्रं तोयेन शुद्ध्येत मन्त्रतोयेन रञ्जितं।
चर्मादीनि तथा चित्रम्मंत्रतोयेन प्रोक्षयेत्॥ ३४ :४०॥

काष्ठानां क्षालनं प्रोक्तं प्रोक्षणं शयनासने।
एवमादीन्यनेकानि ज्ञात्वा चैव विशोधयेत्॥ ३४ :४१॥

जन्महीनैः सहैकत्वं सम्पर्क्कः कामतो यदा।
द्वेऽयुते च जपेद्देवि अकामादयुतञ्जपेत्॥ ३४ :४२॥

अज्ञात्वा शास्त्रसद्भावं ज्ञानतत्त्वसमुच्चयं।
दीक्षां करोति यो मोहात्पश्चात्तापं करोति च॥ ३४ :४३॥

पञ्चलक्षञ्जपेत्तत्र यदि वांच्छति शोभनं।

34:33 स्वशिष्ये तु] *em.*; स्वशिष्य C (unmetrical) **34:38** मृण्मयस्य] *conj.*; मृन्मयस्य C **34:38** कांस्यं] *em.*; कास्यं C **34:39** शुद्धिस्तदा] *em.*; शुशुद्धिस्तदा C (unmetrical)

ज्ञानं शास्त्रं तथा मन्त्रं स्नेहाल्लोभात्प्रकाशयेत्॥ ३४ : ४४ ॥

लक्षमेकं जपेन्मन्त्री प्रायश्चित्तं विशुद्धये। (f. 93v)
तदर्द्धन्तु जपेद्देवि शास्त्रं हरति वै यदा॥ ३४ : ४५ ॥

भुञ्जते तद्वदाख्यातन्दहन्ताद्द्विगुणं जपेत्।
अर्थलोभेन विज्ञाय करोति यस्तु चुम्बकः॥ ३४ : ४६ ॥

जानन्नपि न कुर्वीत तत्त्वभेदन्तथैव च।
षष्ठिरेव सहस्राणि मन्त्रस्य परिवर्तनं॥ ३४ : ४७ ॥

अग्निकार्यन्न कुर्वन्ति देशिका ये प्रमादतः।
वर्षाभ्यन्तरसंख्यायाः कर्तव्यं लक्षसंक्षया॥ ३४ : ४८ ॥

प्राकारे तोरणेऽट्टाले श्मशाने चत्वरे गुहां।
चतुष्पथे च शृङ्गाटे नदीमध्ये च सङ्गमे॥ ३४ : ४९ ॥

एकवृक्षे तथा कूपे विण्मूत्रङ्कुरुते यदा।
अकामाद्द्विशतं घोरं जपेत्कामाच्छतत्रयं॥ ३४ : ५० ॥
एवमन्येषु क्षेत्रेषु शुद्धिर्घोरजपाद्भवेत्॥ ३४ : ५१ ॥

॥ इति मन्त्रस्वच्छन्दे द्वादशसाहस्रे प्रायश्चित्तपटलं समाप्तं॥ (f. 94r)

॥ कामिकाप्रश्नावतारे कामिकाख्यप्रायश्चित्तं लिख्यते॥

नैष्ठिकं वा गृहस्थम्वा घातयित्वा तु देशिकं।
पञ्चाष्टकं समाश्रित्य एकलिङ्गं प्रसन्नधीः॥ ३५ : १ ।

शतार्द्धमन्तरं कृत्वा दशलक्षैस्तु शुध्यति।
कामतस्तु समुद्दिष्टमकामाद्भूतसंख्यया॥ ३५ : २ ॥

यदि स्याच्छस्त्रहस्तोऽसौ शास्त्रार्थे तु पराङ्मुखः।
विपर्यस्तो महामूढा क्षत्रधर्मपरायणः॥ ३५ : ३ ॥

खरवद्भस्मलिप्ताङ्गो घातितोऽसौ विनायकैः।

34:45 प्रायश्चित्तं] *em.*; प्रायश्चित्त॰ C 35:2 ॰कामाद्भू] *em.*; ॰काद्भू॰ C (unmetrical)

स्थितिसंरक्षणार्थाय लक्षांशेन तु कारयेत्॥ ३५ :४॥

तदस्त्रं धारयित्वा च वस्त्रपूतेन वारिणा।
साधकं घातितं येन समयाचारसंयुतं॥ ३५ :५॥

श्मशाने तु शिवं स्थाप्यमष्टलक्षैस्तु सेवयेत्।
अकारादिहकारान्तैर्धनुषा च वरानने॥ ३५ :६॥

सेचयेत्परमेशेन विस्फुरन्नयनेक्षणे।
ज्ञानेन च महादेवि अज्ञानादग्निसंख्यया॥ ३५ :७॥ (f. 94v)

समयिनन्तथा हत्वा गुर्व्वाराधनतत्परं।
महानदं समाश्रित्य चतुर्लक्षैस्तु सेवयेत्॥ ३५ :८॥

दशधन्वन्तरं यावदकामाल्लक्षसंख्यया।
अपाशक्रियमाणस्तु सेचयेत्कारणेश्वरे॥ ३५ :९॥

अपाशे क्रियमाणे तु पाशशुद्धिः प्रजायते।
ब्रह्महत्यादिके जाते पूर्वमानमुदाहृतं॥ ३५ :१०॥

स्वेष्टलिङ्गे हृते नष्टे दग्धे चैव प्रमादतः।
प्रायश्चित्तं स्मृतं लक्षं मन्त्रस्यारोहणं पुनः॥ ३५ :११॥

प्रमादात्पतितं भूमौ पशुस्पृष्टमथापि वा।
दशसाहस्रिकं जाप्यमिच्छेत्संस्कारमौलिकं॥ ३५ :१२॥

हस्तात्तु पतिते लिङ्गे अयुतैः पञ्चभिः शुचिः।
द्विहस्तात्तु यदा लिङ्गं पतितन्तु प्रमादतः॥ ३५ :१३॥

तदा लक्षेण शुद्धिः स्यात्पुनःसंस्कारमौलिकं।
पुरुषमात्राच्च्युतं लिङ्गं यदि भिन्नं प्रमादतः॥ ३५ :१४॥ (f. 95r)

प्रायश्चित्तन्न तस्यास्ति शलाकापतितं यतः।
स्थावरं जङ्गमञ्चैव लिङ्गन्तु द्विविधं स्मृतम्॥ ३५ :१५॥

अकामात्कामतो वापि घाटिते स्फाटिते तथा।
प्रायश्चित्तं न तस्यास्ति इत्याह भगवाञ्छिवः॥ ३५ :१६॥

35:15 स्मृतम्] *em.*; स्मृतमः C (unmetrical)

शिवलिङ्गेऽक्षसूत्रे च शिवज्ञाने वरानने।
भ्रष्टे नष्टे हृते दग्धे लक्षमावर्त्य शुध्यति॥ ३५ :१७॥

प्रायश्चित्ते कृते शुद्धिः स्थापनञ्च तथा परं॥ ३५ :१८॥

॥ इति कामिकाप्रश्नावतारे कामिकाख्ये प्रायश्चित्तं समाप्तमिति॥

॥ इति सिद्धयोगीश्वरीमते चतुर्विंशतिसाहस्रे बीजभेदे प्रायश्चित्तं लिख्यते॥

सर्वे शुध्यन्ति देवेशि भग्नलिङ्गी न शुध्यति।
लिङ्गन्तु द्विविधं प्रोक्तं स्थावरं जङ्गमन्तथा॥ ३६ :१॥

आश्रये स्थावरं विद्याद्यतिनेऽपि च जङ्गमं। (f. 95v)
द्वयम्भित्वा न शुध्येत स्त्रीणां वै निग्रहेष्वपि॥ ३६ :२॥

नष्टभग्नवपुः क्षिप्रम्प्रमादात्तु वियोगतः।
प्रायश्चित्तं स्मृतं लक्षम्पुनः स्यान्मन्त्ररोपणं॥ ३६ :३॥

चललिङ्गे यदा देवि पतितञ्चेत्प्रतिष्ठितं।
शतमष्टोत्तरं हुत्वा जपङ्कुर्याच्चतुर्गुणं॥ ३६ :४॥

पञ्चधा हस्तभ्रष्टे तु हते वै षड्गुणञ्जपेत्।
एवं ज्ञात्वा तु मन्त्रज्ञः प्रायश्चित्तन्तु कारयेत्॥ ३६ :५॥

उक्तञ्च बीजभेदे तु अकामात्कामतोऽपि वा।
गुरुदत्तं स्वतो वापि प्रायश्चित्तञ्चरेद्बुधः॥ ३६ :६॥

अपास्तावरणैः सार्द्धं सम्पर्क्काल्लाक्षिको जपः।
उक्ताचारविलोमे तु पञ्चसाहस्रिको जपः॥ ३६ :७॥

प्रमादाद्योषितं हत्वा अतीवाप्यपराधिनीं।
पञ्चधा लक्षजापेन लक्षहोमेन वा शुचिः॥ ३६ :८॥

समयी साधको वापि प्रमादाद्यदि घातितः।
जप्त्वा दशगुणं लक्षं लक्षं हुत्वा विशुध्यति॥ ३६ :९॥

कामतः कोटिजापेन लक्षैश्च दशभिर्हुतैः। (f. 96r)

विशुध्यत्यनुतापेन कपालव्रतसेवनात्॥ ३६ :१०॥

हत्वा च गाम्प्रमादेन प्रायश्चित्तं समाचरेत्।
एकान्तरोपवासश्च त्रिष्कालं स्नानशीलता॥ ३६ :११॥

त्रिसन्ध्यन्तु जपः कार्यस्त्वष्टोत्तरशतं क्रमात्।
षण्मासं तु व्रते स्थित्वा व्रतिनो भोजयेत्ततः॥ ३६ :१२॥

कामतो विनिहत्याथ प्रायश्चित्तन्तु विद्यते।
केशानां विक्रयं कृत्वा शास्त्रप्रतिमयोरपि॥ ३६ :१३॥

लक्षेण शुध्यते देवि पुनर्दीक्षान्तथैव च।
विवस्त्राम्वनितान्दृष्ट्वा प्रमादात्प्रकटस्तनीं॥ ३६ :१४॥

सप्तधावर्तयेद्देवि विशुध्येत न संशयः॥ ३६ :१५॥

॥ इति सिद्धयोगेश्वरीमते चतुर्विंशतिसाहस्रे वीजभेदे प्रायश्चित्तपटलं समाप्तं॥

॥ अथ भैरवस्रौतसि सिद्धयोगेश्वरीमते चूडामणितन्त्रे उत्तरोत्तरे प्रायश्चित्तं लिख्यमात्मार्थकाते॥

देव्युवाच—

प्रायश्चित्तं महादेव मूलतन्त्रे तु सूचितं।
समयाल्लोपयेद्यस्तु ज्ञात्वा शास्त्रार्थसन्ततिं॥ ३७ :१॥

समयी पुत्रको वाथ साधकाचार्ययोरपि। (f. 96v)
कर्मणा येन देवेश प्रायश्चित्ती भवेन्नरः॥ ३७ :२॥

शुध्यते कर्मणा केन तत्कथम्वद भैरव।

भैरव उवाच—

मूलतन्त्रे मया देवि सूचितः कथितो न हि॥ ३७ :३॥

कल्पाख्ये तु महातन्त्रे प्रायश्चित्तस्य निर्ण्णयः।
कथ्यते स समासेन प्राणिनां हितकाम्यया॥ ३७ :४॥

निर्माल्यसङ्करो होमाज्जायते कस्यचिद्यदि।

37:5 °सङ्करो] *em.*; °शङ्करो C

सहस्रन्तु त्रिसन्ध्यायां यावत्सप्तदिनावधिं॥ ३७ : ५॥

आवर्तनाद्विशुध्येत समयाख्या तु विद्यया।
कामान्निर्माल्यभक्षी च दिनार्द्धं दिनमेव वा॥ ३७ : ६॥

षण्मासाच्छुध्यते तस्य जपमानस्त्रिसन्धिषु।
अकामात्कामतो वापि निर्माल्यस्य च सङ्करम्॥ ३७ : ७॥

वर्ज्जयेत्तं प्रयत्नेन यदीच्छेत्सिद्धिमात्मनः।
भक्षयेद्भैरवे लिङ्गे चले वापि स्थिरेऽपि वा॥ ३७ : ८॥ (f. 97r)

स्वमन्त्रेण तु संसिद्धे अन्यथा सङ्करो भवेत्।
यागकाले महादेवि वीरसङ्घस्य क्रीडने॥ ३७ : ९॥

न भवेत् सङ्करस्तत्र यो वा मन्त्रः प्रपूज्यते।
अकामात्कामतो वाथ गुर्वाज्ञां लंघनेन तु॥ ३७ : १०॥

दुर्मतिः स दुरात्मा तु प्रायश्चित्तस्य भाजनः।
न च सिद्धिर्भवेत्तस्य इहलोके परत्र च॥ ३७ : ११॥

प्रायश्चित्तन्तदा तत्र कर्तव्यन्नियमेन तु।
षण्मासेन विशुध्येत त्रिसंध्यञ्जपसेवनात्॥ ३७ : १२॥

संख्याया रहितो देवि विधिः सर्वेषु चोदितः।
लङ्घनाद्गुरुपत्नीन्तु दुहित्रीम्भगिनीन्तथा॥ ३७ : १३॥

प्रायश्चित्तन्न तत्रास्ति कल्पकोटिशतैरपि।
अधिक्षेपं ददेत्तस्य आचार्यस्य मनोपमे॥ ३७ : १४॥

अब्दमेकं व्रते स्थित्वा नियमाज्जपसेवनात्।
शुद्धकायो भवेत्तेन अन्यथा नरकं व्रजेत्॥ ३७ : १५॥ (f. 97v)

तुष्टेन गुरुणा देवि सिद्धिस्तस्य भवेद्ध्रुवं।
तुष्यन्ति देवताः सर्वाः सम्प्रदायञ्च विन्दति॥ ३७ : १६॥

अकृत्वा वा कथन्तस्य समयाचारलोपके।

37:7 तस्य] *conj.*; तस्या C **37:7** सङ्करम्] *em.*; शङ्करम् C **37:9** सङ्करो] *em.*; शङ्करो C **37:10** भवेत् सङ्कर°] *conj.*; भवेच्छङ्कर° C

एवं ज्ञात्वा तु मेधावी गुरोराज्ञान्तु पालयेत्॥ ३७:१७॥

विवस्त्राम्वनितां दृष्ट्वा प्रमादात्प्रकटस्तनीं।
सप्तधावर्तयेद्देवि शुध्यते नात्र संशयः॥ ३७:१८॥

पशुक्रीडां यदा पश्येदकामाच्च शतञ्जपेत्।
मांसादिभक्षणे देवि निषिद्धानाम्पुरागमे॥ ३७:१९॥

समये चैव मार्गे तु अनुष्ठानपरायणः।
सप्तधावर्तनात्कामादकामादर्द्धतः शुचिः॥ ३७:२०॥

विरुद्धं वदते कश्चित्क्रुद्धः समयिभिः सह।
सप्तसंख्या क्रमेणैव त्रिसंध्यञ्जपसेवनात्॥ ३७:२१॥

क्रुद्धस्तु पुत्रकैः सार्द्धम्विरुद्धं वदते यदि।
दिनद्वयं त्रिसन्ध्यञ्च जपेत्तत्सप्तसंख्यया॥ ३७:२२॥ (f. 98r)

आचार्यैः सह यत्किञ्चिद्वदते वाग्विरूपकं।
अधिक्षेपम्महेशानि वचसा मानसापि वा॥ ३७:२३॥

अयुतैकं व्रते स्थित्वा जप्त्वा चैव विशुध्यति।
पुनः क्षमापयेत्तन्तु अन्यथा नैव शुध्यति॥ ३७:२४॥

साधकैः सह देवेशि क्रुद्धचित्तस्तु मन्दधीः।
द्विशतेन विशुध्येत नित्यानुष्ठानतत्परः॥ ३७:२५॥

स्त्रीणामथाधिक्षेपञ्च प्रौढाम्बालाञ्च कन्यकां।
दिनमेकं त्रिसन्ध्यायां शतमष्टोत्तरञ्जपेत्॥ ३७:२६॥

एष एव विधिर्देवि साधकाचार्ययोरपि।
शास्त्रमनेकधा देवि पञ्चस्रोतात्मकन्तथा॥ ३७:२७॥

गारुडं भूततन्त्रन्तु सिद्धान्तं वामदक्षिणं।

37:18 प्रमादात्प्रकट॰] *conj.*; प्रादात्प्रक॰ C (unmetrical) **37:18** ॰वर्तयेद्देवि] *em.*; ॰वत्तयेद्देवि C **37:20** ॰दकामादर्द्ध॰] *em.*; ॰दकादर्द्ध॰ C (unmetrical) **37:21** ॰सेवनात्] *conj.*; ॰शेवनात् C **37:23** वचसा] *conj.*; वाचया C **37:24** क्षमापयेत्तन्तु] *conj.*; क्षमापयेत्तुन्तु C **37:25** ॰नुष्ठानतत्परः] *em.*; ॰नुष्ठातत्परः C (unmetrical) **37:26** प्रौढाम्] *conj.*; प्रोढां C

शास्त्राद्विनिर्गता मन्त्रास्तर्क्कव्याकरणादयः॥ ३७ : २८॥

इतिहासपुराणानि भारतञ्च भविष्यति।
शिववक्त्राम्बुजोद्गीर्णंसर्वं वै शास्त्रसागरं॥ ३७ : २९॥ (f. 98v)

शास्त्राणान्दूषणे देवि पञ्चस्रोत्रात्मके तथा।
समयी दूषणे चैव शतमष्टोत्तरञ्जपेत्॥ ३७ : ३०॥

अकामाद्घातयेत्कंश्चिच्छैवं वैमलपञ्चकं।
दशलक्षञ्जपेन्मन्त्री नियमस्थो व्रते स्थितः॥ ३७ : ३१॥

घातयेत्कामतो देवि प्रायश्चित्तन्न विद्यते।
अर्द्धात्तदर्द्धजाप्येन संयोगात्संकरे तथा॥ ३७ : ३२॥

प्रहाराच्च जपेत्पञ्च रक्ताद्रक्तप्रदर्शने।
हस्तमात्राच्च्युते लिङ्गं अयुतैकेन शुध्यति॥ ३७ : ३३॥

वृद्धिसंख्या क्रमेणैव परिमाणञ्जपस्य तु।
त्रिसन्ध्यन्तु जपः कार्यो दिनवृद्धिक्रमेण तु॥ ३७ : ३४॥

मासमेकम्व्रते स्थित्वा व्रतिनो भोजयेत्ततः।
आह्निके तु शतैकेन सन्ध्यालोपे तथैव च॥ ३७ : ३५॥

ब्राह्मणङ्घातयेत्कामादयुतार्द्धेन शुध्यति।
शूद्रे तथार्द्धतः ख्यातं द्विगुणं बौद्धनग्नके॥ ३७ : ३६॥ (f. 99r)

अकामात्कामतो देवि शुद्धिरेवं विधीयते।
स्त्रियञ्च घातयेत्कश्चिदकामात्परमेश्वरि॥ ३७ : ३७॥

दशलक्षञ्जपेद्घोरङ्कथितं तव सुन्दरि।
घातयेत्कामतो वापि प्रायश्चित्तन्न विद्यते॥ ३७ : ३८॥

॥ इति भैर(व)श्रोतसि सिद्धयोगेश्वरीमते सार्द्धत्रिसहस्रिके चूडामणितन्त्रे उत्तरोत्तरे ज्ञानाधिकारे भैरवोद्याने प्रायश्चित्तपटलं समाप्तमिति॥

॥ अथ सिद्धयोगेश्वरीमते चतुर्विंशतिसाहस्रे त्रिकसारोत्तरे प्रायश्चित्तं लिख्यते॥

अभक्षभक्षणं कृत्वा पेयापेयं तथैव च।
मैथुनं चैकजापेन अगम्यागमने द्विभिः॥ ३८:१॥

म्लेच्छादिस्पर्शने देवि त्रिजप्तेन तु मुच्यते।
गोवधो ब्रह्महत्यां च साहस्रेणैव शोधयेत्॥ ३८:२॥

स्त्रीहत्यामयुतेनैव लिङ्गभेदे तथैव च। (f. 99v)
सन्ध्यालोपे कृते चैव शतमष्टोत्तरञ्जपेत्॥ ३८:३॥

सहस्रैः पञ्चभिर्देवि देवद्रव्यं विशोधयेत्।
सर्वप्राणिवधं कृत्वा हत्वा चैव चराचरं॥ ३८:४॥

अष्टोत्तरशतेनैव मुच्यते सर्वकिल्बिषात्।
दुःस्वप्ने तु त्रिधा जाप्या अरिष्टे च चतुर्विधा॥ ३८:५॥

निषिद्धाचरणे मन्त्री शतमष्टोत्तरञ्जपेत्।
स्त्रीबालताडने चैव दुर्भाष्यां भाषणे कृते॥ ३८:६॥

शतमष्टोत्तरञ्जप्त्वा सर्वपापाद्विमुच्यते।
सहस्रन्तु जपेन्मन्त्री सम्पर्क्कादन्यमन्त्रिणा॥ ३८:७॥

अन्यव्रतधरैः सार्द्धं सम्पर्कन्तु विवर्ज्जयेत्।
अथ कश्चित्प्रमादेन सहस्रम्पञ्चधा जपेत्॥ ३८:८॥

सर्वपातकसंशुद्धिरयुतैकेन जायते।
तोलितः शुध्यते पापी सर्वपापकरोऽपि यः॥ ३८:९॥

अयुतजापादग्निहोमाच्छुध्यते पञ्चपातकैः। (f. 100r)
अनध्याये पठंच्छास्त्रं सहस्राष्टोत्तरञ्जपेत्॥ ३८:१०॥

कामतोऽकामतो वापि यत्पापं समुपार्ज्जितं।
सहस्रैकमकामस्तु नक्ताशी स्नानपूर्व्वकं॥ ३८:११॥

पञ्चविंशतिसाहस्रैः सकामो मुच्यते भृशं।
कथयामि ततो विद्यां प्रायश्चित्ते तु भैरवि॥ ३८:१२॥

ओं अघोरे ह्रीः परमघोरे हुं घोररूपे हः घोरमुखि भीमभीषणे वमपिवहे

38:6 भाषणे] *em.*; भाषने C

रु रु र र फट् फट् ह्रं हः फट्॥

परापरा समाख्याता विद्या पापप्रणाशनी।
उद्धृता दिव्यभेदं ते त्वेकचत्वारिंशदक्षरैः॥ ३८ :१३॥

॥ इति सिद्धयोगेश्वरीमते चतुर्विंशतिसाहस्रेत्रिकसारोत्तरे प्रायश्चित्तपटलं समाप्तमिति॥

॥ सर्वज्ञानमहोदधौ प्रायश्चित्तं लिख्यते॥

ब्रह्महत्या सुरापानगोवधो गुरुनिन्दनं। (f. 100v)
चाण्डालस्पर्शसम्पर्क्कं कृत्वा प्राणिवधन्तथा॥ ३९ :१॥

अभोज्यभोजनङ्कृत्वा सद्योजातेन शुध्यति।
विण्मूत्रभक्षणे देवि रेतोगोमांसभक्षणे॥ ३९ :२॥

अगम्यागमनं कृत्वा वामदेवेन शुध्यति।
निर्माल्यभक्षणोच्छिष्टे उच्छिष्टस्पर्शनेऽपि वा॥ ३९ :३॥

व्रतलोपे व्रतत्यागे गुर्वाज्ञालङ्घने तथा।
छेदने पुष्पवृक्षाणान्तथा निर्माल्यलङ्घने॥ ३९ :४॥

लिङ्गिनो निन्दने चैव अघोरेणैव शुध्यति।
गर्भपाती गुरुद्रोही स्त्रीवधो नारिविक्रयी॥ ३९ :५॥

मित्रविश्रम्भघाती च देवब्राह्मणनिन्दकः।
दीक्षयेद्द्रव्यलोभेन स्थापनञ्च करोति यः॥ ३९ :६॥

रजस्वलान्नभोक्ता च वक्त्रजापेन शुध्यति।
वाचिकम्मानसम्पापङ्कायिकं यत्प्रकीर्त्तितं॥ ३९ :७॥

सर्वन्तन्नाशयेद्देवि ईशजापेन मानवः। (f. 101r)
एवं हि कर्मजं सर्वं शुभं वा यदि वाशुभं॥ ३९ :८॥

शुभङ्कर्म समाश्रित्य नाशयेदशुभं प्रिये।
जन्ममृत्युजराव्याधिदुःखशोकानुबन्धनं॥ ३९ :९॥

39:1 सुरा°] *em.*; शुरा° C **39:8** सर्वन्तन्] *conj.*; सर्वतन् C

जपहोमेन नश्यन्ति तस्मात्पुण्यं जपं कुरु।
जपेन शुध्यते पापञ्जपेनात्यद्भुतं लभेत्॥ ३९ :१०॥

दुःस्वप्नं नाथवारिष्टं हन्यते पुण्यजापतः।
पुण्यङ्कर्म सदा कुर्यात्पुण्येन प्राप्नुयात्सुखं॥ ३९ :११॥

तस्मात्पुण्यमयो भूत्वा पुण्यङ्कर्म समाचरेत्।
गुरु वा लघु वा कर्म ज्ञात्वा चैव विभागतः॥ ३९ :१२॥

प्रायश्चित्तन्तु दातव्यं शास्त्रोक्तं गुरुभाषितं।
गुरुवाक्यप्रमाणं वै किन्तु तद्भाषितम्मया॥ ३९ :१३॥

॥ इति सर्वज्ञानमहोदधौ प्रायश्चित्तप्रकरणं समाप्तमिति॥

॥ अथ रसस्वच्छन्दे षट्साहस्रे प्रायश्चित्तं लिख्यते॥

देवस्वे भक्षिते चैव अकामाद्वरवर्णिनि। (f. 101v)
बहुरूपस्य मन्त्रस्य कोटिजापेन शुध्यति॥ ४०:१॥

कामतो द्विगुणं जाप्यम्पुनर्दीक्षा तु शुद्धये।
अथवा शिवनिर्माल्यम्प्रणालं वा प्रलंघयेत्॥ ४०:२॥

जप्त्वायुतत्रयं दत्वा गड्डुकानां शताष्टकं।
कामतस्तु तदा शुद्धिरकामादयुतद्वयं॥ ४०:३॥

अकामाद्वह्निद्रव्ये तु भक्षिते च कदाचन।
लक्षार्द्धन्तु जपेत्मन्त्री कामतो लक्षमाचरेत्॥ ४०:४॥

अकामाच्चण्डद्रव्ये तु भक्षिते लक्षमाचरेत्।
लक्षद्वयेन कामात्तु दीक्षया च पुनः शुचिः॥ ४०:५॥

देवद्रव्ये गुरोर्द्रव्ये द्रव्ये चण्डेश्वरस्य च।
त्रिरात्रमुपवासं तु कृत्वा मन्त्रञ्जपेद्बुधः॥ ४०:६॥

निर्माल्यं भक्षितं येन अकामेन सुराधिप।

40:2 दीक्षा तु] *conj.*; दीक्षान्तु C 40:2 प्रणालं] *conj.*; प्रनालं C 40:4 लक्षमाचरेत्] *em.*; लक्षमारेत् C (unmetrical) 40:7 निर्माल्यं] *em.*; निनिर्माल्यं C (unmetrical)

पञ्चायुतानि जप्त्वा तु शुध्यते नात्र संशयः॥ ४० : ७॥

बहुरूपस्य मन्त्रस्य कामतो द्विगुणञ्जपेत्। (f. 102r)
शङ्करस्थाणु कामात्तु ये दृष्टा मूलसम्भवाः॥ ४० : ८॥?

गुरुर्गुरुतरा ज्ञेया लघुर्लघुतरास्तथा।
देवद्रव्यादिके दोषाः कथिता ये मया प्रिये॥ ४० : ९॥

तत्संपर्कात्तु सम्पर्क्के कथिता मूलसम्भवाः।
शंकरस्य महाभागे तृतीयांशेन कीर्तिताः॥ ४० : १०॥

यः पुरा कीर्तितो जाप्यः अकामात्कामतोऽपि वा।
सङ्करैः सह सम्पर्क्के जातिसंकर एव च॥ ४० : ११॥

सङ्करे तु जपस्तत्र अर्धेन कथितो मया॥ ४० : १२॥

॥ इति रसस्वच्छन्दे षट्साहस्रे प्रायश्चित्तमिदं॥

॥ पिचुमते प्रायश्चित्तं लिख्यते॥

ब्रह्मघाती जपेल्लक्षं व्रतस्थः सुसमाहितः।
लिङ्गे प्रहारदायी च स्थिरे वा जीवसंज्ञके॥ ४१ : १॥

जपेद्दशसहस्राणि पञ्चातपसमन्वितः।
कर्णनासादिकं च्छित्वा शक्तः स्याद्दशलाक्षिकः॥ ४१ : २॥

नक्तभोजीजपेच्छुध्यै पञ्चातपसमन्वितः।
नष्टेऽक्षसूत्रे देवेशि दशसाहस्रिको जपः॥ ४१ : ३॥

दग्धे लक्षजपाच्छुद्धिर्विकृते दशधा ततः।
यत्र मन्त्राः पुरन्यस्ता दोषो नैव विसर्ज्जयेत्॥ ४१ : ४॥ (f. 102v)

॥ इति पिचुमते प्रायश्चित्तं समाप्तमिति॥

॥ पारमेश्वरेमहातंत्रे प्रायश्चित्तं लिख्यते॥
गुर्विणीनां प्रकरणे भुक्त्वा वाममनुस्मरेत्।

बालानान्नामकरणे सद्योजातमनुस्मरेत्॥ ४२:१॥

निष्क्राम्यन्नप्राशने च पुरुषन्तु समभ्यसेत्।
भुत्क्वा च चूडाकरणे कर्णवेधे तथैव च॥ ४२:२॥

व्रते तथा च गोदाने भोक्तव्यं निर्विशङ्कितैः।
विवाहे तु यदन्नं स्याद्दोषस्तत्र न विद्यते॥ ४२:३॥

वर्ज्यञ्चतुर्थिकान्नन्तु भुत्क्वा वाममनुस्मरेत्।
पाकयज्ञेषु भोक्तव्यं हविर्यज्ञेषु चैव हि॥ ४२:४॥

सोमसंस्थासु भोक्तव्यन्तदन्नं पावनं स्मृतं।
वापीकूपतडागानामारामाणाञ्च कल्पने॥ ४२:५॥

प्रतिष्ठासु च देवानान्न भोक्तव्यङ्कदाचन।
सूतके मृतके चैव भुत्क्वा वाममनुस्मरेत्॥ ४२:६॥

आत्मीयेऽपि न भोक्तव्यं सूतके मृतके तथा। (f. 103r)
भुत्क्वा त्रिरात्रमभ्यस्य बहुरूपं विशुध्यति॥ ४२:७॥

दीक्षितान्नन्तु भोक्तव्यञ्चातुर्वर्णस्य शङ्कितैः।
त्रयाणाम्ब्राह्मणादीनाम्भुञ्जीत दीक्षितात्मनां॥ ४२:८॥

स्वधर्मसंस्थितानान्तु न शूद्राणाङ्कदाचन।
अमद्यपाश्च ये शूद्राः शौचाचारसमन्विताः॥ ४२:९॥

रुद्रभुक्ताश्च ये तेषां भोज्यमन्नं प्रकीर्त्तितं।
द्वावेवाश्रमिणौ भोज्यौ ब्रह्मचारी गृही तथा॥ ४२:१०॥

अभोज्यमन्ययोरन्नन्तथा चैवान्यलिङ्गिनां।
जपः सर्वत्र सर्वेषां सहस्रमुषितात्मनां॥ ४२:११॥

कण्ठमात्रञ्जले कार्यं समयेन्द्रियवाहिनीं।
एवम्भवति शुद्धिस्तु गुरोर्वचनमानिति॥ ४२:१२॥

42:2 निष्क्राम्यन्नप्राशने] *conj.*; निष्क्राम्यन्नंप्रासने C 42:5 °रामाणाञ्च] *em.*; °राणाञ्च C (unmetrical) 42:9 शौचाचार°] *em.*; शौचार° C (unmetrical) 42:11 °मन्ययो°] *em.*; °मनयो° C

॥ इति पारमेश्वरे महातन्त्रे सामान्यप्रकरणे गुर्विणीभोज्यान्नपटलं समाप्तमिति॥ (f. 103v)

॥ अथाग्नेये महातन्त्रे मोहचूरोत्तरे प्रायश्चित्तं लिख्यते॥

प्रायश्चित्तं प्रवक्ष्यामि साम्प्रतं ते शचीपते।
दोषव्यपोहनार्थाय धर्मस्य स्थितये पुनः॥ ४३:१॥

मोहादज्ञानतो वापि अप्रसुप्ते जनार्दने।
पवित्रङ्कारयेद्यस्तु स पापी पापमोहितः॥ ४३:२॥

पञ्चदिनमनाहारो जप्त्वा पञ्चायुतं हरे।
शुद्धिमेवं समभ्येति नान्यथा तु कदाचन॥ ४३:३॥

भाद्राद्र्ध्वन्नकुर्वीत सिद्धान्ते दोषभाग्भवेत्।
लक्षद्वयमघोरेण जप्त्वा चैव विशुध्यति॥ ४३:४॥

दैवादज्ञानतो वापि नाषाढादित्रये कृतं।
तत्राप्येवं विनिर्देशं प्रायश्चित्तं पुरन्दर॥ ४३:५॥

स्वशास्त्रे वर्तनन्नित्यं समयाचारपालनं।
सुपरीक्ष्य प्रकर्तव्यन्निषिद्धाचारवर्ज्जनं॥ ४३:६॥

यथा श्रुतं यथा दृष्टन्निबद्धं गुरुभिर्यथा।
स्वसिद्धान्ताविरोधेन तद्विलंघ्य विलंघनं॥ ४३:७॥ (f. 104r)

सकृत्संध्याविलोपे तु अजातस्य शतं जपेत्।
त्रिकाललोपे त्रिगुणं सोपवासं सकामतः॥ ४३:८॥

एककालार्चने लुप्ते सहस्रं दक्षिणं जपेत्।
एककालं द्विकालं वा त्रिकालं सार्धरात्रिकं॥ ४३:९॥

उपवासं समोपेतं कर्मलोपे कृते सति।
देवार्थे चैव गुर्वर्थे काललोपेन दोषभाक्॥ ४३:१०॥

43:1 साम्प्रतं] *conj.*; सांप्रम्प्रतं C (unmetrical) 43:7 स्वसिद्धान्ता॰] *em.*; स्वसिद्धान्त॰ C 43:9 एककालार्चने] *conj.*; एकालार्चने C (unmetrical)

शास्त्रनिन्दा गुरोर्निन्दा लिङ्गानां यत्र वर्तते।
तस्मात्स्थानाद्व्रजेद्दूरं सद्योजातशतं जपेत्॥ ४३ :११॥

महापातकसंयुक्तो ये चान्ये पापकर्मिणः।
पतिताश्चाभिशस्ताश्च ते तु वर्ज्ज्याः प्रयत्नतः॥ ४३ :१२॥

अज्ञानात्सङ्गतिं कृत्वा दक्षिणस्यायुतञ्जपेत्।
न लङ्घयेद्गुरुच्छायां न शिवस्य न लिङ्गिनां॥ ४३ :१३॥

त्रिशतं रूपिणञ्जप्त्वा गोकन्यासह्विजे शतं।
सहस्राल्लुठिते लिङ्गे वर्तिते द्विगुणाच्छुचिः॥ ४३ :१४॥ (f. 104v)

अयुतन्त्रिचतुर्लुठिते च्युते स्वभ्रे दशायुतान्।
गड्डुकाद्यभिघाते च द्व्ययुताल्लघुतद्दलात्॥ ४३ :१५॥

स्तुत्यादौ श्लेष्मसंस्पर्शे दक्षिणस्यायुतत्रयात्।
इष्टलिङ्गे हृते नष्टे वह्निलीढे प्रमादतः॥ ४३ :१६॥

जप्त्वा लक्षमघोरेण तद्रूपं स्थापनाच्छुचिः।
साधारे पतिते लिङ्गे ताले तालेऽयुतं जपेत्॥ ४३ :१७॥

निराधारे तु द्विगुणङ्कल्प्यन्यूनाधिकन्ततः।
अक्षसूत्रापराधे तु उक्तपादञ्चरेद्बुधः॥ ४३ :१८॥

अविसर्ज्जितपात्रे तु भङ्गे वाथ विवर्त्तिते।
शतद्वयात्सहस्रात्तद् अर्द्धात् तत् क्रमतः शुचिः॥ ४३ :१९॥

द्विगुणं स्थण्डिले प्राहुः प्रायश्चित्तं मखाधिप।
निर्वाणे ससशिवे वह्नौ त्रिरात्रं समुपोषितः॥ ४३ :२०॥

अयुतं रूपिणो जप्त्वा शुद्धिमृच्छत्यसंशयः। (f. 105r)
रक्षितेऽपि हि निर्वाणे अहोरात्रमुपोषितः॥ ४३ :२१॥

सहस्रम्बहुरूपेण जप्त्वा शुध्यति साधकः।

43:14 °सह्विजे] *conj.*; °सद्विजे C 43:16 श्लेष्म°] *conj.*; श्मेष्म° C 43:19 अर्द्धात् तत् क्रमतः] *conj.*; अर्धात् क्रमतः C (unmetrical) 43:21 शुद्धिमृच्छत्य°] *conj.*; शुद्धिमच्र्छत्य° C 43:21 निर्वाणे] *em.*; निर्वार्वाणे C (unmetrical)

पूर्वाह्णं चैव मध्याह्नं समाप्य स्थितये तनौ॥ ४३ : २२॥

चरेत्माधूकरीं भिक्षां भुक्तिमुक्तिसमीहकः।
तां भिक्षां याचयित्वा तु किञ्चित्स्थित्वान्यतो व्रजेत्॥ ४३ : २३॥

अनिवर्तितम्भवेद्भिक्षां ज्ञात्वा वृत्ताञ्च वर्णिनां।
स्थितिं बुद्ध्वा श्रमङ्गच्छेच्छुचिस्थानं निधाय च॥ ४३ : २४॥

मृद्भिः संशोध्य चरणौ करौ क्षाल्याचमेत्ततः।
भस्मस्नानन्ततः कृत्वा मन्त्रकायोऽर्घविस्मरन्॥ ४३ : २५॥

अस्त्रन्दीप्तोल्कया ध्यात्वा प्रोक्ष्याताम्वै विभज्य च।
शिवाय गुरवे दत्वा भुञ्जीत विधिपूर्वकं॥ ४३ : २६॥

आचान्तः पूर्ववत्स्नातः स्मृत्वा नत्वा शिवं गुरुं।
अयाचितैः स्थितिं कुर्यात्स्वधनैर्वा क्रमागतैः॥ ४३ : २७॥

स्वजातिदीक्षितैः स्पृष्टः स्नात्वाचम्य शतञ्जपेत्। (f. 105v)
तस्मिन्नदीक्षिते स्पृष्टे स्नात्वाचम्य शतद्वयं॥ ४३ : २८॥

समीपदीक्षिते स्पृष्टे स्नात्वाचम्य शतद्वयं।
तस्मिन्नदीक्षिते स्पृष्टे सोपवासो जपो मतः॥ ४३ : २९॥

एवं बुध्वा प्रकर्तव्यमितरैः पादवर्ज्जितः।
पुरुषाघोरवामाजा जातीशा ब्राह्मणादितः॥ ४३ : ३०॥

त्रिरात्रं अन्त्यजस्पर्शादघोरस्यायुताच्छुचिः।
सकृच्छ्रं त्र्ययुतं शक्र चाण्डालस्पर्शने दिशेत्॥ ४३ : ३१॥

ज्ञात्वान्यत्र प्रकर्तव्यं प्रायश्चित्तं सुराधिप।
अन्नाद्यं मदिरास्पृष्टं यदि भुङ्क्ते त्वकामतः॥ ४३ : ३२॥

विण्मूत्ररेतसा स्पृष्टं लीढं वा काककुर्क्कुरैः।
कपिग्राहशिलादक्षैर्विड्वराहैश्च दूषितैः॥ ४३ : ३३॥

शूद्राद्युच्छिष्टसंस्पृष्टं स्पृष्टम्वा त्वन्त्यजातिभिः।

43:26 गुरवे] *em.*; गुरुवे C **43:34** शूद्राद्यु°] *conj.*; शूद्राद्रु° C

कृत्वा स्नानन्निराहारः पञ्चगव्यं समाचरेत्॥ ४३ : ३४॥

प्रतिसन्ध्यं सहस्रन्तु जपेद्घोरं समाहितः। (f. 106r)
त्रिदिनन्नक्तभोजी स्यात्त्रिःस्नायी ध्यानतत्परः॥ ४३ : ३५॥

देवमिष्ट्वा चतुर्थेऽह्नि सहस्रं होमयेत्ततः।
उपवासस्तथा नक्तं पञ्चगव्यं विशुद्धये॥ ४३ : ३६॥

क्षत्रिये ध्याननिष्ठे तु शुद्धिमेवं विनिर्दिशेत्।
त्रिकालप्लवनं वैश्ये सकृच्छ्रच्छ्द्रे विनिर्दिशेत्॥ ४३ : ३७॥

अकामाद्द्विगुणङ्कामात् सर्वेषां परिकीर्त्तितं।
गृञ्जनालाबुलशुनं पलाण्डुकबकानि च॥ ४३ : ३८॥

अमेध्याद्‌दुद्भवं मांसम्भुक्त्वा स्यान्निरशनस्त्र्यहं।
मत्स्यकण्टकसम्बूकनखञ्चैव कपर्द्दिकां॥ ४३ : ३९॥

पीत्वा नवोदकं मन्त्री पञ्चगव्योपवासकः।
कृमिकीटाहिसंयुक्तं भुक्त्वा वान्तेन शुध्यति॥ ४३ : ४०॥

मक्षिकाकेशकीटैस्तु दुष्टं त्यक्त्वाल्पमोदनं।
भस्मसंस्पृष्टं प्रोक्ष्येत शेषम्भोज्यन्न दुष्यति॥ ४३ : ४१॥ (f. 106v)

पीतशेषन्तुयत्तोयं प्रमादाद्यदि तत्पिबेत्।
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति॥ ४३ : ४२॥

पिबन्तोयं पतत्यन्ने तदन्नं योऽत्ति मोहितः।
सहस्ररूपिणञ्जप्त्वा पञ्चगव्येन शुध्यति॥ ४३ : ४३॥

भुञ्जानस्य गुदस्रावे उच्छिष्टस्येन्द्रिये स्रुते।
आदौ शौचन्ततः स्नानमाचान्तः पुनराचमेत्॥ ४३ : ४४॥

सहस्रं रूपिणं जप्त्वा सोपवासो विशुध्यति।
अनाचान्तः पिबेत्तोयं भक्षयेद्वाथ मूत्रयेत्॥ ४३ : ४५॥

जप्त्वाघोरन्निराहारम्पञ्चगव्येन शुध्यति।

43:39 अमेध्याद्‌दुद्भवं] *conj.*; अमेध्योद्भवं C (unmetrical) 43:39 निरशन°] *conj.*; निरसन° C 43:39 °सम्बूक°] C^{pc}; °साम्बूक° C^{ac}

अर्धोच्छिष्टो यदा मन्त्री विष्टामद्यादिना हतः॥ ४३ : ४६॥

स्नात्वोपोष्य जपेद्घोरम्पञ्चगव्येन शुध्यति।
विना यज्ञोपवीतेन पिबेत् भुङ्क्ते यदा नरः॥ ४३ : ४७॥

पञ्चगव्यं निराहारो जप्त्वाघोरं विशुध्यति।
उच्छिष्टस्तु यदा स्पृष्ट उच्छिष्टैर्वेणुकादिभिः॥ ४३ : ४८॥ (f. 107r)

स्नानं शौचन्निराहारः पञ्चगव्यञ्जपाच्छुचिः।
घोषार्क्करुक्मरौप्याणाम्वङ्गशीशकयोरपि॥ ४३ : ४९॥

भस्माम्ब्वारिणा शुद्धिर्निर्ल्लेपं स्याद्यथा हरे।
शङ्खसाम्बूकशुक्तीनान्तैजसवच्छुद्धिरिष्यते॥ ४३ : ५०॥

क्वथितं शुध्यते क्षीरं दधिशुद्धिर्निगद्यते।
दधि पात्रान्तरे धृत्वा वीक्षयेत्तदनन्तरं॥ ४३ : ५१॥

अन्नादिलेपनिर्मुक्तम्प्रोक्षणाच्छुध्यते दधि।
सुतप्तस्य घृतस्याथ शुद्धिराज्यस्य कीर्तिता॥ ४३ : ५२॥

एवं मधुगुडादीनां प्रोक्षणादग्नियोगतः।
सतृणा चैव सुक्षोदा सोत्सिष्टा तु सलेपिका॥ ४३ : ५३॥

सतृणा प्रोक्षणाच्छुद्धा सक्षौदा मार्ज्जनाधिका।
सोच्छिष्टा गोमयाघृष्टा पूर्वसंस्कारशोधिता॥ ४३ : ५४॥

सलेपा रुक्षितां कृत्वा घृष्टा गोमयवारिणा। (f. 107v)
मार्ज्जयेत्प्रोक्षयेत् पश्चाद्भूमिशुद्धिरुदाहृता॥ ४३ : ५५॥

अन्यच्छुध्यन्तरं वक्ष्ये समासात्पाकशासन।
सुस्नातश्च समाचान्तः शुद्धवासा शुचिः पुमान्॥ ४३ : ५६॥

पितृदेवोपयुक्तानां प्रत्यहं शौचमिष्यते।
त्यागे परिधानवस्त्राणां प्रावरणस्य मलागमे॥ ४३ : ५७॥

रजकक्षालितं वस्त्रम्पुनर्द्धौतम्विशुध्यति।

43:47 पिबेत् भुङ्क्ते] *conj.*; पिबति भुक्ते C **43:52** घृतस्याथ] *em.*; स्रुतस्याथ C

चर्मणां रज्जुवस्त्राणां शुद्धिः स्यात्क्षारवारिणा॥ ४३:५८॥

कौशेयाम्बिकयोरूक्षैः क्षौमाणां गौरसर्षपैः।
श्रीफलैरंशुपट्टानाङ्कुतपानामरिष्टकैः॥ ४३:५९॥

तृणकाष्टादिकं सर्वम्प्रोक्षणाच्छुद्धिमेति हि।
शुद्धानां संहतानान्तु प्रोक्षणाच्छुद्धिरिष्यते॥ ४३:६०॥

संहतानाम्बहूनान्तु यद्यलेपेन दूषितं।
तत्र त्यक्त्वा तृणादीनां शोधयेत्स्याद्यथा शुचिः॥ ४३:६१॥ (f. 108r)

कारुहस्ताकरन्द्रव्यं शुद्धं पण्यं प्रसारितं।
फलानां क्षालनाच्छुद्धिर्विना दोषम्पुरन्दर॥ ४३:६२॥

दशाहाच्छुध्यते विप्रो द्वादशाहेन भूमिपः।
वैश्यः पञ्चदशाहेन शुद्धिः शूद्रस्य मासिका॥ ४३:६३॥

अनुष्ठानविहीनानां जातिमात्रः पुरन्दर।
वेदवेदाङ्गसंपन्नस्त्वाहिताग्निस्तु सद्विजः॥ ४३:६४॥

शुद्ध्यते तत्क्षणात् स्नानात् ज्ञात्वान्यत्र प्रकल्पयेत्।
अमद्यपाः कुलीनाश्च नित्यन्धर्मपरायणाः॥ ४३:६५॥

शूद्राः शुद्ध्यन्ति पक्षेण नात्र कार्या विचारणा।
उद्वाहिताश्चतस्रो वै ब्राह्मणेन सदा स्त्रियः॥ ४३:६६॥

सूतकन्तु क्रमात् तासां दशषट् द्व्येकवासरम्।
शवेन शुद्ध्यते वृद्धिर्न वृद्ध्या शुद्ध्यते शवः॥ ४३:६७॥

सत्त्विषां वृद्धिवद्धानौ प्रवेशान्नास्ति सूतकम्। (f. 108v)
नृपाणां कारुकाणाम्वा दासीनाञ्च न सूतकम्॥ ४३:६८॥

मृतके तु पृथक्पाकं कुर्याद्योगं न तैः सह।
त्यक्तं न चेदसौ जातिस्तदा शुद्धिर्भवेत्त्र्यहात्॥ ४३:६९॥

स्रंसनात्पूर्णगर्भस्य स्नानादेव विशुद्ध्यति।

43:59 ०नामरिष्टकैः] *conj.*; ०नां मरिष्टकैः C **43:61** संहताना०] *conj.*; संहना० C (unmetrical) **43:67** शवेन] *conj.*; सवेन C

जीवन्जातो यदि श्रेयान्मृतो वा जायते यदि॥ ४३ : ७०॥

शावाशौचं न कर्तव्यं सूतीशौचं समाचरेत्।
आ नामकरणात्सद्य एकाहो दन्तजन्मनः॥ ४३ : ७१॥

चूडायास्त्रिदिनम्प्रोक्तं तत्रागिन्यधिकम्व्रतात्।
अतोर्ध्वं पूर्ववच्छुद्धिः सर्ववर्णेष्वियं स्थितिः॥ ४३ : ७२॥

अहस्तदन्तकन्यायादन्ताया द्विगुणम्भवेत्।
स्वस्रादिषु च विज्ञेयं मातुलानाञ्च मातुले॥ ४३ : ७३॥

देशान्तरे पृथक्पिण्डे स्नानं स्यात्तद्गुरुं विना।
पशुत्वं संस्कृतं येषां सम्यग्निर्वाणदीक्षया॥ ४३ : ७४॥

तस्य संपर्क्कशून्यस्य न स्यातां मृतसूतके। (f. 109r)
अतश्च परतः शक्र सम्पूज्यः सूतके सति॥ ४३ : ७५॥

परान्नभोजने नित्यम्परान्नद्रविणक्रियः।
गृहस्थः सर्वकर्माणि नित्यादन्यानि वर्ज्जयेत्॥ ४३ : ७६॥

द्रव्यैः सङ्कल्पितैः पूर्वं सूतकात्मृतकादपि।
धर्मार्थं दीक्षितैः पूजा कार्या चोत्पादितैस्तथा॥ ४३ : ७७॥

पृथक्पाकं विना पुम्भिर्लोकदीक्षानुसारिभिः।
अन्तर्यागः प्रकर्तव्यो जपः स्नानादिका क्रिया॥ ४३ : ७८॥

प्रायश्चित्तं समादेश्यमन्यथा निश्चिता स्थितिः।
एवं हि वर्तमानस्य त्रिधा सिद्धिर्न दूरतः॥ ४३ : ७९॥

दुःस्वप्नदर्शने स्नानं रेतोत्सर्गे शतक्रतो।
अघोराष्टशतं जाप्यन्तथा संभाष्य चाधमं॥ ४३ : ८०॥

अद्भिः संशुध्यते गात्रं सलेपं तं मृदम्बुभिः।
देवचण्डगुरुद्रव्यं भक्षितं यद्यकामतः॥ ४३ : ८१॥ (f. 109v)

लक्षपादन्तदा देयं द्विगुणन्नैष्ठिके मतं।

43:71 शावा°] *em.*; सावा° C **43:72** अतोर्ध्वं] *em.*; अतोर्द्ध्वं C

अथाक्रम्य सुनिर्माल्यञ्जपेत्पञ्चशतानि तु॥ ४३:८२॥

त्रिगुणङ्गामतो ज्ञेयम्पञ्चगव्यसमन्वितं।
यन्निर्माल्येन संस्पृष्टं तदाहारोपजीविना॥ ४३:८३॥

अष्टांशौनन्तु निर्माल्यं दानलङ्घनभक्षणात्।
लङ्घयेद्यस्तु निर्माल्यन्दद्यादज्ञानतोऽपि वा॥ ४३:८४॥

गुणायुतं जपेद्घोरन्तथोपोष्य विशुध्यति।
निर्माल्यस्पर्शने त्याज्यम्पण्यद्रव्यन्तथौषधं॥ ४३:८५॥

सविकारं पयस्तोयन्तथेक्षुहिंगुजीरकं।
सैन्धवाद्यं सकर्पूरङ्कटुकाद्यं सतण्डुलं॥ ४३:८६॥

घृष्टञ्च चन्दनं भस्म वेणुमृन्मयदारवं।
सर्वं त्याज्यं समुद्दिष्टन्धान्यादि प्रोक्षितं शुचि॥ ४३:८७॥

एवमन्यत्र बोद्धव्यं ज्ञात्वा द्रव्यबलाबलं।
शोधयेत्सर्वदा धीमान्नशुद्धे बन्धनन्ध्रुवम्॥ ४३:८८॥ (f. 110r)

दृतं यस्यापवर्गेच्छा स शुद्धौ कृतनिश्चयः।
शुद्धिनिष्टप्रतिष्ठस्य सिद्धिमुक्ती न दूरतः॥ ४३:८९॥

अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो वा व्याधिपीडिताः॥ ४३:९०॥

तत्रापि च परिक्लेशं ज्ञात्वार्धार्धम्प्रकल्पयेत्।
सुदुष्करं स्वयङ्कर्तुमक्षमाद्द्विगुणोऽन्यतः॥ ४३:९१॥

दशोर्ध्वन्त्रिशतं यावज्जपात्स्नानेन शुध्यति।
स नक्तम्पञ्चमं यावत् सोपवासन्तदूर्ध्वतः॥ ४३:९२॥

तत्त्रिधायुतसञ्जापे तद्वृध्या द्विगुणन्ततः।
तदर्द्धेन तु संयोगी तस्याप्यर्धं तु सङ्करे॥ ४३:९३॥

देशङ्कालं वयः शक्तिञ्जातिं भक्तिं क्रियाक्रमं।

43:87 शुचि] *conj.*; शुचिः C   **43:88** बोद्धव्यं] *em.*; बोधव्यं C

सुविचार्य प्रदातव्यं नोपवासो रुगान्विते॥ ४३ : ९४॥

शिवार्प्पितैकचित्तानां सुवृत्तानां पुरन्दर। (f. 110v)
प्रायश्चित्तं समाख्यातं नोक्तवृत्तिस्थितात्मनां॥ ४३ : ९५॥

सप्तकोटिप्रविस्तीर्ण्णमोहाचूरात्मया तव।
व्याख्यातं सारमादाय लक्षग्रन्थेन सुव्रत॥ ४३ : ९६॥

पुनः पृष्टः समासेन त्वयाहं सुरनायक।
तदाख्यातन्तदर्धेन मोहचूरं मया हरे॥ ४३ : ९७॥

सिद्धिसारसहस्रैस्तु युग्मचन्द्रैस्तदन्ततः।
योगज्ञानादिसंयुक्तं व्याख्यातं शास्त्रमुत्तमं॥ ४३ : ९८॥

सुसंक्षेपं सुगम्भीरं प्रतिष्ठातन्त्रमुत्तमं।
चतुर्ग्गोचरसंबद्धं भूयः ख्यातन्तदन्तरं॥ ४३ : ९९॥

न देयन्दुष्टसत्वानान्निन्दातर्क्कानुवर्त्तिनां।
गुरुदेवद्विषां शक्र देशिकादिद्विषान्तथा॥ ४३ : १००॥

एते चान्ये च ये केचिद्दुष्टसत्वाः पुरन्दर।
तेषां शास्त्रं सदा गोप्यं प्रायश्चित्तमतोऽन्यथा॥ ४३ : १०१॥

गुरुदेवाग्निभक्ताय श्रद्धधानाय सुव्रत।
तस्मै देयमिदं शास्त्रमित्याह भगवाञ्छिवः॥ ४३ : १०२॥ (f. 111r)

॥ इत्याग्नेये महातन्त्रे प्रतिष्ठातन्त्रे मोहचूरोत्तरं समाप्तं॥

॥ अथ वाथुले प्रायश्चित्तपटलमभिलिख्यते॥

ईश्वर उवाच—

मार्गस्थाः साधकाद्यास्तु लुप्ताचारा व्रजन्त्यधः।
पालनीयमतस्तस्मादाचारः शिवभाषितः॥ ४४ : १॥

दैवाद्रोगात्तथा मोहाद्यदि दोषमुपागतं।
स्नानञ्जपोपवासञ्च होमं वै गड्डुकानि च॥ ४४ : २॥

44:0 अथ वाथुले प्रायश्चित्तपटलमभिलिख्यते] C^{pc} ; *om.* C^{ac}

पञ्चगव्याशनं दानं मलदुष्कृतनाशनं।
अत्यन्तसरुजे देहे राजचौरभये तथा॥ ४४ :३॥

अग्निवारिभये तद्वत्सूतकान्नाशने तथा।
गुरुदेवाग्निकार्ये च नित्यहानिर्नदोषभाक्॥ ४४ :४॥

नित्यं समयिना नित्यं यावज्जीवन्तु कारयेत्।
पुत्रकेण तथा वत्स कार्यं वा गौरवं क्वचित्॥ ४४ :५॥

गुरुणा साधकेनाथ परं नित्यम्विवर्ज्जयेत्।
गुरुस्तु भक्तितः पूज्यो न तं कर्मणि योजयेत्॥ ४४ :६॥ (f. 111v)

योजयेद्यः प्रमादेन लक्षैकन्दक्षिणञ्जपेत्।
कुलोद्गतः सत्क्रियश्च सच्छास्त्रनिरतः सदा॥ ४४ :७॥

शुद्धमार्गैकसंसक्तः परदारविवर्ज्जितः।
चीर्ण्णविद्याव्रतो दक्षो दम्भमायाविवर्ज्जितः॥ ४४ :८॥

योगाभ्यासरतो नित्यं प्राणिहिंसाविवर्ज्जितः।
परापवादनिर्मुक्तो गुरुरेवंविधः स्मृतः॥ ४४ :९॥

गृहस्थो ब्रह्मचारी वा प्रायश्चित्ती द्विधा स्थितः।
प्रत्येकं द्विविधं ज्ञेयं सकामाकामभेदतः॥ ४४ :१०॥

निष्कामात्तु सकामे तु द्विगुणां शुद्धिमादिशेत्।
सकामस्य तु या शुद्धिर्भौतिकस्यो भवेद्यथा॥ ४४ :११॥

निष्कामे नैष्ठिके सास्यात्सकामे प्राक्चतुर्गुणा।
त्रिष्कालमेककालम्वा पूजनीयो महेश्वरः॥ ४४ :१२॥

प्रातर्मध्याह्नसमये चतुर्थप्रहरावधिं।
अस्तंयाते रवौ पूजां दानं च परिवर्ज्जयेत्॥ ४४ :१३॥ (f. 112r)

विना चन्द्रग्रहे वत्स तथा वै साधकेषु च।
एकाहपूजालोपेन सहस्रम्पञ्चमञ्जपेत्॥ ४४ :१४॥

अकामतः प्रमादाच्च कामतो द्विगुणाच्छुचिः।

44:5 पुत्रकेण] *conj.*; पुत्रकेन C

उपवासद्वयाद्वत्स शुद्धिमाहुर्न चान्यथा॥ ४४ :१५ ॥

त्रिष्कालं पूजनं येषामेककालमथापि वा।
प्रायश्चित्तं समन्तेषान्न न्यूनन्नाधिकं क्वचित्॥ ४४ :१६ ॥

त्रिष्कालं पूजनं येषां यत्कालाच्च विलेपनं।
प्रागुक्तन्तु ददेत्तेन शुद्धिः कार्या न चान्यथा॥ ४४ :१७ ॥

एवं वै नैष्ठिकानान्तु वृद्ध्या शुद्धिं समादिशेत्।
दैवाद्रोगात्तथा मोहाच्चोरराजभयादिभिः॥ ४४ :१८ ॥

एभिर्दोषैर्न्न कामित्वं शेषं ज्ञेयन्तु कामतः।
एकाहन्तु समारभ्य यावत्पङ्क्तिदिनावधिः॥ ४४ :१९ ॥

वर्धयेत्त्रिशतं प्रोक्ताद्धोमं वै गडुकानि च। (f. 112v)
पक्षैकलोपतो वत्स द्व्ययुतं दक्षिणञ्जपेत्॥ ४४ :२० ॥

द्विगुणं मासलोपे तु द्व्ययुतं वर्धयेत्ततः।
मासि मासि महासेन यावत्संवत्सरावधिं॥ ४४ :२१ ॥

नित्यवद्धोमलोपे तु प्रायश्चित्तं समादिशेत्।
अष्टम्यादिषु या पूजा जपहोमादिका तथा॥ ४४ :२२ ॥

चतुर्गुणं तु तल्लोपे प्रायश्चित्तन्तु नित्यशः।
पवित्रारोहणन्देवान्नाषाढादित्रये कृतं॥ ४४ :२३ ॥

लक्षद्वयादघोरस्य तथा चान्द्रायणाच्छुचिः।
सकृत्सन्ध्याविलोपे तु सद्योजातशताच्छुचिः॥ ४४ :२४ ॥

त्रिकाललोपात्त्रिगुणं सोपवासो जपो मतः।
अकामतः समाख्यातं कामतो द्विगुणञ्चरेत्॥ ४४ :२५ ॥

भौतिकस्य समाख्यातं द्विगुणं नैष्ठिके मतं।
चतुर्गुणं सकामस्य कथितं ब्रह्मचारिणे॥ ४४ :२६ ॥

बहुदैवसिके भ्रंसे प्रागुक्तं षड्गुणं भवेत्।
उपवासविहीनस्तु सरुजः सजपः स्मृतः॥ ४४ :२७ ॥ (f. 113r)

सुदुष्करं स्वयं कर्तुमक्षमाद्द्विगुणोन्यतः।

प्रायश्चित्तं प्रकर्तव्यन्तच्छ्रोतस्थैश्च दीक्षितैः॥ ४४ :२८॥

सामान्यसिद्धिरक्षार्थं प्रायश्चित्तादिके तथा।
स्वमन्त्रो न नियोक्तव्यः सहस्राच्छुद्धिरन्यथा॥ ४४ :२९॥

गारुडम्भूततन्त्रञ्च लोभात्स्नेहाद्विवर्ज्जयेत्।
प्रमादात् कुरुते यस्तु बहुरूपशताच्छुचिः॥ ४४ :३०॥

ये कुर्वन्ति गुरोर्न्निन्दां समयिपुत्रकादिषु।
तस्मात्स्थानाद्व्रजेद्दूरं सद्योजातशतं जपेत्॥ ४४ :३१॥

कर्मणा मनसा वाचा न कार्यं पारदारिकं।
शुद्धिर्लक्षार्धपादेन मोहाद्यदि समाचरेत्॥ ४४ :३२॥

कन्यायां द्विगुणं कार्यं तथा वर्णान्तरेषु च।
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः॥ ४४ :३३॥

विशेषपातकानान्तु सम्बन्धात्पञ्चमं स्मृतं। (f. 113v)
हत्वाकामाद्विजं सद्यो गवां गोष्ठे जपेत्सदा॥ ४४ :३४॥

पीत्वाकामात्सुरां वामं शिवहर्मे जपेत्सदा।
कृत्वास्तेयमकामात् तु घोरं पितृवने जपेत्॥ ४४ :३५॥

गुरुस्त्रीगमनङ्कृत्वा प्रमादाच्च वने नरं।
योगङ्कृत्वा समस्तैस्तु नगाग्रे पञ्चमञ्जपेत्॥ ४४ :३६॥

प्रकाशे कामतश्चैव लक्षमावर्त्य शुध्यति।
अकामतो रहस्ये च सहस्राच्छुद्धिरिष्यते॥ ४४ :३७॥

कामतः सरहस्ये च तस्मिन्स्यादयुतद्वयं।
अकामतः रहस्ये च तत्राप्येवायुतद्वयं॥ ४४ :३८॥

गुरुद्रोहादृते शुद्धिः कामतस्तु तथा न हि।
चान्द्रायणं पराकं वा कृच्छ्रं चैव यथाक्रमं॥ ४४ :३९॥

तप्तकृच्छ्रं तथा कृच्छ्रं ब्रह्महत्यादिपञ्चसु।

44:35 °कामात् तु] *conj.*; °कामन्तु C **44:38** सरहस्ये] *conj.*; सरस्ये C (unmetrical) **44:38** रहस्ये] *conj.*; सरहस्ये C (unmetrical)

लक्षणं सम्प्रवक्ष्यामि क्रमाच्चान्द्रायणादिषु॥ ४४:४०॥

एकभुक्तं त्र्यहङ्कुर्यात् त्र्यहञ्चैव त्वयाचितं। (f. 114r)
त्र्यहं वै नक्तभोजित्वन्त्र्यहम्वै मारुताशनं॥ ४४:४१॥

एतत्कृच्छ्रं समाख्यातं प्राजापत्य इति स्मृतं।
त्र्यहमुष्णं पिबेद्वारि त्र्यहं क्षीरेण भोजनं॥ ४४:४२॥

त्र्यहमुष्णं घृतं पीत्वा त्र्यहं वै केवलं सदा।
तप्तकृच्छ्रं समाख्यातमतिकृच्छ्रं शृणुष्वतः॥ ४४:४३॥

क्षीरस्य त्रिपलं पानं दिवसानेकविंशतिः।
अनेन क्रमयोगेन अतिकृच्छ्रमुदाहृतं॥ ४४:४४॥

अतिकृच्छ्रं समाख्यातं पराकश्च निगद्यते।
द्वादशाहं निराहारः स पराक इति स्मृतः॥ ४४:४५॥

मासार्धं ग्रासवृद्धिः स्याच्छुक्ले कृष्णे च ह्रासयेत्।
चान्द्रायणविधिः प्रोक्तो जलादेव जलात्मकः॥ ४४:४६॥

शूद्राणान्दीक्षितानाञ्च मद्यपाने कृते पुनः।
नियमादयुताच्छुद्धिरघोरात्कृच्छ्रतस्ततः॥ ४४:४७॥ (f. 114v)

क्व मद्यं क्व शिवे भक्तिः क्व मांसं क्व भवार्च्चनं।
मद्यमांसप्रवृत्तानान्दूरे तिष्ठति शङ्करः॥ ४४:४८॥

गुरुस्त्रीगमनं यच्च चतुर्णामपि तत्समं।
अज्ञातगोघ्ना यस्मिन् गृहे वै समुपस्थिताः॥ ४४:४९॥

सर्वभाण्डपरित्यागात्कृच्छ्राच्छुद्धिर्न्न चान्यथा।
भुक्त्वा वा कामतश्चैव तप्तकृच्छ्रात्परः शुचिः॥ ४४:५०॥

कामतो यदि वा भुक्त्वा सकृत्कृच्छ्रातिकृच्छ्रतः।
वामदेवं जपेच्छुद्धिः पराकान्ते व्रतं मतं॥ ४४:५१॥

ज्ञात्वा भुक्त्वाथवा तेन तदासौ तत्समो भवेत्।
रजकी चर्मजा कृष्णा प्रमादात् मंदिरे स्थिता॥ ४४:५२॥

भाण्डत्यागात्सदा शुद्धिस्त्र्यहात्पंचमतस्ततः।
यदा भुक्तमकामाद्वा कृष्णाघोरजपात्त्र्यहात्॥ ४४ :५३॥

कामतो द्विगुणो वायं सकृद्योगाद्विधिर्मतः।
अकामाद्बहुयोगाच्च ततश्चांद्रायणाच्छुचिः॥ ४४ :५४॥ (f. 115r)

कामाद्वा बहुयोगाद्वै सरूपं किन्तु वारिणा।
प्राणिहिंसात्मकम्पापं शतघोरजपाच्छुचिः॥ ४४ :५५॥

स्वजातिदीक्षिते स्पृष्टे तदाचम्य शुचिर्भवेत्।
आचम्य दीक्षितस्यापि स्वजातीशशतं जपेत्॥ ४४ :५६॥

समीपे दीक्षिते स्पृष्टे प्रायश्चित्तन्तु पूर्ववत्।
तस्मिन्नदीक्षिते स्पृष्टे जपेत्स्नात्वा शतत्रयं॥ ४४ :५७॥

एवमेवान्तरस्पर्शाद्दीक्षितस्येतरस्य च।
शतत्रयञ्च वै स्पर्शे सोपवासो भवेदजः॥ ४४ :५८॥

तथैव शूद्रसंज्ञस्य स्पर्शनाद्दीक्षितस्य च।
स्पर्शाददीक्षितस्यापि सहस्रं द्विरुपोषितः॥ ४४ :५९॥

इतरे पादहीनन्तु प्रायश्चित्तं प्रकुर्वते।
पुरुषाघोरवामाजा जातीशा ब्राह्मणादितः॥ ४४ :६०॥

त्रिरात्रमन्त्यजस्पर्शादघोरस्यायुताच्छुचिः। (f. 115v)
कृच्छ्राघोरञ्जपेत्स्पर्शाच्चण्डालस्यायुतत्रयं॥ ४४ :६१॥

ज्ञात्वाज्ञात्वा यथास्पर्शात्प्रायश्चित्तन्तु तस्य तत्।
अज्ञात्वा भक्षितं येन पश्चाज्ज्ञात्वा षडानन॥ ४४ :६२॥

स्पृष्टमन्त्रादिकञ्चैव मदिरामेवमादिभिः।
रेतोमूत्रपुरीषैर्वा काकश्वानावलीढितं॥ ४४ :६३॥

विड्वराहैस्तथागृद्ध्रैर्गोमायुकपिकुक्कुटैः।
संस्पृष्टमन्त्यजेनापि शूद्राद्युच्छिष्टदूषितं॥ ४४ :६४॥

स्नात्वा कृत्वा त्वहोरात्रम्पञ्चगव्यं समाचरेत्।
सहस्रम्प्रतिसंध्यन्तु द्वात्रिंशार्णवमभ्यसेत्॥ ४४ :६५॥

त्रिदिनं नक्तभोजी स्यात्त्रिः स्नायी ध्यानतत्परः।
इष्ट्वा देवं चतुर्थेह्नि सहस्रं होमयेत्ततः॥ ४४ :६६॥

पूर्ववद्भोजनं कृत्वा नक्ताशी शुध्यते तथा।
शिवार्पितैकचित्तस्य नृपस्यैवं विधीयते॥ ४४ :६७॥

त्रिधा स्नानन्तु वैश्यस्य सकृच्छूद्रस्य कीर्तितं। (f. 116r)
कामतो द्विगुणं जाप्यं सर्वेषां परिकीर्तितं॥ ४४ :६८॥

स्नात्वा वै पञ्चगव्यन्तु प्रत्येकं शतमन्त्रितं।
पातव्यं तत्त्रिरात्रं वै द्वात्रिंशार्णवमभ्यसेत्॥ ४४ :६९॥

स्तेयं परस्त्रीसम्भोगं सुरापानादिकं ततः।
प्रागुक्तेषु प्रदेशेषु जपेत्मन्त्रांस्तु पूर्ववत्॥ ४४ :७०॥

सुयन्त्रितं व्रतज्ञैश्चाहनि सम्वत्सरद्वयं।
अयाचितान्नो लघ्वाशी त्रिस्नायी ध्यानकृत्सदा॥ ४४ :७१॥

वत्सरद्वितयस्यान्ते शिवक्षेत्रन्तदा व्रजेत्।
दीक्षागुरौ बोधके च प्रेरके क्रूरभाषणात्॥ ४४ :७२॥

लक्षाल्लक्षांशतः शुद्धिस्तद्दशांशेन कल्पयेत्।
षड्गुणा मुष्टिघाताद्यै रक्ताद्धा दशधा मता॥ ४४ :७३॥

शस्त्रैः शतगुणाच्छुद्धिर्ज्ञात्वान्यत्र प्रकल्पयेत्।
तत्र कुर्याद्व्रतं शक्त्या कृच्छ्रचान्द्रायणादिकं॥ ४४ :७४॥ (f. 116v)

व्रतान्ते पूर्वदीक्षा या ग्राह्या पञ्चाब्जपूर्विका।
सर्वस्वञ्च गुरोर्दद्याद्देशिकाचार्ययोस्तथा॥ ४४ :७५॥

चतुर्णां शुद्धिरादिष्टा शुद्धिर्न्नो गुरुतल्पगे।
तथा शिवव्रतचरे देशिके साधकादिके॥ ४४ :७६॥

तेषान्तु रक्तपातेन लक्षजापेन शुध्यति।
दण्डघातादिकन्दत्तं यदा रक्तं न दृश्यते॥ ४४ :७७॥

44:67 नक्ताशी] *em.*; क्ताशी C (unmetrical) 44:69 पातव्यं] *conj.*; पातव्य C 44:69 द्वात्रिंशा°] *conj.*; द्वात्रिशा° C 44:73 रक्ताद्धा°] *conj.*; रक्ताद्वा° C 44:75 गुरोर्ददद्याद्°] *conj.*; गुरोर्ददद्या° C

तदर्द्धाच्छुध्यते मन्त्री प्रार्थयेत् पादवन्दनैः।
स्पृष्टं रजस्वलानान्तु भुक्तन्तद्यद्यकामतः॥ ४४ :७८॥

शुद्ध्यत्ययुतजापेन निराहारेण नान्यथा।
कामतो द्विगुणञ्चैव स्नात्वा होमं विशुध्यति॥ ४४ :७९॥

यत्किञ्चित्स्वयमश्नीयान्नो दद्यात्परमेष्ठिनः।
गुरूणां वा प्रसादेन तदा अष्टशतञ्जपेत्॥ ४४ :८०॥

निरामिषं शिवे देयं सर्वपाकं शुचिः सदा। (f. 117r)
मृतके सूतके वाथ भक्षितन्तु अकामतः॥ ४४ :८१॥

कामतोऽघोरमन्त्रस्य सहस्रं परिवर्त्तयेत्।
गणान्नं गणिकान्नञ्च पतितान्नाशने तथा॥ ४४ :८२॥

सीमन्तोन्नयने चैव नामधेये तथा पुनः।
अन्नप्राशनकाले तु सहस्रं भक्षितो जपेत्॥ ४४ :८३॥

यः प्रबन्धः प्रजातस्य भुक्त्वा सम्वत्सरावधि।
सद्यास्त्राद्द्वादशमारभ्य दक्षिणस्यायुतं जपेत्॥ ४४ :८४॥

कामतोऽकामतो वापि सकृच्छूद्रान्नभक्षणात्।
शतं तु बहुरूपं स्यात्सच्छूद्रेषु शतत्रयं॥ ४४ :८५॥

वृक्षारामे तथा वापीकूपादिषु शिवालये।
विवाहे तु वृषोत्सर्गे गोदानेषु शतं जपेत्॥। ४४ :८६॥

निषेधात्मांसमध्वादि प्रमादाद्भक्षितं यदा।
अघोरस्यायुतञ्जप्त्वा तदा शुद्धिमवाप्नुयात्॥ ४४ :८७॥

मैथुनाहारपानानां नियमस्याप्यरक्षणात्। (f. 117v)
अभ्यङ्गपानवस्त्रादौ सहस्रार्द्धेन शुध्यति॥ ४४ :८८॥

भिक्षान्नभोगलोपाच्च शुद्धिः स्यात् पञ्चभिः शतैः।
अधःशयनसङ्कल्पे लोपादस्त्रञ्जपेच्छतं॥ ४४ :८९॥

ग्रहभूतपिशाचादिविच्छेदे तु कृते सति।

44:90 सति] *conj.*; शति C

शतत्रयमघोरस्य जपतो नान्यथा शुचिः॥ ४४:९०॥

उपरोधात्तथा स्नेहात्कृत्वा शान्तिकपौष्टिके।
शतत्रयाद्भवेच्छुद्धिर्बहुरूपस्य नान्यथा॥ ४४:९१॥

शिवधर्मस्थितानाञ्च प्रायश्चित्तमुदाहृतं।
लोकधर्मस्थितानाञ्च सूतके पूजिते तथा॥ ४४:९२॥

प्रायश्चित्तं समादेश्यमन्तर्यागम्विना तथा।
सहस्रं दक्षिणञ्चैव कर्तव्यं नान्यथा तथा॥ ४४:९३॥

उच्चाटनादिकं कृत्वा बहुरूपायुताच्छुचिः।
न मारणन्तु मन्त्रेण मनसा क्वापि कारयेत्॥ ४४:९४॥

देवप्रतिष्ठान्दीक्षाञ्च कृत्वा क्षत्रादिषु त्रिषु।
अघोरस्यायुतं जाप्यं निराहारैकतः शुचिः॥ ४४:९५॥ (f. 118r)

पटुकार्प्पासमौर्णं वा क्षौमं मौञ्जन्तु वेष्टनं।
चर्मप्रतिग्रहश्चैव गृहीतं यत्र कुत्रचित्॥ ४४:९६॥

जप्तव्यन्नियमेनैव त्रिशतं बहुरूपिणं।
क्षीरं दधि घृतञ्चैव मधुमांसादिकञ्च यत्॥ ४४:९७॥

लवणन्तैलतीक्ष्णादि गन्धानि विविधानि च।
त्रिशतं बहुरूपस्य जपेच्छुद्धिमवाप्नुयात्॥ ४४:९८॥

रजतञ्च मणिं हेमं विद्रुमं मौक्तिकन्तथा।
ग्रामञ्च वृषभं हस्तिस्त्रीपश्वाश्वतरं नरं॥ ४४:९९॥

आलयादिषु यत्नेन बहुरूपायुताच्छुचिः।
मठप्रतिग्रहे कुर्याज्जपेद्घोरस्य लक्षकं॥ ४४:१००॥

पापानामप्यनेकानां सङ्करे समुपस्थिते।
द्वात्रिंशाक्षरकं जाप्यन्ततः सिद्धिमवाप्नुयात्॥ ४४:१०१॥

अन्नसङ्करदोषाच्च भाण्डसङ्करतस्तथा। (f. 118v)
शतत्रयादघोरस्य ह्ययुताद्योनिसङ्करात्॥ ४४:१०२॥

काष्टोपलतृणादीनां हरणाच्छतशः शुचिः।
स्वेदजप्राणिघातेषु निरस्तिके हतेऽपि च॥ ४४:१०३॥

अजातस्य शतञ्जाप्यमकामात्तु तदर्धतः।
आखुनश्च शतेनैव मार्ज्जारे च सहस्रशः॥ ४४:१०४॥

श्वसृगालवधे चैव द्विगुणैः कपिकुक्कुटे।
सर्पाद्यण्डजघाते तु हंसादिशकुनिष्वपि॥ ४४:१०५॥

सिंहादिमृगघाते तु अजादिपशुघातने।
शताच्चतुश्शताच्चैव बहुरूपशताच्छुचिः॥ ४४:१०६॥

श्वशृगालादिसर्पैर्वा यदि दष्टः प्रमादतः।
स्नात्वा शीताम्बुमध्यस्थमघोरञ्चायुतं जपेत्॥ ४४:१०७॥

श्वपाकम्लेच्छचाण्डालबौद्धकापालिकौलिकैः।
बक्काशैः सोमहृद्यूपश्मशानद्रुमस्पर्शनात्॥ ४४:१०८॥

कृत्वा स्नानं सचेलन्तु तृतीयस्य शताच्छुचिः। (f. 119r)
वामाङ्गस्पर्शने चैव तथा दुःस्वप्नदर्शने॥ ४४:१०९॥

अरिष्टचिन्तनाच्चैव भाषणादनृतस्य च।
कर्मणा मनसा वाचा सहस्रं हृदयं जपेत्॥ ४४:११०॥

अकामतः प्रसुप्तस्य शुक्रादेः स्यन्दने सति।
स्नात्वा पुरा सचेलन्तु अस्त्रमन्त्रशतञ्जपेत्॥ ४४:१११॥

कामतो गर्भपाताच्च तृतीयस्यायुतं जपेत्।
धेनुं प्रमादतो हत्वाप्यघोराल्लक्षतः शुचिः॥ ४४:११२॥

धेनूनाञ्च शतं दत्वा लक्षाद्वाप्यथ शुध्यति।
भुक्ते भुक्तौ तु शूद्रस्य सहस्रात्कामतः शुचिः॥ ४४:११३॥

कर्मणा मनसा वाचा साधकादिषु खेदने।
समाचरेत्तथा किञ्चिन्निवेदं येन जायते॥ ४४:११४॥

44:103 °दीनां] *em.*; °दीना C **44:103** निरस्तिके] *em.*; निरस्तेके C (unmetrical)
44:105 सपाद्यण्ड°] *em.*; शर्पाद्यण्ड° C

कृत्वा पुरा त्रिरात्रन्तु द्वात्रिंशार्णायुताच्छुचिः।
देवालये तु यः कुर्यात्पुरीषं मूत्रमेव वा॥ ४४ :११५ ॥ (f. 119v)

देवतायतनेऽऽरामे शिवक्षेत्रे विशेषतः।
सहस्रमेकञ्जप्तव्यमकामात्पादतः शुचिः॥ ४४ :११६ ॥

स्त्रीशूद्रं बालकं हत्वा कामतोऽकामतोऽपि वा।
लक्षमेकङ्क्रमाज्जप्त्वा तदर्धेनाप्यकामतः॥ ४४ :११७ ॥

नाधिकारी ह्यनुष्ठाने दशाहं वै भवेद्द्विजः।
द्वादशाहन्नृपस्यैव वैश्यः पञ्चदशाह्निकं॥ ४४ :११८ ॥

निवर्तते तु नित्यादि शूद्रे मांसं न चान्यथा।
निर्वाणदीक्षितानान्तु सूतकं नैव विद्यते॥। ४४ :११९ ॥

विद्यते सूतकं तेषां लोकदीक्षानुसारतः।
शिखाच्छेदो न तत्रास्ति दीक्षा सा लौकिकी मता॥ ४४ :१२० ॥

अन्तर्यागः प्रकर्तव्यो लौकिकैरेव दीक्षितैः।
जपं प्रदक्षिणादीनि कर्तव्यानि प्रयत्नतः॥ ४४ :१२१ ॥

ब्रह्मचारी गृहस्थस्य भोज्यान्नो नापरो क्वचित्। (f. 120r)
वानप्रस्थयतीनान्तु पूर्ववद्दक्षिणं जपेत्॥ ४४ :१२२ ॥

तथान्यलिङ्गिनाम्भुक्त्वा सहस्रन्दक्षिणञ्जपेत्।
द्विजातेश्चोपवासे तु विहितस्तादृशो जपः॥ ४४ :१२३ ॥

यो मोहाद्गुरुपादैश्च मोहतः शपथम्वदेत्।
ददाति चान्यो दुष्टात्मा तावुभौ नरकं व्रजेत्॥ ४४ :१२४ ॥

सङ्करेषु च सर्वेषु चेतसः शुद्धिकारणं।
अघोरमन्त्रो जप्तव्यो यावच्चित्तं प्रसीदति॥ ४४ :१२५ ॥

जपतीर्थोपवासाच्च शिवायतनयोगतः।
गड्डुकानां प्रदानेन तिलाज्यहवनेन तु॥ ४४ :१२६ ॥

44:116 °मकामात्पादतः] *em.*; °मकात्पादतः C (unmetrical) **44:120** लौकिकी] *em.*; लोकिकी C **44:121** अन्तर्यागः प्रकर्तव्यो] *conj.*; अन्तर्यागप्रकर्यो C (unmetrical)

आचार्यसन्निधानेन संहिता श्रवणेन तु।
देवद्विजगोशिवाय पञ्चगव्याशनेन च॥ ४४ :१२७॥

व्रतैरेव महासेन किल्बिषं शतशो नयेत्।
मेघमुक्तो यथा भानुस्तद्वल्लोके विराजते॥ ४४ :१२८॥ (f. 120v)

तस्मादप्यनिवृत्यर्थं प्रायश्चित्तं समाचरेत्॥ ४४ :१२९॥

॥ इति वाथुले महातन्त्रे आग्नेयाख्ये सामान्यप्रायश्चित्तविधानं॥

लिङ्गन्तु त्रिविधं विद्धि व्यक्ताव्यक्तोभयाकृतिः।
लिङ्गभेदो न वक्तव्यः प्रायश्चित्तविधिम्प्रति॥ ४५ :१॥

एकः शिवस्त्रयाणान्तु संस्थितस्तत्त्वभेदतः।
प्रायश्चित्तविधौ वत्स लिङ्गभेदं ततः शृणु॥ ४५ :२॥

यागेश्वरञ्चलम्विद्धि स्थिरमन्यद्द्वितीयकं।
स्थितं च स्थाप्यमानञ्च विधिना बलिमादिशेत्॥ ४५ :३॥

साध्यात्पुरापि तं पूर्वमपरं तद्विना हितं।
द्वैतमद्वैतसंबन्धाल्लिङ्गं द्विविधमादिशेत्॥ ४५ :४॥

इत्यष्टौ शुद्धिभेदास्तु भूयांशोऽन्योन्यमूर्च्छनात्।
स्वयं वै स्वेष्टलिङ्गे त्वपराधिविशोधकं॥ ४५ :५॥ (f. 121r)

परैः कृतेऽपराधे च शुद्धिस्तत्र विधीयते।
स्वेष्टलिङ्गे साधकेन द्वयस्यात्र विशोधनं॥ ४५ :६॥

अपराधिविधौ ज्ञेयः स्वकृतश्चापरैः कृतः।
एकैकाद्विविधो ज्ञेयः सकामाकामभेदतः॥ ४५ :७॥

द्विविधः सोऽपि विज्ञेयो भौतिको नैष्ठिकस्तथा।
चतुर्धा भौतिको ज्ञेयः समयाद्यैश्च भेदतः॥ ४५ :८॥

44:129 तस्मादप्यनिवृत्यर्थं] *conj.*; तस्मादस्मादघनिवृत्यर्थं C (unmetrical) 45:1 व्यक्ताव्यक्तोभयाकृतिः] *em.*; व्यक्ताभक्तोभयाकृतिः C 45:3 स्थिरमन्यद्°] *conj.*; स्थिरं मन्यद्° C

लिङ्गापराधकरणाच्छोधनं कथ्यते पुनः।
चलास्थाप्यचलास्थाप्याद्द्विगुणं परिशोधनं॥ ४५ :९॥

पूर्वसिद्धे चले शुद्धिं द्विगुणोऽस्य प्रकल्पयेत्।
स्थिरे चतुर्गुणं वत्स प्राक्शुद्धे शुद्धिमादिशेत्॥ ४५ :१०॥

साधारणा तथा साध्या द्विगुणा सिद्धिरीरिता।
द्वैतादद्वैतसंज्ञे तु द्विगुणां शुद्धिमादिशेत्॥ ४५ :११॥

या तु साधारणाच्छुद्धिर्द्विगुणा तद्धि नामतः। (f. 121v)
स्वेष्टलिङ्गापराधस्तु परैरेव कृतो यदा॥ ४५ :१२॥

द्विगुणं स्वकृते प्राहुः प्रायश्चित्तं विशुद्धये।
निष्कामश्च सकामश्च स्वयमेव परोऽथ वा॥ ४५ :१३॥

ज्ञात्वाज्ञात्वा प्रकर्तव्यं प्रायश्चित्तं शिखिध्वज।
साधकेभ्यो दीक्षितस्य शोधनं द्विगुणं मतं॥ ४५ :१४॥

भौतिकाद्ब्रह्मचारीणां शोधनं द्विगुणं मतं।
वर्णेषु वर्णबाह्येषु दृष्टे लिङ्गे विशोधनं॥ ४५ :१५॥

तथैव स्पर्शिते लिङ्गे शोधनं पुरतः शृणु।
चातुर्वर्णात्मको वर्ग्गो नटकैवर्तकोऽपरः॥ ४५ :१६॥

यद्उपस्पर्शतः शुद्धिः †स्ववर्ग्गो द्वितीयो मतः†।
काकादिवर्गस्तृतीयः स्नानं यत्स्पर्शतो भवेत्॥ ४५ :१७॥

श्वपचादिचतुर्थस्तु सचैलं स्पर्शतो यतः।
दर्शनं स्पर्शनं वत्स चतुर्वर्ग्गविवर्ज्जितं॥ ४५ :१८॥

लिङ्गाश्रितानां दोषाणाम्प्रमाणं कथ्यते पुनः। (f. 122r)
येषु सञ्ज्ञातमात्रेषु प्रायश्चित्ती भवेन्नरः॥ ४५ :१९॥

प्रायश्चित्तं पुरा ज्ञेयं लिङ्गच्छायां न लङ्घयेत्।
शतत्रयेण शुद्धिः स्यादघोरेण न चान्यथा॥ ४५ :२०॥

45:10 द्विगुणोऽस्य] *conj.*; द्विगुणास्य C **45:12** नामतः] *conj.*; नामता C **45:13** प्रायश्चित्तं] *conj.*; प्रायश्चित्त C **45:14** प्रकर्तव्यं] *em.*; प्रकर्तं C (unmetrical) **45:17** °वर्गस्तृतीयः] *conj.*; °वर्ण्णस्तृतीयः C

सहस्राल्लुठिते शुद्धिर्द्विगुणम्परिवर्तनात्।
त्रिचतुर्ल्लुठिते लिङ्गे विवृते तु महीतले॥ ४५ :२१॥

शुचिश्चैवायुतेनैव लक्षात्स्वभ्रच्युते शुचिः।
अभिघाते तु संजाते द्व्ययुताच्छुद्धिमादिशेत्॥ ४५ :२२॥

अदूरादयुतेनैव अभिघाताच्छुचिर्भवेत्।
पादस्पर्शे लंघने च द्व्ययुताच्छुद्धिमादिशेत्॥ ४५ :२३॥

अर्द्धात्पादरजःस्पर्शे शुद्धिः स्यान्नान्यथा गुह।
त्र्ययुताच्छ्लेष्मदुष्टे तु द्व्ययुतात्तु तदम्भसा॥ ४५ :२४॥

मूत्रमूत्रोदकेनैव लक्षार्द्धात्पादतः शुचिः। (f. 122v)
रक्तरजस्वलास्पर्शाल्लक्षार्द्धाच्छुद्धिरीरिता॥ ४५ :२५॥

तत्संयुक्तोदकस्पर्शात्पादोना पूर्ववत् शुचिः।
विष्टास्पर्शात्तथा लक्षात्पादोनात्तु तदम्भसा॥ ४५ :२६॥

तथा निर्माल्यगर्ते तु पतिताच्छुद्धिमादिशेत्।
विष्टागर्त्तनिपाताच्च सार्द्धलक्षाच्छुचिर्मता॥ ४५ :२७॥

स्थिरस्योन्मूलनाल्लक्षाच्छुद्धिः स्यात्स्थापनात्तथा।
समुद्भवान्तरस्थे तु समुद्गकविवर्ज्जिते॥ ४५ :२८॥

समुद्गकेष्टलिङ्गे तु प्रमादात्पतिते सति।
त्र्ययुतार्द्धशतं हस्ते कल्प्यं न्यूनाधिकन्ततः॥ ४५ :२९॥

समुद्गकविहीने तु हस्तात्तु पतिते शिवे।
हस्तमात्रप्रमाणाच्च पूर्वोक्ताद्द्विगुणाच्छुचिः॥ ४५ :३०॥

त्र्ययुतादग्निनालीढे यदि कान्तिर्न हीयते।
कान्तिहीने शुचिर्लक्षात्परित्यागे कृतेऽपरे॥ ४५ :३१॥ (f. 123r)

व्यङ्गितेऽप्यथ विच्छाये नदीगर्तादिपाततः।
हृते नष्टेऽथ पतिते महागर्त्ते प्रमादतः॥ ४५ :३२॥

श्वकाकालीढिते मीनेवाथ शुचिस्तथा।

45:27 निर्माल्यगर्ते] *em.*; निर्माल्यर्त्ते C (unmetrical)

हृते राज्ञा तस्करैर्वा श्वपचैर्वाथ सेविते॥ ४५ :३३॥

विरुद्धवर्गद्वितयस्पृष्टे त्यागो विधीयते।
लक्षैकञ्च जपेद्यत्नात्तद्रूपं स्थापयेत्पुनः॥ ४५ :३४॥

तदा शुद्धिमवाप्नोति साधको दग्धकिल्बिषः।
अन्यथा नैव मुच्येत विविधैः कल्पसम्भवात्॥ ४५ :३५॥

एवं वै चाक्षसूत्रस्य प्रायश्चित्तं समाचरेत्।
प्रागुक्तलिङ्गपादेन शुद्धिं तत्र समादिशेत्॥ ४५ :३६॥

लिङ्गाष्टांशेन घण्टायामपराधेषु लिङ्गवत्।
प्रायश्चित्तं प्रदातव्यं गुरुणा तत्त्ववेदिना॥ ४५ :३७॥

ब्राह्मणादिचतुर्वर्णैः शिवदीक्षाविवर्ज्जितैः।
स्वेष्टलिङ्गं तु यत्स्पृष्टं प्रायश्चित्तं समादिशेत्॥ ४५ :३८॥ (f. 123v)

एकद्वित्रिश्चतुश्चान्ते द्विजाद्यैस्तु शतैः शुचिः।
कैवर्तवर्ग्गसंस्पृष्टे स्वेष्टलिङ्गे प्रमादतः॥ ४५ :३९॥

अयुताच्छुद्धिमाप्नोति साधका नान्यथा शुचिः।
स्पृष्टे काकादिवर्गैस्तु त्र्ययुताच्छुध्यते नरः॥ ४५ :४०॥

बाणायुतैश्च संशुद्धिर्दृष्टे तु स्वयमादिभिः।
चतुर्वर्गेण संस्पृष्टे दर्शनाद्द्विगुणाच्छुचिः॥ ४५ :४१॥

स्वस्रोतोदीक्षितैर्ल्लिङ्गं यदा स्पृष्टन्नदोषभाक्।
वामदक्षिणमार्गस्थैः स्पृष्टं लिङ्गं प्रमादतः॥ ४५ :४२॥

अयुताच्छुध्यते मन्त्री महास्नानेन नान्यथा।
वामदक्षिणकौलैश्च सम्पर्क्कम्परिवर्ज्जयेत्॥ ४५ :४३॥

शतेन स्पर्शतः शुद्धिर्भाषणाद्वै तदर्द्धतः।
पञ्चपातकयुक्तानां दर्शनं परिवर्ज्जयेत्॥ ४५ :४४॥

आलापादयुताच्छुद्धिर्द्विगुणात्स्पर्शतो मता। (f. 124r)

45:37 लिङ्गाष्टांशेन] *conj.*; लिङ्गांष्ताशेन C **45:44** °युक्तानां दर्शनं] *conj.*; °युक्तानाम्पर्शनं C

शयनात् त्र्ययुताच्छुद्धिर्भोजनाल्लक्षतः शुचिः॥ ४५ :४५॥

बौद्धचार्वाकसंस्पर्शाच्छिवनिन्दारतेषु च।
सच्छास्त्रदूषकानाञ्च पतितानाम्विशेषतः॥ ४५ :४६॥

सम्पर्कं यत्नतो वर्ज्यं संपर्काद्विशताच्छुचिः।
कौलकापालिकानान्तु स्पर्शन्तत्परिवर्ज्जयेत्॥ ४५ :४७॥

पाञ्चार्थकालवक्त्राणाम्विवादं नैव कारयेत्।
सम्भाषणन्तथा स्पर्शन्दूरतः परिवर्ज्जयेत्॥ ४५ :४८॥

तथा सांख्यमताचार्यैः सत्कार्यकृतबुद्धिभिः।
विवादो नैव कर्तव्यस्तद्वच्च पशुलौलुपैः॥ ४५ :४९॥

दिगम्बरैः श्वेतपटैर्द्दर्शनम्परिवर्ज्जयेत्।
तथा भागवतैः सार्द्धं वक्तव्यं परिवर्जयेत्॥ ४५ :५०॥

वर्ज्जितानान्तु मूढात्मा यः करोत्यथ सङ्गतिं। (f. 124v)
वृथा परिश्रमस्तस्य न स शिवपुरं व्रजेत्॥ ४५ :५१॥

न च द्वेषः प्रकर्तव्यो न विवादः कदाचन।
यः करोति स मूढात्माप्ययुताच्छुद्धिमाप्नुयात्॥ ४५ :५२॥

यत्र वै लक्षपादन्तु तत्र भूयोणुरोषणम्।
महास्नानन्तदर्द्धात्तु महापूजा तु पादतः॥ ४५ :५३।

पयोदधिघृतादीनां द्विसहस्रपलेन तु।
महास्नानं प्रकर्तव्यम्महात्रिफलसंयुतं॥ ४५ :५४॥

कक्कोलजातिपुन्नागश्रीफलानान्तथैव च।
महावर्त्तितद्वदेव शिवस्याग्रे प्रकल्पयेत्॥ ४५ :५५॥

रक्तवर्त्तियुता सा तु दिव्यगन्धसमन्विता।
महास्नानं समाख्यातं महापूजां तदर्द्धतः॥ ४५ :५६॥

उपवासद्वयङ्कार्यमयुते क्रियते सदा।
दशांशेन जपाद्धोमम्विंशत्यंशेन गड्डुकान्॥ ४५ :५७॥

45:55 तद्वदेव] *conj.*; तद्वाद C

सत्यम्व्रतं ब्रह्मचर्यम्भूशय्या नक्तभोजनं। (f. 125r)
तैलाभ्यङ्गः परित्यागः सत्यवाग्घविषान्नभुक्॥ ४५ :५८॥

कुर्वीत शास्त्रनिपुणो जपान्तं यावदेव हि।
प्रायश्चित्तमवाप्ते तु पञ्चगव्याशनं हितं॥ ४५ :५९॥

भूरत्नयानवस्त्राद्यैर्देशिकान्पूजयेत्क्रमात्।
प्रायश्चित्तं यदा कश्चित्कर्तुन्नो शक्नुयाद्यदि॥ ४५ :६०॥

प्रार्थ्यान्यांश्चैव कर्तव्यः यथोक्ताद्द्विगुणं पुनः।
न प्रार्थनैव कर्तव्या गुरुणा तत्र कोविदा॥ ४५ :६१॥

शिववत्पूजयेत्किंतु स्वगुरुं शिवशासने।
बालबालीशवृद्धानाम्भोगिनां व्याधितात्मनाम्॥ ४५ :६२॥

स्त्रीणान्तु कारुकाणान्तु प्रायश्चित्तन्न विद्यते।
यतो निर्बीजिका दीक्षा तेषु कार्या न चापरा॥ ४५ :६३॥

समयाचाररहिता दीक्षैव मोक्षदा मता।
निरपेक्षा तु सा दीक्षा सापेक्षा बीजसंयुता॥ ४५ :६४॥ (f. 125v)

शक्तानाञ्च समयार्थानां सबीजा देशिकेष्वपि।
स्त्रिया बलो द्वयौ भक्त्या लिङ्गार्च्चनरता सदा॥ ४५ :६५॥

व्यतिक्रमे समुत्पन्ने प्रायश्चित्तम्प्रदापयेत्।
प्रागुक्तात्पादतस्तेषां प्रायश्चित्तेन शोधनं॥ ४५ :६६॥

अशक्तितोऽन्यतः पूज्यं समयीपुत्रकादिभिः।
स्वस्रोतः संस्थितैः पूज्यन्नपूज्यम्वामदक्षिणैः॥ ४५ :६७॥

स्वगुरुर्न नियोक्तव्यः पूजाजप्यादिकर्मसु।
स्वगुरुः शिववत्पूज्यो भ्रातृव्या देशिकादयः॥ ४५ :६८॥

साधकास्तद्वदेवोक्ताः पुत्रका भ्रातृवन्मताः।
शिववत्समयस्थाश्च द्रष्टव्याः शिवमिच्छता॥ ४५ :६९॥

45:62 शिवशासने] *conj.*; शिवशाने C (unmetrical) **45:65** सबीजा] *conj.*; संबीजा C **45:68** पूजाजप्यादि°] *conj.*; पूजाप्यादि C (unmetrical)

शान्त्यादौ देशिका योज्याः प्रतिष्ठायां विशेषतः।
साधने च तथा योज्याः साधकास्तेष्वभावतः॥ ४५ :७०॥

स्वकीयपरकीये तु नियोज्याः सुशिवार्च्चने।
समयी पुत्रको वाथ नाश्नीयात्पूजनम्विना॥ ४५ :७१॥ (f. 126r)

अतश्च परतो देवः संपूज्यः सूतके सति।
गृहिणा सह संयोगी सूतकी तेन नान्यथा॥ ४५ :७२॥

परकीये वशेद्दूरे तदा योज्यस्तु पूजने।
सूतकान्नादि जग्ध्वा तन्न प्रमाणेन सूतकी॥ ४५ :७३॥

अन्तर्यागम्प्रकर्तव्यं सूतकेनान्यथाशुचिः।
प्रणामस्तोत्रगीतैश्च स्तोतव्यः परमेश्वरः॥ ४५ :७४॥

शिखाच्छेदे कृते शक्तौ पूर्णाहुत्याह योजने।
षडध्वरप्रमाणाच्च चारेण षोढाविततिकैः॥ ४५ :७५॥

---म्मि मन्त्रनाथेन षोढा तत्त्वे जितेन तु।
सूतकं मृतकं तेषां न कल्प्यं शिवपूजनं॥ ४५ :७६॥

पूजाकाले तु देवस्य विप्रुषाङ्गे पतन्ति ये।
प्रायश्चित्तं तदा कार्यं यथानुक्रमयोगतः॥ ४५ :७७॥

आपादजानुपर्यन्तं सद्योजातन्तु सप्तधा। (f. 126v)
संस्मरेद्विधिवत्मन्त्री शुध्यते नान्यथा क्वचित्॥ ४५ :७८॥

जानुनी गुह्यपर्यन्तं विप्रुषोऽङ्गेषु संस्मरेत्।
त्रिसप्तवारान्धामन्तु कलामन्त्रं न चापरं॥ ४५ :७९॥

आगुह्याद्धृदयान्तन्तु बहुरूपन्तथा स्मरेत्।
हृदयात्मस्तकान्तन्तु सिक्तश्चेत्स्नानमाचरेत्॥ ४५ :८०॥

ईशानस्य शतं जाप्यं शुद्धिं याति न चान्यथा।
अकामाद्भौतिको यस्तु कुर्यान्निर्माल्यलंघनं॥ ४५ :८१॥

तस्यायुतेन शुद्धिः स्याच्छेषेषु त्रिषु पूर्ववत्।

45:75 °प्रमाणाच्च] *conj.*; °प्रमाणाच C

देवचण्डगुरुद्रव्यं भक्षितं यद्यकामतः॥ ४५ :८२॥

भौतिको लक्षजापेन शुचिः शेषास्तु पूर्ववत्।
यन्निर्माल्येन संस्पृष्टं तद्भुज्यात्पुरुषेण वा॥ ४५ :८३॥

पादोना तु प्रमादाच्च प्रायश्चित्ती भवेन्नरः। (f. 127r)
प्रमादे भक्षणे तुल्यं उपेक्षायान्तदर्द्धतः॥ ४५ :८४॥

गुरुदेवद्विजातीनान्द्रव्यं यत्नेन रक्षयेत्।
अद्वैतं पूजयेद्यस्तु द्वैतलिङ्गे प्रमादतः॥ ४५ :८५॥

अकामाल्लक्षजापात्तु त्रितयेष्वपि पूर्ववत्।
एवं वै द्वैतमन्त्रन्तु निराचारे विवर्ज्जयेत्॥ ४५ :८६॥

अविसर्ज्जितपात्रे तु सङ्गे वाथ विवर्ज्जिते।
शतद्वयात्सहस्राद्धात्तदर्द्धात्क्रमतः शुचिः॥ ४५ :८७॥

द्विगुणं स्थण्डिले प्राहुस्तत्कालेऽग्नौ हुताशने।
अविसर्ज्जितपात्रे तु प्रायश्चित्तं विनिर्दिशेत्॥ ४५ :८८॥

शिवाग्निं धारयेद्यत्नात्प्रशान्तश्चेत्प्रमादतः।
अघोरस्यायुतं जाप्यन्तदा शुद्धिर्न चान्यथा॥ ४५ :८९॥

सेश्वरे द्विगुणो जाप्यः कर्तव्यस्तु विशेषतः।
कीटामिषादिनैवेद्ये दर्शनाच्छततः शुचिः॥ ४५ :९०॥ (f. 127v)

प्रमादामिषदानेन बहुरूपायुताच्छुचिः।
शतं प्राण्यङ्गधूपे तु पञ्चमं परिवर्तयेत्॥ ४५ :९१॥

पात्राभिघाते द्विशतं जप्तव्यन्दक्षिणस्य तु।
त्रिपञ्चसप्तदशभिराचार्यैस्तन्त्रपारगैः॥ ४५ :९२॥

स्वशास्त्रनियताभ्यासैः प्रायश्चित्तं प्रदापयेत्।
न मूर्खैर्दीर्घसूत्रैर्वा नास्तिकैर्वाथ हेतुकैः॥ ४५ :९३॥

यथा शास्त्रोपदिष्टन्तु न न्यूनन्नाधिकङ्क्वचित्।
न्यूनाधिकप्रदानेन देशिको नरकं व्रजेत्॥ ४५ :९४॥

45:83 पूर्ववत्] *conj.*; पूर्वत् C (unmetrical)

तस्मात्सर्वप्रयत्नेन यथोक्तन्तु समाचरेत्॥ ४५ :९५॥

॥ इति वाथुले महातन्त्रे प्रायश्चित्तपटलं समाप्तं॥

प्रायश्चित्त्युक्तिक्रमेणास्ति समुच्चयमन्यैः सद्भिरुदीरितं।
शास्त्रेभ्यः संगृह्य मयापि तथैवोक्तं किन्तु सारं समासतः॥ (f. 128r)

साराः समुच्चयाः सद्भिः संस्कृताः सन्त्यनेकशः।
कृतेषु चेत्कृतिस्तेषामस्माकञ्च तथाकृतिः॥

मत्तमयूरवंशजे श्रीरणिपद्रलम्बकर्ण इति नाम प्रथितः पृथिव्यां मुनिः।

निखिलशैवसिद्धान्तश्रोत्रसंस्कारपावनः।
चन्द्राङ्कितजटाजूटः कैलासस्थेव शङ्करः॥

श्रीरणिपद्रकाश्रमाद्गोराटिकमठेऽगमत्।
धारायां सीयकमिति अनुजग्राह पार्थिवः॥

आसीत्तत्सन्ततौ मुनिः श्री-ईश्वरशिव इति।
जगतीपतिभिर्नृपैः पूजितपादपंकजः॥

तच्छिष्यो निखिलागमार्थविमलादर्शो मुनिः।
श्रीहृदयशिव इति विद्येश्वरतुल्यकीर्तिः॥

यस्योच्छ्रितो दिक्षु तपःप्रभावो उदीर्यते साधुजनैर्ज्जगत्यां। (f. 128v)
हेलाद्दुद्धृतागमशास्त्रसारः समटित्याखण्डितवादकण्डूः।
तेनेदं विरचितमनेकसङ्ग्रामसंघट्टकोटिनिहिताखिलद्विषि॥

॥ प्रायश्चित्तसमुच्चयं समाप्तमिति॥

ग्रन्थसंख्या श्लो–२०००, सम्वत् २७८ भाद्रपदमासे श्रीमच्छ्रीनेपालाभ्यन्तरे श्रीभक्तपुरे
श्री-आनन्ददेवस्य राज्ये भट्टपण्डिताचार्य श्री-उदयसोमसर्म्माख्यस्य
सर्वसत्वोपकारकामस्येदं प्रायश्चित्तसमुच्चयपुस्तकं
कुलपुत्रश्रीराज्यपालशीलेन लिखितमिति॥ सर्वे शिवभक्ता भवन्तु लोकाः॥
ओं नमः शिवाय॥

COMBINED PĀDA-INDEX

In the following index of *pāda*s, those marked with a single number belong to Trilocanaśiva's text, while those marked with two numbers separated by a colon belong to Hṛdayaśiva's. *Pāda*s that appear identically in both texts are of course marked with both types of numbering, with the *pāda*-number of Trilocanaśiva's text being placed first. The clumsy and often unmetrical verses of Hṛdayaśiva's conclusion (after 45:95) have not been included.

अकामतः प्रकाशे च 14:7a
अकामतः प्रकाशे चेत् 371a
अकामतः प्रकाशे तु 31:18c
अकामतः प्रमादाच्च 44:15a
अकामतः प्रसुप्तस्य 454c, 44:111a
अकामतः रहस्ये च 44:38c
अकामतः समाख्यातं 44:25c
अकामतस्त्रिरात्रं स्यात् 278c
अकामतो जपेच्चैव 62c
अकामतो यदा लिङ्गं 114c
अकामतो यदा स्पृष्टा 31:71c
अकामतो यदा स्पृष्ट्वा 482a
अकामतो रहस्ये च 3:6a, 44:37c
अकामतोऽथवा कामात् 17:123c
अकामतोऽपि सम्राडात् 22:5c
अकामाच्च शतं जपेत् 31:28b, 37:19b
अकामाच्च सहस्रं तु 153c
अकामाच्च सुरां पीत्वा 21:14a
अकामाच्चण्डद्रव्ये तु 40:5a
अकामाच्छतमेकन्तु 33:32a
अकामाच्छुध्यते उमे 33:58b
अकामात् कामतो भुक्त्वा 204c
अकामात् मृतकान्नं वा 17:97c
अकामात् स शतं जपेत् 461b
अकामात्कामतो ज्ञात्वा 33:19a
अकामात्कामतो देवि 37:37a
अकामात्कामतो प्येवं 17:154a
अकामात्कामतो बुद्ध्वा 13:22c
अकामात्कामतो वाथ 37:10c
अकामात्कामतो वापि 3:11c, 14:14a, 35:16a, 37:7c
अकामात्कामतो वाप्येवं 33:24a
अकामात्कामतोऽपि वा 36:6b, 40:11b
अकामात्कामे कृते सति 15:1b
अकामात्कीर्तिता तव 14:12d
अकामात्तु जपेद्वने 14:4d
अकामात्तु तदर्धकम् 58b, 431d
अकामात्तु तदर्धतः 44:104b
अकामात्तु शतं जपेत् 56b, 34:31d
अकामात्तु शतं जाप्यं 18:55a

अकामात्त्रिशतं जप्त्वा 31:20c
अकामात्त्रिशतङ्ग्रामात् 14:17c
अकामात्परमेश्वरि 37:37d
अकामात्पादतः शुचिः 44:116
अकामात्पादहीनन्तु 17:143a, 33:13c, 33:41c
अकामात्ब्राह्मणं हत्वा 21:13c
अकामात्सप्तलक्षाणि 33:6c
अकामात्सहस्रं जपेत् 17:160d, 33:30d
अकामादयुतं जाप्यं 17:159c, 33:29c
अकामादयुतं प्रोक्तं 192a
अकामादयुतञ्जपेत् 34:42d
अकामादयुतद्वयम् 40:3d
अकामादर्द्धतः शुचिः 37:20
अकामादि चतुर्ष्वेवतत् 373a
अकामादुपवसेदहः 246b
अकामादुपविष्टस्तु 33:66a
अकामाद्गोघ्नजा यस्मिन् 15:2a
अकामाद्घातयेत्कंश्चित् 37:31a
अकामाद्द्विगुणं कामात् 239c, 43:38a
अकामाद्द्विशतं घोरं 33:50c
अकामाद्द्विशतं घोरं 35a
अकामाद्धन्ति वा कोऽपि 34:13c
अकामाद्बहुयोगाच्च 44:54c
अकामाद्बहुसंयोगः 483a, 15:6c
अकामाद्ब्राह्मणं हत्वा 3:2c, 17:1a
अकामाद्भक्षणं यदि 248b
अकामाद्भूतसंख्यया 35:2d
अकामाद्भौतिको यस्तु 45:81c
अकामाद्यच्छताच्छुद्धिः 33:53a
अकामाद्रेतसोत्सर्गे 31:50a
अकामाद्रोहणं कृत्वा 149a,17:157a, 18:44c, 33:27a
अकामाद्वरवर्णिनि 40:1b
अकामाद्वह्निद्रव्ये तु 40:4a
अकामाद्वा रहस्ये च 14:6a, 31:17c
अकामाद्वाथ संयोगः 31:72c
अकामाद्विजने वने 31:16b
अकामाद्विनिहत्य च 17:16b
अकामाद्विशतं घोरं 34:50c
अकामार्धं विधीयते 33:18b
अकामाल्लक्षजापात्तु 45:86a
अकामाल्लक्षसंख्यया 35:9b
अकामाल्लङ्घिता छाया 33:47c
अकामाल्लिङ्गभेदे तु 32:27c
अकामाल्लिङ्गभेदेन 18:63c
अकामेऽर्द्धं विधीयते 17:146b
अकामेन सुराधिप 40:7b
अकामाच्चैव संच्छेद 27:3c
अकारादिहकारान्तैः 35:6c
अकार्याभिनिवेशश्च 446c
अकृतानां विनष्टानां 5c
अकृत्वा वा कथन्तस्य 37:17a
अक्रोधो गुरुशुश्रूषा 87a, 31:98c
अक्षमाद्द्विगुणोऽन्यतः 43:91d, 44:28b
अक्षमालां कराङ्गुष्टां 129c, 9:13a
अक्षमालां परित्यजेत् 9:15d
अक्षमालाविभूषितम् 34:14d
अक्षसूत्रापराधे तु 127c, 43:18c
अक्षसूत्रेऽन्त्यजस्पृष्टे 130c
अक्षालितकटीवस्त्रम् 19:30a
अक्षिणी नाशिका कर्णौ 11:13c
अक्षोभ्याणामपां नास्ति 756c

अगम्यागमनं कृत्वा 471a, 17:5a, 17:63c, 23:23c, 30:6a, 39:3a
अगम्यागमने चैव 22:14a
अगम्यागमने द्विभिः 38:1d
अग्निकार्यन्ततः कृत्वा 17:86a
अग्निकार्यन्न कुर्वन्ति 34:48a
अग्निकार्यार्चनं जपम् 449b
अग्निकार्यार्चनञ्जपः 30:20d
अग्निकुण्डे तु होतव्यं 190c, 18:58a, 32:18a
अग्निक्रिया वने वासः 1:13a
अग्निदं गरदञ्चैव 21:20a
अग्निना शुद्धिमेति हि 684b
अग्निना शुद्धिमेव हि 7:60b
अग्निवर्णामयः स्त्रियम् 33:4d
अग्निवारिभये तद्वत् 28c, 44:4a
अग्निस्पर्शात् घृताशनात् 596d
अग्निहोत्रगृहं च किम् 4:1d
अग्निहोत्रगृहं त्वत्र 360c
अग्निहोत्रगृहं ब्रह्मन् 359c, 6:6c
अग्निहोत्रगृहे ब्रह्मन् 6:7c
अग्नेः संस्कारतः शुद्धिः 8:5c
अग्नेरपाञ्च संयोगात् 11:30c
अग्नौ प्रक्षाल्य गृह्णीयात् 711c
अग्नौ शुद्धिस्तदा तेषां 34:39a
अग्रमण्डपबाह्ये तु 588a
अघोरः कर्णिकामध्ये 7:22c
अघोरः पद्ममध्यस्थः 357a, 6:4c
अघोरः प्रथमस्तत्र 6:3a
अघोरं क्रोधकर्मणि 30:11d
अघोरं जपते यस्तु 17:81a
अघोरं त्रिशतं जपेत् 31:31b
अघोरं द्विशतं मन्त्री 151c, 33:54c
अघोरं सततं जप्त्वा 494c, 17:78a
अघोरं सर्वदाभ्यसेत् 813b
अघोरजपसाहस्रं 605a
अघोरञ्च जपेद्देवि 30:14c
अघोरञ्चायुतं जपेत् 44:107d
अघोरमन्त्रो जप्तव्यो 496c, 44:125c
अघोरलक्षतो वापि 428c
अघोरस्य तदा शुचिः 33:69b
अघोरस्य न चान्यस्य 14:19c
अघोरस्य भवेच्छुचिः 157d, 18:51d
अघोरस्य शतं कामात् 58a
अघोरस्य शतं जपेत् 31:53b
अघोरस्य शतान्पञ्च 33:60a
अघोरस्यायुतं कामात् 56a
अघोरस्यायुतं जपेत् 18:55d
अघोरस्यायुतं जाप्यं 44:95c, 45:89c
अघोरस्यायुतञ्जप्त्वा 44:87c
अघोरस्यायुताच्छुचिः 287b, 43:31b, 44:61b
अघोरस्यायुतैर्बाणैः 105c
अघोरहृदयास्सर्व्वे 7:36a
अघोरात्कृच्छ्रतस्ततः 44:47d
अघोरादपरो नास्ति 116c
अघोरान्नापरो मन्त्रः 811c, 812a, 812c
अघोरार्पितचेतस्को 814a
अघोराल्लक्षतः शुचिः 44:112d
अघोराष्टशतं जपेत् 187b
अघोराष्टशतं जप्त्वा 17:73a, 17:80c
अघोराष्टशतं जाप्यं 43:80c
अघोराष्टशतञ्जपेत् 31:61b
अघोराष्टसहस्रं च 389a

अघोराष्टसहस्रन्तु 17:12c
अघोरेण चरेत् मन्त्री 17:158a, 33:28a
अघोरेण चरेद्व्रतम् 10:39d
अघोरेण चरेन्मन्त्री 18:45c, 33:48a
अघोरेण जपस्य तु 33:4b
अघोरेण जपेच्छुचिः 17:151d
अघोरेण न चान्यथा 45:20d
अघोरेण प्रदातव्यं 33:39c
अघोरेण प्रवक्ष्यामि 17:72a
अघोरेण विशुध्यति 18:47d, 18:49b, 33:34b, 33:66d
अघोरेण शतं जपेत् 33b
अघोरेण शिवालयम् 17:83d
अघोरेणैव शुध्यति 39:5b
अघोरो घोरहा सर्वं 24:24c
अघोरो हरते घोरं 33:35c
अंगमात्रोदके विश्य 17:5c
अङ्गस्यासंयमनाद्वापि 19:6a
अङ्गारतुषकेशास्थि 740c
अचीर्णे बन्धनम्भवेत् 33:36d
अच्छिद्रं तादृशं पुनः 17:19d
अच्छिन्नाग्रं च यद्वस्त्रं 765a
अजं जग्ध्वा भवेच्छुद्धिः 27:9c
अजश्च त्रिशतं मोहात् 14:20c
अजा गावो महिष्यश्च 537c, 754c
अजातमूर्तयस्सर्वे 7:36c
अजातस्य शतं जपेत् 40b, 43:8b
अजातस्य शतं जाप्यं 431c, 44:104a
अजातोऽधिपतिर्ज्ञेयः 305c, 26:6c
अजादिपशुघातने 434d, 44:106b
अजादीनान्तदर्द्धकम् 24:28d
अज्ञातगोघ्ना यस्मिन् 44:49c
अज्ञातजातिभिः पङ्क्तौ 226a
अज्ञात्वा भक्षितं येन 44:62c
अज्ञात्वा शास्त्रसद्भावं 178c, 34:43a
अज्ञानतोऽर्चने तस्य 533c
अज्ञानाज्ज्ञानतो वापि 24:33c
अज्ञानात् त्रियहं भवेत् 263d
अज्ञानात्सङ्गतिं कृत्वा 43:13a
अज्ञानादग्निसंख्यया 35:7d
अज्ञानादाचरेद्वापि 24:1a
अज्ञानादुपवासः स्यात् 598c
अज्ञानाद्ब्राह्मणं हत्वा 23:15c
अज्ञानान्मोहवासनात् 18:64d, 32:31d
अण्डजं चोर्णजं वस्त्रं 3:7c
अतः परं प्रवक्ष्यामि 17:133c
अतश्च परतः शक्र 43:75c
अतश्च परतो देवः 45:72a
अतस्तमभ्यसेदादौ 10:26c
अतिकृच्छ्रः समाख्यातः 781c, 15:14c
अतिकृच्छ्रं पराकं च 15:10c
अतिकृच्छ्रं शृणुष्वतः 44:43d
अतिकृच्छ्रं समाख्यातं 31:79a, 44:45a
अतिकृच्छ्रमतः शृणु 31:78b
अतिकृच्छ्रमुदाहृतम् 44:44d
अतिकृच्छ्रविधानं ते 784a
अतिकृच्छ्रविधानन्तु 30:5c
अतिकृच्छ्रे हृदं जपेत् 797b
अतिकृच्छ्रेण शुध्यति 30:3d
अतीतेऽब्देऽपि कर्तव्यं 591c
अतीवाप्यपराधिनीम् 36:8b
अतुल्याशौचयोर्दीर्घ॰ 569c
अतैलः सत्यवादी स्यात् 16c
अतो बीजात्मका मन्त्रा 828c

अतोर्द्धञ्च विसर्ज्जनम् 17:133b
अतोर्ध्वं पूर्ववच्छुद्धिः 43:72c
अत्यन्तसरुजे देहे 28a, 44:3c
अत्यन्तोपहता यास्तु 9:17c
अत्यन्तोपहतानान्तु 11:34c
अत्र नास्ति विचारणा 17:52b, 21:16b
अत्रापि त्रिशतं जप्त्वा 13:21a
अत्रापि लक्षमेकन्तु 34:29c
अथ कश्चित्प्रमादेन 38:8c
अथ कश्चिद्द्विषेद्विप्रं 17:93c
अथ चैषां गुरोरस्य 692c
अथ पापविशुद्ध्यर्थं 1:3a, 11:1a
अथ वृद्धातुरबाला 18:29c
अथ वृद्धातुरा बाला 33:76a
अथवा गुरुभाषितम् 13:23b, 14:24d, 31:106d, 33:71d
अथवा चैव सर्वेषां 30:14a
अथवा दशलक्षाणि 33:5c
अथवा पुष्पताम्बूल 32:43c
अथवा भोजनं कार्यं 32:31a
अथवा लक्षणैर्युक्तं 10:16a
अथवा शिवनिर्माल्यं 40:2c
अथवा सर्वदोषाणां 33:70c
अथाक्रम्य सुनिर्माल्यं 43:82c
अथाचार्यव्रतं श्रेष्ठं 10:1a
अथातः संप्रवक्ष्यामि 25:1a
अथाविसर्जिते पात्रे 65c
अथोच्छिष्टो यथा मन्त्री 289c
अदत्ते दर्पणे छत्रे 57c
अदत्वा च बलिं तत्र 11:63a
अदत्वा चलितन्तत्र 31:25a
अदीक्षितस्य संस्पर्शात् 1:39c
अदीक्षिताः सपिण्डान्स्वान् 618c
अदीक्षितेन संस्पृष्टः 22:3a
अदीक्षितेनाक्षमाला 9:16a
अदुष्टं धौतमद्भिश्च 694c
अदुष्टमद्भिर्न्निर्णिक्तं 8:8a
अदूरादभिघाते च 53a
अदूरादयुतेनैव 45:23a
अदृष्टं धौतमद्भिस्तु 19:16c
अद्भिः पत्रैर्मूलपुष्पैः 661a
अद्भिः पात्रं विशुद्ध्यति 11:29b
अद्भिः शौचं विधीयते 713d
अद्भिः संशुध्यते गात्रं 43:81a
अद्भिस्तु प्रोक्षणं शौचं 713a
अद्वैतं पूजयेद्यस्तु 45:85c
अद्वैतेऽपि यथालोके 13:5a
अधमाङ्गे विशुद्ध्यति 647b, 9:8d
अधमो मध्यमे द्विकम् 24:17b
अधमोत्तममध्यमः 24:16d
अधःशयनसङ्कल्पे 44:89c
अधिक्षेपं तपस्विनाम् 21:7b
अधिक्षेपं ददेत्तस्य 37:14c
अधिक्षेपम्महेशानि 37:23c
अधीनत्वममर्यादां 1:33c
अधुना सम्प्रवक्ष्यामि 17:84c
अनड्वाहं गजाश्वादि 14:16a
अनड्वाहं गृहीत्वा तु 3:10c
अनड्वाहं हयं स्त्रीं च 491a
अनधीकारलक्षणम् 540b
अनध्याये पठंच्छास्त्रं 38:10c
अनध्याये पठेच्छास्त्रं 185c
अनध्यायो दिनानि तु 31:83d
अननुज्ञातमन्त्रस्तु 10:42a

अनन्तविजये ततः 10:7b
अनस्थिप्राणिसंघातं 11:65a, 17:74c, 31:64a
अनस्थिप्राणिसंघाते 431a
अनस्थीनि बहून्यपि 432b, 17:26b
अनाचान्तः पिबेत्तोयं 258a, 43:45c
अनाघ्रातशिवे मन्त्री 28:3c
अनाथस्य च कुर्वतः 596b
अनालोकादिलक्षणम् 539d
अनाहिताग्नितापण्य 420a
अनाहिताग्नेर्मरणे 572a
अनिबद्धप्रलापित्वं 447a
अनिवर्तितम्भवेद्भिक्षां 43:24a
अनिवेद्य तु भुञ्जानः 11:64a
अनिवेद्य यदा भुङ्क्ते 31:25c
अनिषिद्धः प्रतिग्रहः 539b
अनुगम्य च तद्वाक्यं 630a
अनुगम्याम्भसि स्नात्वा 618a
अनुगम्येच्छया प्रेतं 599a
अनुग्रहशिवः प्राच्यां 352a, 5:6c
अनुग्रहशिवः प्रोक्तः 5:9c
अनुग्रहाधिकाराय 13c, 24:37a
अनुच्चार्यन्तदा तस्य 18:69c
अनुज्ञां प्रार्थयित्वा तु 34:16a
अनुतापाद्भवेत् प्रिये 159b, 18:53b
अनुदङ्मूत्रकरणे 649c
अनुद्धूल्य बहिर्व्रजेत् 38b
अनुरोधात्तथा भुक्त्वा 19:7a
अनुषङ्गप्रविष्टं यत् 211c
अनुष्ठानपरायणः 37:20b
अनुष्ठानविहीनानां 43:64a
अनूढानां मृतौ स्त्रीणां 544c
अनृतं यस्तु भाषते 17:95d
अनृतं योऽनुवर्तते 17:66d
°अनृतं योऽभिभाषते 444d
अनृतस्य श्रुतिं स्पृशेत् 664b
अनेन क्रमयोगेन 44:44c
अनेन विधिना ब्रह्मन् 17:50a
अन्तः सन्तापसंयुक्तः 394a
अन्तःकृत्वा भुजौ सम्यग् 11:15c
अन्तरा तत्पादहान्या 636c
अन्तरालानि सर्वाणि 635a
अन्तर्दशाहगोक्षीरं 244a
अन्तर्दशाहे जातस्य 547a
अन्तर्धाय तृणैर्महीम् 11:4d
अन्तर्न्यासो व्यवस्थितः 7:34b
अन्तर्न्यासोऽप्यभेदेन 7:33c
अन्तर्यागः प्रकर्तव्यः 531c, 43:78c, 44:121a
अन्तर्यागम्प्रकर्तव्यं 45:74a
अन्तर्यागम्विना तथा 44:93b
अन्तर्यागोऽथवा ध्यानं 501c
अन्तर्वस्त्राद्बहिर्वासः 764c
अन्तस्थशवदूषिते 744d
अन्ते शुद्ध्यति दीक्षया 373d
अन्त्यजं पञ्चलक्षाणि 24:27a
अन्त्यजानां गवां चैव 24:21c
अन्त्यजानां तु सर्वेषां 288c, 31:108a
अन्त्यानां भाजने भुक्त्वा 267c
अन्नं काकादिभिर्जुष्टं 12:6c
अन्नं तच्छुचितामियात् 735b
अन्नं तन्न विवर्जयेत् 733d
अन्नं पुष्पवतीस्पृष्टं 19:33c
अन्नं भुक्त्वा तु छर्दयेत् 276d

अन्नं भुक्त्वा त्वकामतः 262b, 264b
अन्नं रजस्वलास्पृष्टं 17:89c
अन्नं स्याद्दीक्षितेन तु 2:1b
अन्नदोषं विधाय तु 7:61d
अन्नदोषाद्विमुच्यते 17:15d, 23:9d
अन्नपानाद्यमौषधम् 11:63d
अन्नपुष्पादिजान्हत्वा 432a
अन्नप्राशनकाले तु 44:83c
अन्नमद्यात्प्रमादतः 301b
अन्नमद्यादयाचितम् 795d
अन्नमद्यादशंकितः 7:14b
अन्नम्भुंक्ते तु यः क्वचित् 24:10b
अन्नसङ्करदोषाच्च 44:102a
अन्नस्याद्भिश्च प्रोक्षणात् 11:38d
अन्नस्याद्भिस्तथोक्षणात् 698b
अन्नादिपुष्पजां हत्वा 17:26a
अन्नादिलेपनिर्मुक्तं 43:52a
अन्नाद्यं मदिरास्पृष्टं 234a, 43:32c
अन्यच्च श्रुणु कस्यापि 34:13a
अन्यच्छुध्यन्तरं वक्ष्ये 43:56a
अन्यतोऽन्नं निधाय च 685d
अन्यत्र वासतोऽस्पृष्टि 542c
अन्यथा तु निरोधकृत् 17:165b
अन्यथा न भवेत् मोक्षः 18:8a
अन्यथा नरकं याति 18:36c
अन्यथा नरकं व्रजेत् 37:15d
अन्यथा नाशनं त्र्यहम् 518d
अन्यथा नित्यहानिः स्यात् 610c
अन्यथा निश्चिता स्थितिः 43:79b
अन्यथा नैव मुच्येत 45:35c
अन्यथा नैव शुद्ध्यति 483d, 15:7b, 31:73b, 37:24d
अन्यथा पतनं ध्रुवम् 457d
अन्यथा पतनं प्रोक्तं 1:17a
अन्यथा पतनं भवेत् 16:17b, 31:107b
अन्यथा भ्रूणहा भवेत् 462b
अन्यथा मुच्यते नैव 1:43c
अन्यथा योऽनुवर्तते 493d, 17:76d
अन्यथा सङ्करो भवेत् 37:9b
अन्यथा सिध्यते नैव 1:5a
अन्यथादहने चैव 17:173a
अन्यथायोगयकास्तत्त्वं 630c
अन्यद्गुर्व्वन्तरं व्रजेत् 18:33b
अन्यद्वा चौर्यसम्भवम् 24:31b, 27:11b
अन्यद्वा यत्कृतं पापं 24:4a, 27:13c
अन्यन्न कथितञ्च यत् 24:24b
अन्यभाण्डस्थिता ह्येते 736a
अन्यमन्त्रजपाच्छुद्धिः 9:17a
अन्यलिङ्गं तथा द्यूतं 1:38a
अन्यव्रतधरैः सार्द्धं 38:8a
अन्यांश्च मानुषान्हत्वा 18:60a, 32:24a
अन्यायान्मुनिपुङ्गव 22:16d
अन्यायेन गृहीतस्य 693c
अन्येषां च न पैशुन्यं 1:25a
अन्येषां तदनादेयं 628c
अन्येषां लिङ्गिनां चैव 312c, 7:28c
अन्येषां लिङ्गिनामपि 309d
अन्येषां लिङ्गिनामिह 7:25d
अन्येषां स्वोक्तमिष्यते 581d
अन्यैरपि हि कर्त्तव्यं 18:28c
अन्यैर्वा पातकैर्युक्तो 17:99c
अन्यैर्वाथ प्रकर्तव्यं 33:75a
अपरं तद्विना हितम् 45:4b
अपराधसहस्रेऽपि 33:65a

अपराधसहस्रेण 377a
अपराधिविधौ ज्ञेयः 45:7a
अपराधिविशोधकम् 45:5d
अपराधेषु लिङ्गवत् 45:37b
अपरेऽह्नि संहृत्य 17:169c
अपरैरनुलोमजैः 226d
अपवादाद्गुरोर्वाचः 21:12a, 22:23c
अपसव्यं यदाचामेत् 38a
अपसव्यमकृत्वा वा 30c
अपाङ्क्तेयैस्तथाङ्गेयैः 226c
अपाशक्रियमाणस्तु 35:9c
अपाशे क्रियमाणे तु 35:10a
अपास्तावरणैः सार्द्धं 36:7a
अपि घर्षणलेपनात् 742d
अपि देवे विसर्जिते 213d
अपि स्नानेन शोधिताः 594d
अपेयानां च भक्षणे 269b
अप्रत्ययेन यो भुङ्क्ते 261c
अप्रबुद्धस्य दातव्यं 17:36a
अप्रमादश्च पञ्चैते 87c
अप्रमादस्तु पञ्चैते 31:99a
अप्रमादाच्छतं हुनेत् 29:2b
अप्रशस्तं समूहिन्याः 761c
अप्रशस्तश्च तद्रात्रौ 9:12c
अप्रसुप्ते जनार्दने 91d, 43:2b
अप्रायत्ये समुत्पन्ने 518a
अप्रेक्षणादिकाशौचं 542a
अप्सु प्राणाहुतिष्वपि 659b
अब्दमेकं व्रते स्थित्वा 37:15a
अब्दादूर्ध्वं तु संपर्के 404c
अब्दार्धमब्दमेकं वा 401a
अभक्षभक्षणं कृत्वा 38:1a
अभक्ष्यं भक्षयेद्यदि 246d
अभक्ष्यं यदि भक्षयेत् 17:62d
अभक्ष्यभक्षणं कृत्वा 17:13a, 23:19a
अभक्ष्यभक्षणं जैह्म्यं 409c
अभक्ष्यभक्षणं हिंसा 448a
अभक्ष्यभक्षणान्नाद्वा 31:33c
अभक्ष्यभक्षणे जाते 14:17a
अभक्ष्यभक्षणे त्रिंशद् 17:88a
अभक्ष्यभक्षणे साङ्गं 22:13a
अभक्ष्यभक्षणेप्येवं 17:54a
अभक्ष्याच्चान्नपानाद्वा 21:22c
अभक्ष्याणामभोज्यानां 269a
अभावात्प्राङ्मुखं स्मृतम् 10:17b
अभावे तु गुरोः शिष्यं 627c
अभावे वा कृते वाथ 18:8c
अभिघाताच्छुचिर्भवेत् 45:23b
अभिघाते तु संजाते 45:22c
अभिन्नं भेदतश्चैव 7:18a
अभिशस्तादिभिस्पृष्टः 24:38a
अभिषिच्याथवा भुक्त्वा 505a
अभिषिञ्चेत्समन्ततः 11:59b
अभिषिञ्च्यात्मनात्मानम् 10:7a
अभिषेकन्ततः पुनः 11:57d
अभिषेकेण शुद्धिः स्यात् 518c
अभिषेकेण संयुताः 583b
अभोज्यं जपितेष्वपि 32:43b
अभोज्यभोजनङ्कृत्वा 39:2a
अभोज्यमन्ययोरन्नं 308c, 2:12a, 42:11a
अभोज्यम्भक्षयेद्यदि 17:97d
अभोज्याः शिवनैष्ठिकः 20:3b
अभोज्या सा तु शिष्यस्य 34:29a

अभोज्यान्नाः प्रकीर्तिताः 769d
अभोज्यास्ते प्रकीर्तिताः 313b, 7:29b
अभोज्याहारदूषितः 11:72d
अभ्यङ्गपानवस्त्रादौ 44:88c
अभ्यङ्गादौ हृदयं शतम् 50d
अभ्यङ्गोद्वर्तनं पर्वे 1:21a
अभ्यसेन्मन्त्रसंहिताम् 10:1d
अभ्यासे द्विगुणं भवेत् 267b
अमद्यपाः कुलीनाश्च 43:65c
अमद्यपाश्च ये शूद्राः 2:10c, 42:9c
अमन्योपोषितस्त्र्यहम् 10:46d
अमेध्यभूगतां वापि 9:15c
अमेध्यभूस्था ये वृक्षाः 768a
अमेध्याद्भवं मांसं 240c, 43:39a
अमेध्याद्दशगुणं मांसं 30:1c
अमेध्यानि स्वकीयानि 663c
अमेध्योपगते देहे 645c
अमेध्योपहतं देहं 9:7a
अमेध्योपहतानान्तु 8:3c
अम्भसाल्पीयसा कार्यं 11:37a
अम्भसाल्पीयसां कार्यं 703c
अम्लेन ताम्रपात्रस्य 22:8a
अम्लेन भस्मना चाद्भिः 673c
अयनेषु च पर्व्वसु 19:31b
अयाचितं तु षड्रात्रं 785a
अयाचितत्रयं कृत्वा 17:142c, 33:12a
अयाचितान्नो लघ्वाशी 44:71c
अयाचितैः स्थितिं कुर्यात् 43:27c
अयाज्यानां च याजनम् 422d
अयुतं च जपेद्द्वयम् 17:155b
अयुतं प्रतिसङ्क्रे 17:136c
अयुतं भोजनेषु च 30:12b
अयुतं मासिके भुक्त्वा 328c
अयुतं रूपिणो जप्त्वा 83a, 43:21a
अयुतजापादग्निहोमात् 38:10a
अयुतञ्च जपेद्द्वयम् 18:17d
अयुतन्त्रिचतुर्लुठिते 43:15a
अयुतस्य जपाच्छुचिः 17:149b
अयुताच्छुद्धिमाप्नुयात् 45:52d
अयुताच्छुद्धिमाप्नोति 45:40a
अयुताच्छुध्यते मन्त्री 109c, 45:43a
अयुतानि दशैकैकं 10:27a
अयुतार्द्धेन शुध्यति 37:36b
अयुते क्रियते सदा 45:57b
अयुते चायुते सदा 15b
अयुतैः पञ्चभिः शुचिः 35:13b
अयुतैकं जपेच्छुचिः 33:21d
अयुतैकं जपेद्धीमान् 16:8c
अयुतैकं व्रते स्थित्वा 37:24a
अयुतैकञ्जपेद्घोरं 33:58a
अयुतैकेन जायते 38:9b
अयुतैकेन शुध्यति 37:33d
अयोग्यानुग्रहे कुर्यात् 180a
अरण्ये ध्याननिष्ठता 1:15d
अरण्ये पर्वतेऽपि वा 17:47b
अरथ्या वसुधा मेध्या 767a
अरिष्टचिन्तनाच्चैव 44:110a
अरिष्टे च चतुर्विधा 38:5d
अर्कमाचम्य दर्शयेत् 631d
∘अर्घ्यद्रव्यविलोपने 51b
अर्चापुष्पादितो मनून् 67d
अर्च्चनन्तु यदा मन्त्री 34:1a
अर्थञ्च विविधं हृत्वा 27:9a
अर्थलोभेन विज्ञाय 34:46c

अर्द्धात् तत् क्रमतः शुचिः 43:19d
अर्द्धात्तदर्द्धजाप्येन 37:32c
अर्द्धात्पादरजःस्पर्शे 45:24a
अर्धं वैश्यः समाचरेत् 383d
अर्धात् पादरजःस्पर्शे 98a
अर्धार्धेन तु सङ्करी 17:136b
अर्धेन कथितो मया 40:12b
अर्धोच्छिष्टो यदा मन्त्री 43:46c
अर्बुदे निम्नगायाम्वा 10:9c
अर्वाक् प्रदानान्मरणे 554a
अर्वाक्स्याच्चूडसंज्ञस्य 31:90c
अर्व्वाक् स्याच्चूडसंज्ञस्य 13:10a
अलङ्घ्यं स्थितिचिन्तकैः 630b
अलाभे घोरमन्त्रस्य 501a
अलुप्तनियमः सदा 10:36b
अल्पशौचा भवन्त्येते 717a
अवगृह्य त्रयःप्राणा° 33:5a
अवज्ञाञ्च वदेद्ग्रामं 30:11c
अवतीर्य तथैव च 668b
अवधूतमवक्षुतम् 729b
अवलीढं तु सन्त्यजेत् 682d
अवलीढं मृदग्निना 19:14d
अवलीढञ्च सन्त्यजेत् 7:58d
अवश्यं तं चरेन्मन्त्री 33:36c
अवाच्यवचने तथा 17:88b
अविच्छिन्नं प्रकर्तव्यं 608a
अविज्ञाते रजःस्रावे 503a
अविज्ञाय तु गोचरम् 7:38d
अविद्यमानदेहानां 625a
अविरुद्धञ्च यत्किञ्चिद् 8:2c
अविशस्तादिभिः स्पृष्टः 17:43a
अविसर्ज्जितपात्रे तु 43:19a, 45:87a, 45:88c
अशक्तितोऽन्यतः पूज्यं 45:67a
अशक्तौ स्नानमिष्यते 598d
अशक्यच्छर्दनं वा स्यात् 270a
अशीतिर्यस्य वर्षाणि 9a, 43:90a
अशीलेन सहाङ्गारो 1:32a
अशुचिं यः स्पृशेदन्यं 655a
अशुच्यपगतस्य च 665d
अशुद्धान्ये शुद्धिभाग्भवेत् 18:32b
अशुधान्येव शुद्धिभाक् 33:78d
अश्नीयाच्च त्र्यहं सायं 795a
अश्नीयात् त्र्यहमेकैकं 782c
अश्नीयात्तदयाचितम् 783b, 30:4d
अश्नीयात्तु त्र्यहं प्रातः 794c
अश्नीयात्त्र्यहमेकैकं 30:4a
अश्नीयुस्वेदघोरस्य 228c
अश्मकाष्ठतृणादिकम् 3:15d, 31:42b
अश्वकाकहतानि च 710b
अष्टदिक्षु स्थिता ब्रह्मन् 341c
अष्टधा यो न जानाति 17:174a
अष्टपुष्पप्रदानेन 17:123a
अष्टमंगलके पुंस्त्वे 13:13a
अष्टमङ्गलके भुक्त्वा 324c
अष्टमे तु तथा पक्षे 404a
अष्टमे मासि पुंस्त्वे च 31:29c
अष्टम्यां ब्रह्मकूर्चेन 11:82a
अष्टम्याञ्च चतुर्दश्यां 18:1c, 19:30c
अष्टम्यादिषु या पूजा 44:22c
अष्टलक्षं ततो जपेत् 371d
अष्टांशोनन्तु निर्माल्यं 43:84a
अष्टादशाहात् स्नानं स्यात् 529a
अष्टावष्टौ चरेद्ग्रासान् 793c

अष्टोत्तरशतेनैव 38:5a
अष्टौ दिक्षु स्थिता ब्रह्मन्स् 4:5a
अष्टौ शतान्यघोरेण 28:3a
असंस्तुतैर्यदा वाक्यैः 33:59c
असंहतद्रव्यशौचं 11:35c
असच्छास्त्राभिगमनं 426c
असच्छूद्रान्नभक्षणे 31:31d
असत्प्रतिग्रहं गृह्य 485a, 17:54c, 24:39c, 31:46a
असत्यं चाप्रियं च यत् 447b
असंन्यस्तमयागताः 33:46d
असन्यस्ते त्वपागते 19:26d
असमाप्ताह्निको मन्त्री 27:1a, 29:1a
असमाप्ते समाप्ते वा 67a
असंपूज्य न भुञ्जीयात् 88a
असाठ्येन विशुद्धये 24:33b
असौ कन्यागते भानौ 96c
अस्तंयाते रवौ पूजां 44:13c
अस्तसंसारबीजत्वात् 609c
अस्त्रन्दीप्तोल्कया ध्यात्वा 43:26a
अस्त्रमन्त्रशतं जपेत् 455b, 44:111d
अस्त्रसंरोषणात्सिद्धं 17:30a
अस्थिचर्मविनिर्मुक्तैः 751c
अस्थितिस्थितिकारकः 167d, 32:39b
अस्थिदन्तमयस्य च 715b
अस्थिमज्जागतं पापं 454a, 11:81c, 31:11c
अस्नात्वा यदि भुञ्जीत 272c, 505c
अस्नात्वा संस्पृशन् भुङ्क्ते 274a
अस्नात्वैव यदा भुङ्क्ते 277c
अस्नेहस्पर्शने स्नायात् 631c
अस्पृश्यस्पर्शनं कृत्वा 271a
अस्यापि द्विगुणं प्रोक्तं 34:10a
अस्यार्थोऽयं शलाकाया 115c
अहनि सम्वत्सरद्वयम् 44:71b
अहन्यहनि योऽधीते 497a, 3:21c
अहन्यहनि वा वत्स 825a
अहस्तदन्तकन्यायाया 43:73a
अहस्तु नवमादर्वाक् 589c
अहस्त्रयमयाचितम् 778b
अहानि त्रीणि नक्तं स्यात् 783c
अहानि त्रीणि नक्तेन 30:5a
अहिंसा सत्यमस्तेयं 31:97c
अहोरात्रकृतं पापं 498c, 17:60a
अहोरात्रञ्जपेद्वक्त्रं 17:15c, 23:9c
अहोरात्रमुपोषितः 83d, 43:21d
अहोरात्रमुपोष्य तु 7:6d
अहोरात्रोषितः स्नातः 11:79a
अहोरात्रोषितो भूत्वा 786c, 17:102a, 30:7a, 31:9c
आ द्वादशाहान्नारीणां 528c
आ नामकरणात्सद्य 43:71c
आ शताद्विगुणं चरेत् 415d
आ सप्तपुरुषाद्ग्राह्यं 551c
आ सहस्रात्तु त्रिगुणं 416a
आ स्नानकालान्नाश्नीयात् 514c
आ स्नानादुपवासः स्यात् 512c
आकरेष्वधिकारिता 426d
आकृत्य आर्थिकान् प्रोक्तो 828a
आकृष्टस्ताडितो वापि 377c
आक्रोषितस्ताडितो वा 18:34a
आखुनश्च शतेनैव 44:104c
आखुमार्जारकवधे 433a
आगतश्च पुनर्यदा 34:32b

आगराः शुचयः सर्वे 8:7c
आगुह्याद्धृदयान्तन्तु 45:80a
आग्नेयं स्नानमाचरेत् 671d
आग्नेयाममृते स्वाहा 345d
आग्नेय्यां मुक्तिदः शिवः 352b
आचमेद्ब्रह्मतीर्थेन 11:18a
आचम्य दीक्षितस्यापि 16:2c, 44:56c
आचम्य प्रोक्षयेद्भूयः 11:59c
आचम्यात्मनः कुर्याद् 11:57c
आचम्यान्नादिकं प्रोक्ष्य 686a, 7:62a
आचम्येशशतञ्जपेत् 19:2b
आचम्योत्तरमाचमेत् 669b
आचरेत्प्राणसंरोधं 388a
आचरेद्व्रतमेवं तत् 373c
आचान्तः पुनराचमेत् 257b, 662c, 43:44d
आचान्तः पूर्ववत्स्नातः 43:27a
आचान्तस्यावशिष्टं स्यात् 670a
आचान्तो बहुरूपकम् 224d
आचारः शिवभाषितः 44:1d
आचारं शिवभाषितम् 3b
आचारमाचरेच्छैवं 1:16c, 16:16c
आचाराच्च परिभ्रष्टास् 3:20a
आचार्यः परमेश्वरः 17:31b, 27:15b
आचार्यः शिवतां व्रजेत् 18:41d
आचार्यः सह शिष्यैस्तु 18:39c
आचार्यः साधको वापि 1:6c
आचार्यः स्वगुणोपेतो 18:41a
आचार्यं शिववज्ज्ञेयं 161a
आचार्यं हन्ति यो मोहात् 34:10c
आचार्यपुत्रकोऽपि वा 23:14b
आचार्यपुत्र्यां धात्र्यां च 411a
आचार्ययजमानयोः 576b
आचार्यसन्निधानेन 44:127a
आचार्यस्तु गुणोज्झितः 18:40b
आचार्यस्त्रिगुणं हि तम् 10:41d
आचार्यस्य मनोपमे 37:14d
आचार्येण यदादिष्टं 18:36a
अचार्यस्य वचो ग्राह्यं 12:6a
आचार्यैः सह यत्किञ्चित् 37:23a
आचार्यैकशते देवि 34:5a
आचार्यैर्गुरुणा विना 17:139b, 28:2b, 33:8d
आचार्यैस्तन्त्रपारगैः 19b, 45:92d
आचार्यो द्रव्यलोभेन 17:85a
आचार्योक्तं वचस्तथ्यं 10:49a
आज्ञां वा समतिक्रम्य 205c, 25:3a
आज्ञादानेन तेषां तु 148a, 174c
आज्ञालोपं गुरोः कृत्वा 17:158c, 33:28c
आज्यं घोरशतं जपेत् 230d
आज्यं दधि कुशोदकम् 786b, 30:6d
आज्यमुष्णं त्र्यहं पीत्वा 780a
आज्याभिघारणाच्छुद्धिः 702a, 11:42c
आढकोर्ध्वप्रमाणं तु 233a
आत्मघाती गुरोर्घाती 139c, 18:66a, 32:35c
आत्मज्ञानं स्मृतं षष्ठं 31:101c
आत्मदीक्षां गुरुः स्वयम् 180b
आत्मदीक्षामनुक्रमम् 25:1b
आत्मदीक्षामिमां कुर्यात् 206a, 25:3c
आत्मपाकक्रियारम्भो 424c
आत्मीयेऽपि न भोक्तव्यं 2:8a, 42:7a
आत्मोत्कर्षणवादित्वं 408a
आददन्नपरिज्ञानात् 26:13a

आदित्यदर्शनं कुर्यात् 527a
आदित्याभिमुखः स्थितः 17:5d
आदित्रियहमिष्यते 502d
आदृता शुध्यते यथा 17:69b
आदेशं गुरवे दत्वा 33:52c
आदेशं गुरवे लोप्य 33:30a
आदेशं गुरु विलोप्य 17:160a
आदौ शौचं ततः स्नानं 257a, 43:44c
आधिक्ये द्रव्यवर्धनम् 60d
आपत्सु शिवयज्ञवित् 205b, 25:2d
आपदाद्यैः क्रियार्थिभिः 18:8d
आपादजानुपर्यन्तं 45:78a
आपूर्य तत्समञ्जपेत् 32:5b
आमणिबन्धाच्च करौ 11:15a
आमन्त्रितो न भुङ्क्तेऽन्नं 7:15c
आमलीफलमात्राश्च 11:10c
आमिक्षयार्धमासं तु 784c
आरण्यानां च सर्वेषां 245a
आरभ्य पञ्चमान्मासात् 546c
आरामाणाञ्च कल्पने 42:5
आरामोदककीर्त्तीनां 19:34c
आर्तवं मूत्ररेतसी 651b
आर्द्रवासाः पयः पीत्वा 24:25c
आलयादिषु यत्नेन 490a, 44:100a
आलापादयुताच्छुद्धिः 335a, 337a, 375a, 45:45a
आलावुकं वैदलं च 17:41a
आलीढं तु विशुद्ध्यति 681d, 7:57d
आलोड्याप्लाव्य चाम्भसा 11:18d
आवर्तनाद्विशुध्येत 37:6a
आवर्त्य पञ्चवारं तु 815a
आवाहनविसर्गान्तं 17:126a, 18:19c
आवाहने विसर्गे च 63c
आविकं नैव दुष्यति 718d
आविकं सन्धिनीक्षीरं 244c
आशौचं ज्ञातिनामपि 543b
आशौचं तत्त्रिपूरुषम् 544d
आशौचं दशरात्रं स्यात् 540a, 550a
आशौचं दहनादिभिः 621b
आशौचं परिकीर्तितम् 601b
आशौचकालापगमे 588c
आशौचात् स्नानवस्त्राणां 614a
आशौचिनां तथान्येषां 539a
आशौचिनां तु सर्वेषां 587c
आशौचिनां समयिनां 602c
आशौचियोगं त्यजतां 609a
आशौचे वा परेषां यो 580c
आश्रमाणां च भेदकः 772d
आश्रमेषु स्थितैर्नरैः 1:9d
आश्रयन्ति कदाचन 31:94b
आश्रयन्ति शिवं ज्ञानं 7:44a
आश्रये स्थावरं विद्यात् 36:2a
आश्रयेत्सिद्धिदं लिङ्गं 10:14c
आसनं च तथैव च 150d
आसनं न्यासमात्रन्तु 7:32c
आसनं शयनं यानं 154c, 687c, 7:63c, 18:48a
आसनञ्च तथैव च 33:53d
आसनस्कन्धहानौ च 48a
आसनस्य बहिर्न्यासः 7:33a
आसने शयने वाथ 182c
आसने शयने स्थाप्य 18:56c
आसने शयने स्थाप्यं 32:16c
आसामन्यतमां गच्छन् 397c

आहतं धातुरक्तं च 765c
आहवाग्निर्महादेवो 363a, 6:9c
आहवे गोग्रहे वैरे 33:61a
आहिताग्निस्तु सद्विजः 43:64d
आहिताग्नेः पुनर्दाहे 573c
आहिताग्नेरनिर्वाण॰ 572c
आहिताग्नेर्मृतौ दाहात् 573a
आहुतीनां सहस्रन्तु 27:2a
आहुतीनां सहस्रैकं 29:2a
आह्निकन्तु यदा भवेत् 27:3d
आह्निके तु शतैकेन 37:35c
इच्छेत्संस्कारमौलिकम् 35:12d
इतरे पादहीनन्तु 44:60a
इतरेषां तु सर्वेषां 10:46a
इतरेषां पादहीनं 16:6a
इतरैः पादवर्ज्जितः 43:30b
इति पञ्चविधा शुद्धिः 11:49c
इति बुद्ध्वा समं व्रजेत् 10:19d
इति सत्यं तदा वचः 118b
इतिहासपुराणानि 37:29a
इत्यष्टौ शुद्धिभेदास्तु 45:5a
इत्यादि पशुवत्कर्म 624c
इत्याह परमेश्वरः 20:4d
इत्याह भगवांच्छिवः 21:6d, 35:16d, 43:102d
इत्येतत् पञ्चगव्यकम् 800d
इत्येतत्तपसो रूपं 607c
इत्येव चेश्वरोऽब्रवीत् 18:34d
इदमेवान्तरस्पर्शात् 16:4a
इन्दुबिन्दुशिखोपेतं 817a
इन्द्रियाणां यमादिभिः 31:97b
इन्धनार्थं द्रुमच्छेदः 425c
इष्टकात्वाष्ट्रचुल्ल्यादेः 728c
इष्टमन्त्रव्रते युक्तो 17:20a
इष्टमित्रातिथीनां च 407a
इष्टलिङ्गे हृते नष्टे 43:16c
इष्ट्वा देवं चतुर्थेह्नि 44:66c
इहलोके परत्र च 37:11d
ईदृशञ्च व्रतं कृत्वा 34:16c
ईप्सितं फलमाप्नुयात् 17:109b
ईशः साधारणः परः 289b
ईशं दशगुणोत्तरम् 27:12b
ईशजापेन मानवः 39:8b
ईशन्दशगुणोत्तरं 24:2d
ईशस्थाने तु जातीशं 297c
ईशस्य त्रिशतं जपेत् 31:3b
ईशाः शङ्करनायकाः 19:2d
ईशानः कर्णिकामध्ये 7:19c
ईशानः पर्वतो ज्ञेयः 368a
ईशानः पश्चिमे दले 7:24d
ईशानः प्रभुरिष्यते 288d, 31:108b
ईशानः प्राग्दले स्थितः 7:21d
ईशानं कर्णिकामध्ये 296c
ईशानं जपमानस्तु 17:100a
ईशानं पञ्चविंशत्या 17:96a, 17:106a
ईशानं पर्वताग्रे तु 3:2a
ईशानं प्रजपेद्द्यात् 55a
ईशानजपविंशत्या 17:98a, 23:2c
ईशानञ्च तदा जपेत् 30:13d
ईशानञ्जपते यस्तु 17:104a
ईशानन्तु जपेत्मन्त्री 31:57a
ईशानन्तु समभ्यसेत् 3:13b
ईशानमभ्यसेद्विद्वान् 3:5a
ईशानम्पूजयेन्नित्यं 6:16a

ईशानम्पूर्ववज्जपेत् 31:40b
ईशानशतजप्तेन 17:17c
ईशानशिरसः सर्वे 7:35c
ईशानश्चोत्तरे दले 7:23d
ईशानस्तावुभावपि 6:13d
ईशानस्य जपेल्लक्षं 307a, 26:8a
ईशानस्य तथा जपेत् 13:20b
ईशानस्य तु मण्डलम् 297b, 7:21b
ईशानस्य शतं जप्त्वा 164a, 23:28a, 31:44a
ईशानस्य शतं जाप्यं 45:81a
ईशानाष्टशतं जप्त्वा 17:95a, 17:97a, 23:27a
ईशानाष्टसहस्रेण 17:16c
ईशाने तस्य दिग्भागे 5:6a
ईशानेन घृतं ग्राह्यं 5:2a
ईशानेन विशुध्यति 31:51d
ईशानेनाथ वक्ष्यामि 17:93a
ईशानो दक्षिणे दले 7:22d
ईश्वरः परिकीर्तितः 314b, 7:30d
ईश्वरं दक्षिणे चैव 6:16c
ईश्वरो बहुरूपश्च 7:26c
ईश्वरो बहुरूपस्तु 310c
उक्तञ्च बीजभेदे तु 36:6a
उक्तपादश्चरेद्बुधः 43:18d
उक्तमासत्रये यस्तु 96a
उक्तस्थानेषु यो भुङ्क्ते 331a
उक्ताचारविलोमे तु 36:7c
उक्तानुक्तानि यानि तु 18:31d, 33:78b
उक्षेपः फट्कृतेन तु 7:11b
उच्चाटनादिकं कृत्वा 442a, 44:94a
उच्छिष्टः सूतके प्राप्ते 13:12c
उच्छिष्टं मृण्मयं त्याज्यं 30:16a
उच्छिष्टन्तु समानानां 24:7c
उच्छिष्टम्भक्षयेद्यस्तु 17:80a
उच्छिष्टलिप्तपात्रस्य 16:11c
उच्छिष्टलेपसंपर्कात् 17:44a, 24:39a
उच्छिष्टस्तु यदा स्पृष्ट 43:48c
उच्छिष्टस्तेन संस्पृष्टः 652c
उच्छिष्टस्पर्शनेऽपि वा 39:3d
उच्छिष्टस्पृष्ट आचम्य 280a
उच्छिष्टस्पृष्टभाजनम् 16:12b
उच्छिष्टस्य च विड्लेपात् 648c
उच्छिष्टस्य च संस्पर्शात् 685c
उच्छिष्टस्य च संभाषात् 665c
उच्छिष्टस्य तु विट्लेपात् 9:10a
उच्छिष्टस्य तु संस्पर्शाद् 7:61c
उच्छिष्टस्येन्द्रियस्रुतौ 256d
उच्छिष्टस्येन्द्रिये स्रुते 43:44b
उच्छिष्टा सा प्रपश्यति 512b
उच्छिष्टानां तु संस्पर्शे 665a
उच्छिष्टैर्वेणुकादिभिः 43:48d
उच्छिष्टो यदि गृह्णीयात् 230c
उत्कृष्टजातिसंस्पर्शे 535a
उत्कृष्टे दूषणानृतम् 409d
उत्क्लेदवत्समुत्पन्ने 7:1a
उत्क्षणाद्द्वारवस्य तु 17:41d
उत्तमाङ्गमुपानहोः 764b
उत्तमाङ्गे तु सर्वत्र 647c, 9:9a
उत्तमाङ्गो यदालिप्तः 22:2a
उत्तमाङ्गोपघाते च 646a, 9:7c
उत्तमाधममध्यमा 1:4d
उत्तमेष्वपवादनम् 408b
उत्तरे पर्व्वणि शिवं 6:17a

उत्तरेऽमोघमाता च 344c
उत्तीर्योदकमाचामेत् 668a
उत्थाय पश्चिमे यामे 11:2a
उत्पन्ने प्राणसन्देहे 18:29a
उत्सर्गैरज्ञभक्षणे 3:6d
उत्सवेषु च सर्वेषु 656c
उदक्या भाजनेऽपि वा 267d
उदक्या भुक्तपात्रे तु 268c
उदक्या स्पृष्टसंघुष्टं 264a
उदक्यां वा सकृद्गत्वा 476a
उदक्याद्युदकं स्पृष्टं 652a
उदक्यायाः करेणाथ 260a
उदक्याया भुक्तपात्रं 273c
उदक्यायाः समीपस्थं 262a
उदक्याशौचिभिः स्पृष्टः 272a
उदक्यासूतिकादृष्टं 276c
उदक्यास्पृष्टदध्याज्य 275a
उदक्योदक्यया स्पृष्टा 513c
उदिते तेन शुद्ध्यति 541b
उद्धरेद्भुवनेशीं च 823c
उद्धृताभिरनुज्ञाभिः 11:16a
उद्धृताश्चापः शुद्ध्यन्ति 748c
उद्धृत्य तज्जलं सर्वं 752a
उद्वाहिताश्चतस्रस्तु 13:8a
उद्वाहिताश्चतस्रो वै 43:66c
उद्धृता दिव्यभेदं ते 38:13c
उद्वेगमनूत्सहं च 1:23a
उपघाते तु संजाते 67c
उपघाते सकूर्प्परे 19:20b
उपघ्रातान्परित्यजेत् 8:4b
उपजीवन्ति ये देवि 34:36c
उपपातकनाशनम् 30:9b
उपपातकयुक्तोऽपि 17:102c
उपपातकशुद्धिः स्यात् 427c
उपपातकसामान्यं 17:140a, 18:31a
उपपातकसामान्यैः 33:9c, 33:77c
उपपातकिनः सर्वे 17:51a
उपपातकिनामेष 21:14c
उपब्रह्माणि सर्वेषां 7:37a
उपरोधात्तथा स्नेहात् 184c, 44:91a
उपर्युपरि लिङ्गञ्च 10:15c
उपलेपनधावनात् 741b
उपवासं समोपेतं 43:10a
उपवासत्रयं कुर्यात् 511c
उपवासत्रयं कृत्वा 162a, 31:55a
उपवासद्वयं कार्यं 15a, 45:57a
उपवासद्वयाद्वत्स 44:15c
उपवासन्ततश्चोर्ध्वं 31:105a
उपवासमकामतः 476b
उपवासमहोरात्रं 785c
उपवासविहीनस्तु 44:27c
उपवासस्तथा नक्तं 238a, 43:36c
उपवासस्तथा स्नानं 10:55a
उपवासाद्विशुध्यति 31:60d
उपवासेन चैकेन 23:15a
उपवासेन शुद्धिः स्यात् 262c
उपवासेन शुद्ध्यति 261d, 279b
उपवासो भवेत्खग 12:2d
उपवासोऽप्यदीक्षितैः 281b
उपसन्ने तदा तस्य 33:38a
उपसर्प्पेद्गुरुं पुनः 34:21b
उपस्पर्शनकाले तु 11:12c
उपस्पृश्यैव शुद्धिः स्यात् 7:3a
उपेक्षया यथा दोषः 209c

उपेक्षापरिहारेण 1:27a
उपेक्षायान्तदर्द्धतः 45:84d
उपेक्षितं गुरोर्द्रव्यं 17:150c
उपेक्षिते तु निर्माल्ये 208a, 31:23c
उपोष्य पञ्चगव्याशी 31a, 38c
उपोष्य बहुरूपस्य 389c
उपोष्य रजनीः पञ्च 17:148a, 33:20c
उपोष्य रजनीमेकां 252a, 276a, 290c, 43:42c
उपोष्य शिवकूर्चं तु 385a
उपोष्याष्टशतं जपेत् 37d, 31:58d
उभयेषां सपिण्डानाम् 554c
उभयोर्द्विगुणं प्रोक्तं 24:28c
उलूकगृध्रकाकाद्यैः 231c, 11:71c, 31:26c
उल्कापाते मृते वीरे 18:5c
उल्लङ्घ्य भोजनाचारं 13:11c
उल्लेखाङ्गूर्विशुद्ध्येत 16:14a
उषित्वाग्निं स्पृशन् प्राश्य 620a
उष्ट्रं गजं मृगं व्याघ्रं 31:65c
ऊढानां तु वरादिनाम् 554d
ऊरुभ्यां वैश्य उत्पन्नो 7:5a
ऊर्णाकौशेयकुतपाः 716c
ऊर्द्धबाहूर्दिनङ्कृत्स्नं 17:6a
ऊर्ध्वं नाभेर्यानि खानि 644c
ऊर्ध्वं मासत्रयादर्वाक् 594c
ऊर्ध्वं षण्मासपर्यन्तं 545c
ऊर्ध्वं स्नानेन शुद्ध्यति 589d
ऊर्ध्वं हेमविधिः स्मृतः 416b
ऊषरे जलकृष्टे च 31:57c
ऊषरे च जले कृष्टे 35c
ऊषोत्स्वेदनखण्डाद्यैः 521c
ऋणानां चानपक्रिया 419d
ऋतुमत्या च यत्स्पृष्टं 1:25c
ऋतुमत्स्त्रीविजातिभिः 696d, 22:11b
ऋतुस्त्रीपतिताशौचि॰ 106c
ऋतुस्नाता बलात्स्नेहात् 523c
ऋतुस्नाता यदा पत्नी 461c
एक एव स दुष्यति 655b
एक एव स्थितो मध्ये 350a, 5:4c
एकः शिवस्त्रयाणान्तु 45:2a
एकं वा बहुरूपिणम् 3:14b, 31:41b
एकं वा ब्रह्ममव्ययम् 26:12b
एकं वा रूपिणः शतम् 614b
एककालं द्विकालं वा 43:9c
एककालमथापि वा 73d, 44:16b
एककालार्चने लुप्ते 43:9a
एककृष्णलमात्रे तु 390a
एकतश्च त्रयो वेदा 17:83a
एकदारुसमारूढः 642c
एकदेशस्य दूषणे 11:36b
एकद्विचतुरष्टधा 373b
एकद्वित्रिगुणं द्विजः 19:3b
एकद्वित्रिचतुश्चाष्ट॰ 566a
एकद्वित्रिशतं क्रमात् 225d
एकद्वित्रिश्चतुश्चान्ते 45:39a
एकपङ्क्तिः सदा वर्ज्या 223c
एकभुक्तं त्र्यहं कुर्यात् 778a, 15:11a, 30:8c, 31:75c, 44:41a
एकम्वा वर्त्तयेद्वरं 14:18d
एकरात्रन्तथा ग्रामे 34:17a
एकरात्रादितः क्रमात् 24:9d
एकरात्रोपवासश्च 789c
एकरात्रोषिता आपः 749a

एकरात्रोषितो भूत्वा 473c, 528a, 17:66a, 23:26a
एकलिङ्गं प्रसन्नधीः 35:1d
एकलिङ्गं शिवालयम् 348d, 5:3b
एकविंशतिवारांस्तु 11:56c
एकवृक्षसमारूढौ 527c
एकवृक्षे च कूपादौ 33:50a
एकवृक्षे चतुष्पथे 34:18b
एकवृक्षे तथा कूपे 34c, 34:50a
एकवृध्या चतुर्णान्तु 31:83c
एकस्थमभिमंत्रयेत् 5:2d
एकस्थो तत्र जप्तव्यो 7:7a
एकादश सवत्सकाः 341b, 4:4d
एकादशात्मनो व्यस्तः 10:48c
एकान्तरमथापि वा 34:20b
एकान्तरोपवासश्च 36:11c
एकान्नं पतितान्नं च 299a
एकान्नं यस्तु वै भुङ्क्ते 17:90c
